'पौर्वापर्य' हेतुहेतुमद्भाव। यह ग्रन्थ हेतु है और इसके प्रतिपाद्य अलङ्कार हेतुमान्। कारण और कार्य (हेतु और हेतुमान्) में तो पौर्वापर्य सिद्ध ही है। अथवा आदि से अन्त तक ग्रन्थ के अर्थ को 'पर्यालोच्य' जानकर। 'अचिरेण' शीघ्र ही। 'निपुणस्य' कुशल की। 'काव्य' कविभाव। अलङ्कृत करने के लिये अर्थात् अलङ्कार से युक्त बनाने के लिये। 'अलम्' अत्यधिक। 'कर्ता' अर्थात् कवि। 'उदार' का अर्थ है तीक्ष्ण अथवा योग्य। 'मति' अर्थात् बुद्धि उत्पन्न होती है। अतएव इस अलङ्कार की रचना सप्रयोजन है ॥

अथ काव्यकरणस्यैव तात्त्विकं प्रयोजनमित्याह—

ज्वलदुज्ज्वलवाक्प्रसरः सरसं कुर्वन्महाकविः काव्यम्।
स्फुटमाकल्पमनल्पं प्रतनोति यशः परस्यापि ॥ ४ ॥

फिर काव्य-रचना से ही क्या लाभ, इसे बताते हैं—

देदीप्यमान वाणी के प्रबन्धवाला महाकवि रसपेशल काव्य की रचना करके सृष्टि के अवसान तक प्रभूत यश को प्रत्यक्ष विखेरता रहता है—॥ ४ ॥

ज्वलन्देदीप्यमानोऽलङ्कारयोगात्, उज्ज्वलो निर्मलो दोषाभावात्, वाचां गिरां प्रसरः प्रबन्धो यस्य स ज्वलदुज्ज्वलवाक्प्रसरः। सरसं सशृङ्गारादिकम्, कुर्वन्रचयन्, काव्यं कवेः कर्म, यत एवंविधगुणस्तत एव महाकविर्बृहत्काव्यकर्ता, स्फुटं प्रकटम्, आकल्पं युगान्तस्थायि, अनल्पमस्तोकम्। जगद्व्यापीत्यर्थः। प्रतनोति विस्तारयति, यशः कीर्तिम्, परस्य काव्यनायकस्य संबन्धि। अपिशब्दोऽत्र विस्मये। चित्रमिदं यत्कविः स्वल्पायुरप्येवंविधं यशस्तनोति। आत्मनोऽपीति तु व्याख्याने 'स्फारस्फुरद्गुरुमहिमा' (१।२१) इत्याद्यनर्थकं स्यात्, गतार्थत्वात् ॥

'ज्वलन्' अर्थात् अलङ्कार से युक्त होने के कारण देदीप्यमान। 'उज्ज्वल' अर्थात् दोषाभाव के कारण निर्मल। 'वाचाम् गिरा प्रसरः' वाणी का प्रवाह, प्रबन्ध अर्थात् देदीप्यमान निरवद्य वाणी का प्रबन्ध। 'सरस' अर्थात् शृङ्गारादि रसों से युक्त। 'कुर्वन्' रचना करता हुआ। कवि का कर्म काव्य, चूंकि इन गुणों से युक्त होता है अतएव महाकाव्य का रचयिता होता है। स्फुट रूप से अर्थात् प्रकट ही। सृष्टि तक अर्थात् युग के अवसान तक। 'अनल्प' अर्थात् प्रभूत। विश्वव्यापी। 'प्रतनोति' का अर्थ है फैलाता है। यश अर्थात् कीर्ति। 'परस्य' का अर्थ है काव्य के नायक का। 'अपि' शब्द यहाँ विस्मय अर्थ में प्रयुक्त हुआ है। आश्चर्य है कि कवि स्वल्पायु होकर भी इस प्रकार के सृष्टि तक चलने वाले यश को फैलाता है। यदि 'अपि' पद से 'अपना भी' यह गम्य माना जाय तो आगे कही गयी 'स्फारस्फुरद्गुणमहिमा' (१।२१) आदि कारिका के गतार्थ होने के कारण आनर्थक्य का प्रसङ्ग आ जायगा॥

ननु देवगृहमठादिकं कारयित्वा स्वयमेव नायकः स्वयशो विस्तारयिष्यति, किं कवेस्तदर्थं काव्यकरणेनेत्याशङ्क्याह—

तत्कारितसुरसदनप्रभृतिनि नष्टे तथाहि कालेन।
न भवेन्नामापि ततो यदि न स्युः सुकवयो राज्ञाम्॥ ५॥

इसी प्रयोजन से कवि की काव्य-रचना से क्या लाभ—इसका समाधान करते हैं—

चूंकि नायकों के द्वारा बनवाये गये देवालय आदि कालान्तर में नष्ट हो जाते हैं अतएव यदि राजाओं के (नायकों के चरित को प्रबन्ध रूप में परिणत करनेवाले) सुकवि न हों तो उनका नाम भी न अवशेष रहे॥ ५॥

तत्कारितसुरसदनप्रभृतिनीत्यत्र तच्छब्देनोत्तरत्र राज्ञामित्येतत्पदोपात्ताः काव्यनायकाः परामृश्यन्ते। ततः काव्यनायकविधापितदेवगृहादौ कालपर्ययेण नष्टे नाशं गते सति। तथा हीति हिशब्दो यस्मादर्थे, तथाशब्द उपप्रदर्शने। न भवेन्न स्यात्, नामाप्यभिधानमपि। आस्तां तावदन्यय इति। ततः सुरसदनादिनाशाद्धेतो, यदि राज्ञां नायकानां सुकवयो न स्युः। तच्चरितकथाप्रबन्धनकर्तार इति। राज्ञामिति काव्यनायकोपलक्षणम्।

कारिका में 'तत्कारितसुरसदनप्रभृतिनि' में 'तत्' पद से 'उत्तरवर्ती' 'राज्ञाम्' पद से काव्य के नायकों का परामर्श होता है। तदनन्तर काल के प्रभाव काव्य-नायकों के द्वारा बनवाये गये देवालय आदि के नष्ट हो जाने पर। 'तथा हि' में हि शब्द 'यस्मात्' के अर्थ में और तथा शब्द 'उपप्रदर्शन' अर्थ में आया

है। नाम भी अभिधान भी न शेष रहता। वंश (कुल) आदि का तो कहना ही क्या। तदनन्तर देवालय आदि के नष्ट हो जाने के कारण—यदि राजाओं के सुकवि न हों। सुकवि यहाँ नायकों के चरित को प्रबन्धरूप में परिणत करने वालों के अर्थ में प्रयुक्त हुआ है। (कारिका में) 'राज्ञाम्' काव्यनायकों के लिये प्रयुक्त किया गया है ॥

अथ यदि नाम राज्ञां यशस्तन्वन्ति तथापि किं तेषां यत्ते काव्यकृतौ प्रवर्तन्त इत्याह—

इत्थं स्थास्नु गरीयो विमलमलं सकललोककमनीयम् ।
यो यस्य यशस्तनुते तेन कथं तस्य नोपकृतम् ॥ ६ ॥

यदि (कवि) राजाओं का ही यश फैलाते हैं तो उससे उनका क्या लाभ जो वे काव्य रचना में प्रवृत्त होते हैं इसका उत्तर देते हैं—

इस प्रकार स्थायी, गुरुतर, अति निर्मल सकल प्रजा में रमणीय जिसके यश को जो फैलाता है वह उसका कौन सा उपकार नहीं करता ? ॥ ६ ॥

इत्थम् 'स्फुटमाकल्पमनल्पम्' (१।४) इत्यनेन प्रकारेण, स्थास्नु स्थिरतरम्, गरीय प्रभूतम्, दोषाभावाच्च विमलम्, अलमत्यर्थम्, सकललोककमनीयं सकलजनकान्तम्, य कविर्यस्य राजादेर्यशस्तनुते तेन कथं तस्य नोपकृतम्। सर्वथोपकृतं भवतीत्यर्थः ॥

'इत्थम्' का अर्थ है 'स्फुटमाकल्पमनल्पम्' (१।४) आदि कारिका की द्वितीय पंक्ति कही गयी रीति से। 'स्थास्नु' अर्थात् चिरकाल तक चलनेवाला। गरीय अर्थात् गौरवमय और दोषों से शून्य होने से निर्मल। (कारिका में आये) 'सकललोककमनीयम्' का अर्थ है समस्तप्रजा में सम्मानित। जो कवि जिस राजा आदि का यश फैलाता है (भला) वह उसका क्या उपकार नहीं करता (वह) सर्वथा उपकृत ही होता है ॥

ननु यदि कविना परस्योपकृतम्, ततोऽपि किं तस्येत्याह—

अन्योपकारकरणं धर्माय महीयसे च भवतीति ।
अधिगतपरमार्थानामविवादो वादिनामत्र ॥ ७ ॥

दूसरों का उपकार करने से धर्म होता है और तेज बढ़ता है। मोक्ष को प्राप्त किये हुये लोग ही इसमें प्रमाण हैं ॥ ७ ॥

गतार्थं न चाम्। चकारोऽन्योपकारकरणं चेत्यत्र योज्य ॥

पुनः विवेचन करना उचित नहीं है। कारिका में 'च' का अन्वय 'अन्योपकारकरणम्' के साथ करना चाहिये।

एवं धर्म एव कवेः काव्यकरणे प्रयोजनमित्यभिधायार्थकाममोक्ष-हेतुत्वमप्याह—

अर्थमनर्थोपशमं शमसममथवा मतं यदेवास्य ।
विरचितरुचिरसुरस्तुतिरखिलं लभते तदेव कविः ॥ ८ ॥

'इस प्रकार धर्म ही काव्य-रचना में प्रयोजन होता है' इसका प्रतिपादन करने के बाद (अवशेष) अर्थ, काम और मोक्षरूप पुरुषार्थ की साधना में काव्य-रचना की कारणता सिद्ध करते हैं—

सुन्दर देवस्तुतियों की रचना करनेवाला कवि, कष्टों को हरण करनेवाले धन, असामान्य सुख अथवा जो कुछ उसका वाञ्छित होता है उस समग्र वस्तु को प्राप्त करता है ॥ ८ ॥

अर्थमिति । अर्थो धनम्, अनर्थोपशमो विपदभावः, शं सुखम्, असममसाधारणम् । इह लोके कामजं परत्र तु पारम्पर्येण मोक्षजम् । अथवा किमेभिर्बहुभिरुक्तैर्यदेवास्य कवेः संमतं तदेवाप्नोतीति । कीदृशः । विरचितसदलंकारदेवतास्तुतिः ॥

अर्थमिति । 'अर्थ' धन, 'अनर्थोपशम' विपत्ति का नाश, 'शम्' सुख, 'असम' असामान्य (लोकोत्तर) इस लोक में कामनाओं से उत्पन्न और परलोक में मुक्तिजन्य । अथवा इस ढोंग मारने से क्या, इस कवि को जो कुछ वाञ्छित होता है वही उपलब्ध हो जाता है । कैसा (कवि वाञ्छित फल प्राप्त कर लेता है) ? जो सुन्दर अलङ्कारों से युक्त देव-स्तुति लिख लेता है ।

किमत्र प्रमाणमिति चेत्तदाह—

नुत्वा तथाहि दुर्गां केचित्तीर्णा दुरुत्तरां विपदम् ।
अपरे रोगविमुक्तिं वरमन्ये लेभिरेऽभिमतम् ॥ ९ ॥

इसमें प्रमाण ही क्या है इसका उत्तर देते हैं—

दुर्गा को नमस्कार करके कुछ लोग दुःख से तरणीय विपत्ति को पार कर गये, कुछ ने रोग से मुक्ति पायी (और) दूसरों ने अभीष्ट वर प्राप्त किया ॥९॥

नुत्वेति । तथाहीत्युदाहरणोपदर्शने । दुर्गाग्रहणं देवतोपलक्षणार्थम् । तथाहि केचिदनिरुद्धादयः शत्रुवश्यादिकां विपदं तीर्णाः । केचिन्मयूर-देवादयो नीरुजत्वं प्रापुः । अपरे शत्रुघ्नप्रभृतयोऽभिमतं वरं लब्धवन्तः । एवमन्येऽप्युदाहरणत्वेन तथाविधा ज्ञेया इति ॥

नुत्वेति । (कारिका में) 'तथाहि' पद उदाहरण के उपदर्शन के लिये प्रयोग किया गया है । 'दुर्गा' पद का प्रयोग देवता का उपलक्षक है । कोई

अनिरुद्ध आदि शत्रु से प्राप्त अभिभव आदि विपत्ति को पार कर गये। वंरदेव आदि कुछ लोग आरोग्य प्राप्त कर लिये। शत्रुघ्न आदि अन्य लोगों ने अभीष्ट वर प्राप्त किये। अन्य उदाहरण भी इस—प्रकार खोज लेने चाहिये॥

इह केचिद्विक्रमादित्यादिजनितं कविजनसत्कारं श्रुत्वाधुनातननृपेभ्यस्तथानवलोक्य प्रेरयेयुर्यथा नृपेभ्यः सकाशान्न किंचित्फलं तथा देवताभ्योऽपि साम्प्रतं न काव्येन किंचित्फलं भविष्यतीत्याशङ्कयाह—

आसाद्यते स्म सद्यः स्तुतिभिर्येभ्योऽभिवाञ्छितं कविभिः।
अद्यापि त एव सुरा यदि नाम नराधिपा अन्ये॥ १०॥

यहाँ विक्रमादित्य आदि के द्वारा किये गये कवियों के सम्मान को सुनकर और संप्रति राजाओं से वैसा सम्मान न पाने के कारण, जिस प्रकार राजाओं के संसर्ग से कोई लाभ नहीं उसी प्रकार देवों से भी अतएव काव्य-रचना से क्या लाभ इसका उत्तर देते हैं—

कवि लोग स्तुतियों के द्वारा जिन (देवों) से शीघ्र ही अभीष्ट लाभ करते थे आज भी वे ही देवता हैं, राजा दूसरे हैं तो क्या हुआ॥ १०॥

स्फुटार्थं न वरम्। यदि नामेति नामशब्दः परं शब्दार्थे। यदि परं नृपा। अन्ये देवास्तु त एवेति॥

स्पष्ट है। 'नाम' पद 'परम्' के अर्थ में आया है। यदि राजा वे नहीं हैं। देवगण तो वे ही हैं।

काव्यकरणे प्रयोजनाप्रमेयतामाह—

कियदथवा वच्मि यतो गुरुगुणमणिसागरस्य काव्यस्य।
कः खलु निखिलं कलयत्यलमलघुयशोनिदानस्य॥ ११॥

काव्य रचना के प्रयोजन अनन्त हैं—इसे बताते हैं—

मैं कहाँ तक कहूँ, प्रशस्तगुणरूप मणियों के सागर, प्रभूत यश के आश्रय काव्य का भला कौन अविकल मूल्याङ्कन कर सकता है॥ ११॥

कियदिति। कियदथवा भण्यते। यतो यथा सागरे मणीनामानन्त्यमेव काव्ये गुणानामपीति तात्पर्यम्। खलुर्निश्चये॥

कियदिति। अथवा कहाँ तक कहें। क्यों कि जिस प्रकार सागर में अनन्त मणियाँ होती हैं उसी प्रकार काव्य में अनन्त गुण। 'खलु' यहाँ निश्चय (के अर्थ में प्रयुक्त हुआ है)॥

एवं प्रयोजनानन्त्ये सति कृत्यमाह—

तदिति पुरुषार्थसिद्धिं साधुविधास्यद्भिरविकलां कुशलैः ।
अधिगतसकलज्ञेयैः कर्तव्यं काव्यममलमलम् ॥ १२ ॥

इस प्रकार अनन्त प्रयोजन के होने पर क्या करना चाहिये इसे बताते हैं— इस लिये ज्ञातव्य सभी बातों को जानने वाले भलीभांति पुरुषार्थ सिद्धि करनेवाले कुशल व्यक्तियों को सुन्दर काव्य की प्रभूत रचना करनी चाहिये ॥ १२ ॥

तदिति । तस्मात्पुरुषार्थसिद्धिं पूर्णां चिकीर्षुभिः काव्यं कर्तव्यम् । कीदृशैः । अधिगतसकलज्ञेयैः । न त्वनीदृशामपि काव्यकरणं संभवतीत्याह—अलममलम् । सनिर्मलकरणेऽन्येषामसामर्थ्यमित्यभिप्रायः ॥

तदिति । *अतएव पुरुषार्थसिद्धि को पूर्ण करने की इच्छा रखनेवालों को* काव्य रचना करनी चाहिये । किन लोगों को ? जो ज्ञातव्य (छन्द, कोश, व्याकरण आदि) जानते हैं । जो नहीं जानते हैं वे काव्य रचना में सफल हो ही नहीं सकते । इसे बताते हैं—प्रभूत निर्दोष (काव्य की रचना करनी चाहिये । दोष शून्य काव्य की रचना में ज्ञातव्य को न जाननेवाला असमर्थ होता है—यह भाव है ॥

ननु ज्ञातसकलज्ञेयस्य तत्त्वादेव पुरुषार्थसिद्धिर्भविष्यति; किं काव्यकरणेनेत्याह—

फलमिदमेव हि विदुषां शुचिपदवाक्यप्रमाणशास्त्रेभ्यः ।
यत्संस्कारो वाचां वाचश्च सुचारुकाव्यफलाः ॥ १३ ॥

सब कुछ ज्ञातव्य को जानने वाले को तत्वज्ञान से ही पुरुषार्थ सिद्धि हो जायगी काव्य रचना करने से क्या ? इसे आगे बताते हैं—

विशद व्याकरण और न्यायशास्त्र के ग्रन्थो से वाणी का जो संस्कार और सरस काव्यरूपी फल को उत्पन्न करनेवाली जो वाणी होती है वही विद्वानों के लिये फल है ॥ १३ ॥

फलमिति । हि यस्माज्जानतामिदमेव ज्ञानफलं यच्छुचिपदवाक्यप्रमाणशास्त्रेभ्यो विशदव्याकरणतर्कग्रन्थेभ्यः सकाशात्संस्कारो वाचाम् । ननु वाक्संस्कारस्यापि किं फलमित्याह—वाचश्च सुचारुकाव्यफलाः । च समुच्चये । सुन्दरकाव्यकरणमेव वाक्संस्कारस्य फलमित्यर्थः ॥

फलमिति । क्यों कि विज्ञजनों के लिये यही फल मिलता है कि विशुद्ध व्याकरण और तर्क के ग्रन्थों से बोलने में एक निखार आता है । निखार से ही

क्या लाभ इस शङ्का का उत्तर देते हैं—सुमधुर काव्यरूप फल को जन्म देने वाले वचन होते हैं। 'च' निपात यहाँ समुच्चयार्थक है। सुन्दर काव्य-रचना वाणी के सत्कार का फल है—यही तात्पर्य है।

यथा च काव्यं चारु भवति, यथा च चारु कर्तुं ज्ञायते तथाह—

तस्यासारनिरासात्सारग्रहणाच्च चारुणः करणे।
त्रितयमिदं व्याप्रियते शक्तिर्व्युत्पत्तिरभ्यासः ॥ १४ ॥

काव्य सुन्दर कैसे होता है, सुन्दर काव्य की रचना करना कोई कैसे जान सकता है—इसे बताते हैं—

उस सुन्दर (काव्य) की रचना में नीरस (अंश) के त्याग और सरस (अंश) के ग्रहण करने के लिये शक्ति (प्रतिभा), व्युत्पत्ति और अभ्यास-ये तीनों ही वाञ्छित हैं ॥ १४ ॥

तस्येति। तस्य काव्यस्यासारनिरासादसमर्थादिवक्ष्यमाणदोषत्यागात्, तथा सारग्रहणाद्वक्रोक्तिवास्तवाद्यलङ्कारयोगाद्धेतोः, चारुत्वगुणोपेतस्य करणे त्रितयमिदं शक्तिव्युत्पत्त्यभ्यासलक्षणं व्याप्रियते। तस्य तत्र व्यापार इत्यर्थः। तथा च दण्डी—'नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्। अमन्दश्चाभियोगोऽस्याः कारणं काव्यसंपदः॥' तत्र शक्त्या शब्दार्थौ मनसि सन्निधीयेते। तयोः सारासारग्रहणनिरासौ व्युत्पत्त्या क्रियेते। अभ्यासेन शक्तेरुत्कर्ष आधीयत इति शक्त्यादिव्यापारः। असारनिरासात्सारग्रहणादिति च पदद्वयोपादानमुभययोगेन चारुत्वमिति ख्यापनार्थम्। तत्राप्यसारस्य प्रागुपन्यासस्तन्निरासस्य प्राधान्यख्यापनार्थः। सकलालङ्कारयुक्तमपि हि काव्यमेकेनापि दोषेण दुष्येत, अलङ्कृतं वधूवदनं काणेनेव चक्षुषा। उक्तं च [दण्डिना]—'तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथंचन। स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम्' ॥

तस्येति। उस काव्य के असार के त्याग अर्थात् आगे कहे जाने वाले असमर्थादि दोषों के परिहार एवं सार के ग्रहण अर्थात् वक्रोक्ति, वास्तव आदि अलङ्कारों के उपादान के कारण—सौन्दर्यगुणविशिष्ट (काव्य) की रचना में शक्ति, व्युत्पत्ति और अभ्यास रूप—ये तीनों हेतु अभीष्ट हैं। उसका (काव्य का) उन्हीं (शक्ति) में अस्तित्व है। दण्डी ने भी कहा है "इस काव्य-सम्पत्ति के हेतु हैं—सहज प्रतिभा, सुस्पष्ट (छन्द, कोश आदि की) व्युत्पत्ति और अनवरत अभ्यास।" इनमें शक्ति से ही मन में (अभीष्ट) शब्द और अर्थ की सूझ आती है। उन (शब्द और) अर्थ में सरस का ग्रहण और नीरस का परिहार शक्ति के द्वारा किया जाता है। अभ्यास से शक्ति में निखार आती

है—इस प्रकार शक्ति आदि का व्यापार कह दिया गया है। 'असारनिरासात् सारग्रहणात्' इस प्रकार दोनो पदों का उपादान दोनों के योग से ही काव्य में चारुत्व आता है'—यह बताने के लिये किया गया है। वहाँ भी (कारिका) 'असार' पद का प्रथम उपादान 'दोष-परित्याग' के प्राधान्य को सूचित करता है। जिस प्रकार कानी आँख से प्रभूत गहनों से लदी हुई भी वधू की काया दूषित हो जाती है उसी प्रकार सकल अलङ्कारों से युक्त होने पर भी काव्य एक ही दोष से दूषित हो जाता है। दण्डी ने भी कहा है—"अतएव काव्य में रञ्चमात्र भी दोष की उपेक्षा नहीं करनी चाहिये। सुन्दर शरीर भी एक ही श्वेत कुष्ठ से दूषित हो जाता है।'

अथ शक्तिस्वरूपमाह—

मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य।
अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः॥ १५॥

अब शक्ति का स्वरूप बताते हैं—

जिस में शक्ति होती है (उसके) समाहित चित्त में अभिधेय (अर्थ का) सदैव अनेक प्रकार से भान होता है तथा क्लिष्टत्वादि दोषों से शून्य पद (उसे) सदैव सूझते रहते हैं॥ १५॥

मनसीति। असौ शक्तिर्यस्यामविक्षिप्ते चेतसि सदानेकप्रकारस्य वाक्यार्थस्य विस्फुरणम्। यस्यां चाक्लिष्टानि झगित्येवार्थप्रतिपादनसमर्थानि पदानि प्रतिभान्ति। यद्वशाद्धृदयगमौ नानाविधौ शब्दार्थौ प्रतिभासेते सा शक्तिरित्यर्थः॥

मनसीति। उसे शक्ति कहते हैं जिसमें समाहित चित्त होने पर सदा अनेक प्रकार के वाक्यों का विस्फुरण होता रहता है। जिस (शक्ति) में अक्लिष्ट अर्थात् सद्यः अर्थ व्यञ्जक पद भासित होते रहते हैं। जिस के कारण मनोहारी शब्द और अर्थ भासित होते रहते हैं उसे शक्ति जानना चाहिये॥

अस्या एव भेदानाह—

प्रतिभेत्यपरैरुदिता सहजोत्पाद्या च सा द्विधा भवति।
पुंसा सह जातत्वादनयोस्तु ज्यायसी सहजा॥ १६॥

इसी शक्ति के ही भेद बताते हैं—

(दण्डी आदि) अन्य आलङ्कारिकों ने इसे प्रतिभा कहा है, सहज और उत्पाद्य के भेद से वह दो प्रकार की होती है, जन्म से उत्पन्न होने के कारण इन दोनों में सहज (प्रतिभा) प्रशस्यतर है॥ १६॥

प्रतिभेति। एषा च शक्तिरपरैर्दण्डिमुख्यैः प्रतिभेत्युक्ता। सा च द्विधा भवति। कथम्। सहजोत्पाद्या चेति। तयोश्च मध्यात्सहजा ज्यायसी प्रशस्यतरा। पुंसा सहोत्पन्नत्वात्॥

प्रतिभेति। इस शक्ति को दण्डी आदि ने प्रतिभा कहा है। वह दो प्रकार की होती है। कैसे? सहज और उत्पाद्य। इनमें सहज प्रतिभा प्रशस्यतर है। जन्म से ही सिद्ध होने के कारण।

यदि नाम पुंसा सहोत्पन्ना किमित्येतावता ज्यायसीत्याह—

स्वस्यासौ संस्कारे परमपरं मृगयते यतो हेतुम्।

उत्पाद्या तु कथंचिद्व्युत्पत्त्या जन्यते परया॥ १७॥

यदि जन्म से उत्पन्न होती है क्या इतने से ही प्रशस्यतर होती है—इसका उत्तर देते हैं—

यह (सहज शक्ति) अपने संस्कार के लिये चूँकि अभ्यास की अपेक्षा रखती है (इसलिये प्रशस्यतर होती है)। अर्जित शक्ति तो बड़े कष्ट से दूसरी व्युत्पत्ति से उत्पन्न होती है॥ १७॥

स्वस्येति। असौ सहजा शक्तिः स्वस्यात्मनः संस्कारे उत्कर्ष एव परं केवलम्। अविद्यमानः परोऽन्यो यस्मादसावपरोऽभ्यासस्तं यतो मृगयतेऽन्वेषयति नोत्पत्तावतो ज्यायसी। उत्पत्तौ तु सहजातत्वमेव हेतुः। उत्पाद्या तु व्युत्पत्त्या परयानन्तरया कथंचिन्महता कष्टेन जन्यते। अतो न ज्यायसी सा॥

स्वस्येति। अपना संस्कार या जन्मतः स्थिति ही जिसका एकमात्र उत्कर्ष है उसे सहज शक्ति कहते हैं। जिसके लिये कोई पृथक् हेतु नहीं है और अभ्यास मात्र हेतु की अपेक्षा रखती है, उत्पत्ति की जहाँ अपेक्षा नहीं रहती, ऐसी (यह सहज शक्ति) प्रशस्यतर होती है। (इस सहज शक्ति में) जन्मना सिद्ध होना ही एकमात्र हेतु है। उत्पाद्य शक्ति अवान्तर काल में (किये गये अध्ययन आदि के द्वारा) प्राप्त व्युत्पत्तिरूपी अन्य हेतु से बड़े क्लेश से उपलब्ध होती है॥

इदानीं व्युत्पत्तिस्वरूपमाह—

छन्दोव्याकरणकलालोकस्थितिपदपदार्थविज्ञानात्।

युक्तायुक्तविवेको व्युत्पत्तिरियं समासेन॥ १८॥

अब व्युत्पत्ति का स्वरूप बताते हैं—

छन्दः शास्त्र, व्याकरण, नृत्यशास्त्र, लोकशास्त्र, नाममाला, कोश आदि के सम्यक् अध्ययन से उचित और अनुचित का विवेक—संक्षेप में इसे व्युत्पत्ति कहते हैं॥ १८॥

छन्द इति । छन्दो जयदेवादि, व्याकरणं पाणिन्यादि, कला नृत्यादिविषयभरतादिप्रणीतशास्त्राणि, लोकाः स्वःप्रभृतयस्तेषु चराचरादिस्वरूपनियम. स्थिति', पदानि नाममालापठिता' पर्यायशब्दा', पदार्थस्तेषामेव पदानामभिधेयार्थविषयप्रवृत्तिनैयत्यम् । एतेषां षण्णां छन्द प्रभृतीना विज्ञानाद्विशिष्टावगमाद्धेतोर्यो युक्तायुक्तविवेक उचितानुचितत्वपरिज्ञानम् । यथात्रेद छन्द उचितमनुचितं वेत्यादि सर्वेषु द्रष्टव्यम् । व्युत्पत्तिरियम् । समासेन सक्षेपेण ॥

छन्द इति । जयदेव आदि के द्वारा प्रणीत छन्दः शास्त्र, पाणिनि आदि के द्वारा प्रणीत व्याकरण शास्त्र, नृत्य आदि पर भरत आदि से लिखे गये (नाट्य) शास्त्र, स्व. आदि लोकों मे स्थावर, जङ्गम के स्वरूप के ज्ञान लोक-शास्त्र, नाममाला में पठित पर्यायवाची पद, उन्हीं पदो के अभिधेय अर्थ मे प्रयुक्त होने के विषय की निश्चितता—इन उक्त छन्द आदि षट्शास्त्रो के विशेष ज्ञान से उत्पन्न उचित और अनुचित का विचार-सक्षेप में व्युत्पत्ति कहे जाते है, जैसे यहाँ इस छन्द का प्रयोग उचित है अथवा अनुचित है ॥

तर्हि विस्तरव्युत्पत्तेः किं स्वरूपमित्याह—

विस्तरतस्तु किमन्यत्तत इह वाच्यं न वाचकं लोके ।
न भवति यत्काव्याङ्गं सर्वज्ञत्वं ततोऽन्यैषा ॥ १९ ॥

तो विस्तर व्युत्पत्ति का क्या स्वरूप है—इसे बताते हैं—

विस्तारपूर्वक, उस (काव्य) से पृथक् इस लोक में क्या है, ऐसा कोई वाच्य (अर्थ) अथवा वाचक (शब्द) नहीं है जो काव्य का अङ्ग न बन सके । अत. सर्वज्ञता दूसरी व्युत्पत्ति है ॥ १९ ॥

विस्तरत इति । व्युत्पत्तिसंबन्धिनो विस्तारात्किमन्यद्विद्यते यदन्तःपाति न भवति । कुत इत्याह—यस्मादिह लोके न तद्वाच्यमभिधेयमस्ति, न वाचकः शब्दो विद्यते यत्काव्याङ्गं काव्योपकरणं न भवतीति । ततो हेतोरेषान्या विस्तृता व्युत्पत्ति. । ततः सक्षेपाद्वा सकाशात् । अन्येति द्वितीया । सर्वज्ञत्वमेव विस्तीर्णा व्युत्पत्तिरित्यर्थः । उक्तं च—'न स शब्दो न तद्वाच्यं न स न्यायो न सा कला । जायते यन्न काव्याङ्गमहो भारो महान्कवेः ॥' अभ्यासो लोकप्रसिद्ध एव ॥

विस्तरत इति । विस्तर व्युत्पत्ति से पृथक् क्या है जिसका अन्तर्भाव काव्य में नहीं हो सकता । कुत इत्याह—क्यों कि ऐसा कोई वाच्य वाचक नहीं है जो काव्य का अङ्ग न बने अथवा जिसका काव्य-रचना में उपयोग न हो सके । इसी लिये (यह) विस्तर-व्युत्पत्ति समास व्युत्पत्ति से भिन्न है । 'ततः' अर्थात् समास-

व्युत्पत्ति से। 'अन्या' अर्थात् भिन्न। सर्वतत्त्व ही विस्तर-व्युत्पत्ति है। कहा भी गया है—"ऐसा कोई शब्द नहीं है, अर्थ नहीं है, न्याय नहीं है एवं कला नहीं है जो काव्य का अङ्ग न हो सके। आश्चर्य है कि कवि का भार कितना गुरुतर है। अभ्यास तो लोकप्रसिद्ध है ही।

केवलं तस्य स्थाननियमं कर्तुमाह—

अधिगतसकलज्ञेयः सुकवेः सुजनस्य संनिधौ नियतम् ।
नक्तंदिनमभ्यस्येदभियुक्तः शक्तिमान्काव्यम् ॥ २० ॥

नियमानुसार केवल उसका स्थान प्रदर्शित करने के लिये कहते हैं—ज्ञातव्य सभी बातों को जानकर प्रतिभासपन्न सज्जन सुकवि के चरणों में बैठकर निरन्तर रातों दिन अभिनिवेशपूर्वक काव्य-रचना का अभ्यास करे॥ २०॥

अधिगतेति। वाक्यार्थः सुगमः। अत्राह—ननु यद्यधिगतसकलज्ञेयः शक्तिमांश्च तत्किं सुजनस्य सुकवेः संनिधानेऽभ्यस्यति। सत्यम्। छन्दोव्याकरणादिविषयलक्षणातिरिक्तमन्यदपि ज्ञेयं जानाति। यन्महाकविलक्ष्येषु दृश्यते। सुजनत्वाच्च निर्मत्सरो भूत्वा सर्वमसौ दर्शयति। तथाहि। छन्दःसि पिङ्गलजयदेवाद्यनुक्तान्यपि वृत्तानि सुकविकाव्येषु दृश्यन्ते बहुशः। यथा माघस्य—'कृतसकलजगद्विबोधो विधूतान्धकारोदय, क्षपितकुमुदतारकश्रीर्वियोग नयन्कामिन। गुरुतरगुणदर्शनादभ्युपेतात्पदोष. कृती, तव वरद करोतु सुप्रातमह्नामय नायक॥' तथा भारवेः—'इह दुरधिगमैः किंचिदेवागमैः सततमसुतरं वर्णयन्त्यन्तरम्। अमुमतिविपिनं वेद दिग्व्यापिनं पुरुषमिव परं पद्मयोनिं परम्॥' एवमन्येषामपि सन्ति। तथा व्याकरणे 'चर्वेष्टि-अजघा-सस्ति-दृद्रिश्रेहि-ईर्सति-जिह्वायकयिर्पति-अङ्डिपतो'त्येवमादीनि पदानि न प्रयोज्यानि। काव्यस्य माधुर्यलालित्यविनाशप्रसङ्गात्। तथा क्षपि-मिलि-अर्थि-चचिलतिप्रभृतयो धातवो धातुगणेषु पठिता अपि। सहेश्च परस्मैपद प्रयोगदर्शनात्प्रयोक्तव्यम्। पदविषय च यथा पक्ष्मशब्दोऽक्षिरोमस्वभिधानेषु पठितोऽन्यत्रापि दृश्यते। यथा माघस्य—'निसर्गचित्रोज्ज्वलसूक्ष्मपक्ष्मणा' इति। एवमन्यदपि कलादिविषये द्रष्टव्यम्। यत्सुजनकविसंनिधानाज्ज्ञेयम्। नियतमित्यनेन सुकविसंनिधाम एवाभ्यासः कार्य इति नियम इति। नक्तंदिनमित्यनेन तु यदैव पट्वी बुद्धिः क्षणश्च भवति तदैवाभ्यस्येत्, न पुनर्यथा कैश्चिदुक्तम् 'पश्चाद्रात्रे एव' इति तु कवेः काव्यकरणेऽत्यन्तादराधानार्थम्॥

अधिगतेति। वाक्य का अर्थ सुस्पष्ट है। यहाँ बताते हैं—यदि ज्ञातव्य

सभी बातों का अध्ययन कर चुका है और प्रतिभासम्पन्न भी है तो फिर सज्जन सुकवि के संपर्क में क्यों अभ्यास करेगा? ठीक है। (सज्जन सुकवि के सम्पर्क में) छन्द, व्याकरण आदि विषयों के अतिरिक्त भी तो जानता है जो महाकवियों द्वारा प्रणीत महाकाव्यों में उपलब्ध होता है। वह सुजन होने के कारण बिना किसी द्वेष के इस (अभ्यास करने वाले) को सब कुछ प्रत्यक्ष दिखला देता है। क्यों कि ऐसे सुकवियों के काव्य में ऐसे भी छन्द उपलब्ध होते हैं जो छन्द-शास्त्र में जयदेव आदि के द्वारा नहीं प्रोक्त हैं। जैसे माघ का (महामालिनी छन्द) "सकल संसार को जगाने वाला, अन्धकार के उदय को दूर करनेवाला, कुमुद और तारों की कान्ति को मलिन करनेवाला कामियों को वियुक्त करनेवाला प्रचुर गुणों के प्रलक्ष होने के कारण जिसका (कलङ्करूप) दोष तुच्छ हो गया है (वह) पुण्यात्मा चन्द्रमा तुम्हारे लिये प्रकाशमय प्रभात करे॥ तथा भारवि का—जहाँ बड़े कष्ट से शेष पुराणों के द्वारा अन्तर का निलय बड़े कष्ट से वर्णन करते हैं। अत्यन्त गहन दिशाओं में व्याप्त इसे परम पुरुष के समान केवल ब्रह्मा ही जानते हैं। इसी प्रकार अन्य काव्यों में भी (अनुक्त) वृत्त पाये जाते हैं। इसी प्रकार वर्वर्टि आदि यद्यपि व्याकरण शास्त्र में प्रोक्त हैं तथापि उनका प्रयोग नहीं करना चाहिये। क्यों कि (प्रयोग करने पर) तो काव्य का माधुर्य और शालित्य नष्ट हो जायगा। इसी प्रकार क्षपि आदि धातुगण में पठित है किन्तु इनका भी (प्रयोग नहीं करना चाहिये)। 'सद' धातु (व्याकरण शास्त्र के द्वारा प्रयोग अनुमत न होने पर भी) प्रयोग करना चाहिये क्यों कि ऐसा प्रयोग मिलता है। 'पक्ष्म' पद 'अक्षिरोम' के अर्थ में पठित है किन्तु उसका अन्य अर्थों में भी प्रयोग हुआ है। माघ ने 'निसर्ग'— आदि। 'स्वभाव से ही उज्ज्वल सूक्ष्म पक्ष्म वाले'। इसी प्रकार कला आदि के विषय में भी देखा जा सकता है जिसका ज्ञान सुकवि के साथ सहवास से ही हो सकता है। सदैव 'सुकवि के ही संनिधान में अभ्यास करना चाहिये' यह नियत पद का अर्थ है। 'नक्तं दिन' का तात्पर्य है कि जब भी समय मिले और बुद्धि तीक्ष्ण हो तभी अभ्यास करना चाहिये। जैसा किसी ने कहा है कि रात्रि के पश्चाद् भाग में ही अभ्यास करना चाहिये ऐसा नहीं करना चाहिये। इस प्रकार कवि को काव्य-रचना के प्रति व्यसनी और (उसके लिये) समाहितचेता होने का व्याख्यान किया गया॥

पुनः काव्यस्य प्रयोजनान्तरमाह—

स्फारस्फुरदुरुमहिमा हिमधवलं सकललोककमनीयम्।
कल्पान्तस्थायि यशः प्राप्नोति महाकविः काव्यात्॥२१॥

आगे काव्य के अन्य प्रयोजन बताते हैं—

निरन्तर बढ़ती हुयी विस्तीर्ण महिमा को फैलाता हुआ, महाकवि युग के अन्त तक स्थिर रहने वाले, हिम के समान शुभ्र, रमणीय यश को काव्य से प्राप्त करता है ॥ २१ ॥

स्फार इति। स्फारो दृढ, स्फुरञ्जनमन सु प्रसरन्, अत एवोरुर्विस्तीर्णो महिमा यस्य कवे स। तथा यशः कीदृशम्। हिमधवलमित्यादि सुगमम् ॥

स्फार इति। 'स्फार' का अर्थ है दृढ। 'स्फुरन्' अर्थात् लोगों के मन में फैलता हुआ, इस प्रकार जिसका प्रभूत यश हो गया है वह। किस प्रकार का यश—जो हिम के समान शुभ्र होता है। स्पष्ट है ॥

ननु काव्यादेवविधयशोभवने प्रमाणाभावादेवगृहादिकमेव कारयितव्यमित्येतन्निरस्यन्दृष्टान्तपुरःसर काव्यकरणे यत्नोपदेशमाह—

अमरसदनादिभ्यो भूता न कीर्तिरनश्वरी
भवति यदमी भूयद्वापि प्रणश्यति तत्क्षये।
तदलममलं कर्तुं काव्यं यतेत समाहितो
जगति सकले व्यासादीनां विलोक्य परं यशः ॥२२॥

काव्य से इस प्रकार के यश फैलने में प्रमाण के अभाव के कारण मन्दिर आदि ही बनवाना चाहिये—इस बात का सोदाहरण खण्डन करते हुये काव्य-रचना में प्रयत्नशील होने का उपदेश देते हैं—

'मन्दिर आदि से (किसी की) अमरत्व कीर्ति नहीं हुयी। यह बहुत अधिक होने पर भी उनके नष्ट हो जाने पर नष्ट हो जाती है। इस लिये सकल संसार में व्यास आदि के प्रभूत यश को देखकर समाहितचित्त होकर निर्मल काव्य की रचना करने के लिये चिर प्रयत्न करना चाहिये' ॥ २२ ॥

अमर इति। सुगमम्। तस्मात्स्थितमेतत्कवे काव्यकरणादेव परं यशो भवतीति। उक्त च—'यत. क्षणध्वंसिनि संभवेऽस्मिन्काव्यादृतेऽन्यत्क्षयमेति सर्वम्। अतो महद्भिर्यशसे चिराय प्रवर्तित. काव्यकथाप्रसङ्गः' ॥

अमर इति। इस प्रकार स्पष्ट है कि काव्य-रचना से ही कवि का प्रभूत यश फैलता है। कहा भी गया है—'चूँकि क्षणनश्वर इस संसार में काव्य के अतिरिक्त सब कुछ नष्ट हो जाता है अतएव महा (कवियों) ने चिरयश के लिए काव्य-कथा के मार्ग का प्रवर्तन किया' ॥

इति श्रीरुद्रटकृते काव्यालंकारे प्रथमोऽध्याय. समाप्तः

द्वितीयोऽध्यायः

शास्त्रस्य काव्यकरणस्य च प्रयोजनमाख्यायेदानीं काव्यलक्षणं पृष्टः सन्नाह—

ननु शब्दार्थौ काव्यं शब्दस्तत्रार्थवाननेकविधः ।
वर्णानां समुदायः स च भिन्नः पञ्चधा भवति ॥ १ ॥

शास्त्र और काव्यरचना का प्रयोजन बताकर अब काव्य-लक्षण का स्वयं तर्क करके उत्तर देते हैं—

शब्द और अर्थ (दोनों मिलकर ही) काव्य हैं, उनमें शब्द अर्थवान् और अनेक प्रकार का होता है। वह वर्णों का समुदाय होता है तथा उसके पाँच भेद होते हैं ॥ १ ॥

नन्विति । ननुशब्दः पृष्टप्रतिवचने । यथा 'अपि त्वं कटं करिष्यसि । ननु भोः करोमि' इति । शब्दश्चार्थश्च तौ काव्यमुच्यते । कवेः कर्माभिप्रायो वेति शब्दार्थः । कवेः काव्योपयोगिनोः शब्दार्थयोरन्योन्याव्यभिचारादेकतरोपादानेनैव द्वितीये लब्धे द्वितीयोपादानं काव्ये द्वयस्यापि प्राधान्यख्यापनार्थम् । अन्यथा हि शब्दार्थयोरेकतरोपादानेऽन्यतरस्यालङ्कारविरहितमपि दोषैश्च युक्तमपि काव्यं साधु स्यात् । अद्वयोपादाने न तुल्यकक्षतया शब्दार्थौ द्वावपि काव्यत्वेनाङ्गीकृतौ भवतः । द्वयमेतत्समुदितमेव काव्यं भवतीति तात्पर्यम् । शब्दार्थौ काव्यमित्युक्तम्, अथ शब्दः किमुच्यत इत्याह—शब्दस्तत्रार्थवाननेकविधो वर्णानां समुदाय इति । तत्रेति शब्दार्थयोर्मध्यात् । शब्दोऽर्थवान् । साभिधेयोऽनेकविधोऽर्थवानिति स्वरूपविशेषणमात्रम् । यथा । कीदृशः शक्रः । वज्री सहस्राक्ष इति । न तु व्यवच्छेदकम् । काव्यलक्षणाख्यानेनैव निरर्थकस्य निरस्तत्वात् । कीदृशः शब्दः । वर्णानामकारादीनां समुदायः । वर्णानामिति बहुवचनमतन्त्रम् । तेनैकवर्णो द्विवर्णश्च शब्दः सिद्धो भवति । सोऽपि सम्भवन् कियद्भेद इत्याह—अनेकविधः । तद्यथा । कश्चिद्व्यक्तैकार्थावयवः यथा घट इति । अत्र हि घकारादयो वर्णा व्यक्ताः प्रकटाः सम्भूय कुम्भाख्यमेकमर्थमाहुः । कश्चिद्व्यक्तपृथगर्थावयवः । यथा एति पचतीति वा । अत्र हि एकारादयो वर्णा व्यक्ताः पृथगर्थाश्च । तथापि हि धातुना क्रियाभिधीयते प्रत्ययेन तु कर्ता । कश्चिदव्यक्तैका-

र्थावयव । यथा सपदादित्वात्तिपि कृते 'अवनं ऊ' इति पदम् । अत्र त्वकारवकारौ कृतादेशौ क्षीरनीरवदेकीभूतावयनक्रियामेकमेवार्थमाहतुः । कश्चिदव्यक्तपृथगर्थावयव । यथा 'ऐ' इति क्रियापदम् । अत्र हि आकारैकारौ पूर्ववदेकीभूतौ सकारश्च कृतादेशत्वादव्यक्तीभूतः पृथगर्थश्च । यत ऐकार आगतिक्रियामाह, सकारो युष्मदर्थं कर्तारमेकत्वं चेति चतुर्भेदत्वादनेकविधत्वम् । यदि वा द्रव्यजातिक्रियागुणवाचित्वेन चातुर्विध्यम् । अन्ये तु पदद्वयमागमवक्रोक्त्याद्यलङ्कारभेदेन शब्दस्यानेकविधत्वमाहु । यदि पुन पञ्चधेत्युत्तरपदापेक्षयानेकविधत्वमुच्यते तदा पञ्चधेत्यनर्थकं स्यात् । अनेनैवोक्तार्थत्वादिति । तं चैवरूपं शब्द केचित्पाणिन्यादय सुप्तिङन्तरूपतया द्विभेदमाहु केचिच्चतुर्धेति । तद्द्वय निरसितुमाह—स च भिन्न पञ्चधा भवतीति । स चेति चकार पुनरर्थे ततश्चायमर्थ । स पुनर्वर्णसमुदायात्मकः शब्दो भिन्नो भेदेन व्यवस्थापित सन्पञ्चधा भवति । ते पुन. प्रकारा नामाख्यातनिपातोपसर्गकर्मप्रवचनीयलक्षणा पुरो भङ्ग्यन्तरेण वक्ष्यन्ते ॥

नन्विति । ननु शब्द पूर्वपक्ष का उपस्थान करता है । जैसे 'क्या तुम चटाई बनाओगे ? हाँ बनाऊँगा । (यहाँ ननु पद पूर्व पक्ष के उत्तर के लिये प्रयुक्त हुआ है) । शब्द और अर्थ—ये दोनों काव्य कहे जाते हैं । कवि का कर्म अथवा अभिप्राय (काव्य) शब्द या अर्थ है । काव्य के लिये उपयोगी शब्द और अर्थ दोनों में से किसी एक के व्यभिचार होने के कारण किसी एक का उपादान करने पर दूसरे की भी सत्ता अनिवार्य होने के कारण कवि के काव्य के लिये शब्द के साथ अर्थ का भी कथन दोनों की प्रधानता सूचित करने के लिये किया गया है । यदि दोनों की प्रधानता न होती तो (शब्द और अर्थ) दोनों में से किसी एक का ही उपादान कर लेने पर दूसरे के अलङ्कार से शून्य दोष से युक्त होने पर काव्य कुकाव्य हो जाता (परन्तु ऐसा नहीं है) । यदि दोनों का उपादान न करते तो शब्द और अर्थ दोनों ही समान रूप से काव्य के निर्धारक न स्वीकृत हो सकते । ये दोनो (शब्द और अर्थ) मिलकर ही काव्य है—यह तात्पर्य है । 'शब्दार्थौ काव्यम्' यह तो (लक्षण) में कह दिया गया अब शब्द क्या है इसे बताते हैं—उसमें वर्णों का समुदाय रूप शब्द अर्थवान् और अनेक प्रकार का होता है । 'तत्र' का अर्थ है शब्द और अर्थ में । शब्द अर्थवान् (होता है) । अभिधेय से युक्त होना, अनेक भेदों वाला होना तथा अर्थवान् होना—ये स्वरूपोपपादक विशेषण मात्र है जैसे जिस प्रकार का शक 'वज्र' है (जिसके हाथ में) (तथा) हजार नेत्र हैं जिसके (यहाँ विशेषण वस्तु—स्वरूप के प्रतिपादक हैं) व्यवच्छेदक नहीं । क्यों कि काव्य-स्वरूप के कथन से

ही निःसारत्व का परिहार हो जाता है। वर्णों का अकार आदि का समुदाय। 'वर्णानाम्' में बहुवचन का नियम शिथिल है (अर्थात् शब्द एक वर्ण और दो वर्णों का भी हो सकता है)। पुनः उस संभव शब्द के कितने भेद होते हैं—इसे बताते हैं—कोई शब्द व्यक्तैकार्थविषय होता है, जैसे घट। यहाँ घकार आदि वर्ण प्रकट होकर घटरूप एक अर्थ का अभिधान करते हैं। कोई शब्द व्यक्त-पृथगर्थविषय होता है; जैसे 'पति' अथवा 'पचति'। यहाँ पकार आदि वर्ण व्यक्त है और अर्थ भिन्न-भिन्न है। फिर भी धातु से क्रिया का अभिधान होता है और प्रत्यय से कर्ता का। कोई शब्द अव्यक्तैकार्थविषय होता है; कोई शब्द अव्यक्त-पृथगर्थविषय होता है; जैसे, 'ऐः' यह क्रिया पद। यहाँ आकार और ऐकार पहले की ही भाँति एक हो गये और सकार का आदेश क्योंकि ऐकार आगति क्रिया का अभिधान करता है और सकार युष्मदर्थक कर्ता के एकत्व का। (शब्द) के चार भेद होने के कारण (उसका) अनेकविधत्व सिद्ध है। अथवा द्रव्य, जाति, क्रिया और गुण के भेद से (शब्द) चार प्रकार का होता है। कुछ लोग आगे कहे जाने वाले वक्रोक्ति आदि अलङ्कारों के भेद से शब्द को अनेक प्रकार का बताते हैं, और यदि (कारिका के) उत्तरार्ध में प्रयुक्त 'पञ्चधा' के कारण (शब्द का) अनेकविधत्व माना जाय तो पञ्चधा का प्रयोग व्यर्थ हो जायगा। क्यों कि 'पञ्चधा' पद से ही (शब्द का पञ्चविधत्व) उक्त है। इस प्रकार के शब्द को पाणिनि आदि कुछ लोग सुबन्त और तिङन्त के भेद से शब्द को दो प्रकार का मानते हैं और (पतञ्जलि आदि) कुछ लोग (जाति, गुण, क्रिया और द्रव्य के भेद से) चार प्रकार का मानते हैं। उक्त दोनों ही मतों का खण्डन करने के लिये कहते हैं—भेद से स्थिर करने पर यह (शब्द) पाँच प्रकार का होता है। (कारिका में) 'स च' के साथ प्रयुक्त चकार 'पुनः' के अर्थ में आया है। तब यह अर्थ होगा—यह पुनः वर्णसमुदायात्मक शब्दभेद से व्यवस्थापित करने पर पाँच प्रकार का होता है। वे भेद आगे—नाम, आख्यात (क्रिया), निपात, उपसर्ग कर्मप्रवचनीय भेद से ग्रन्थान्तर से पाँच प्रकार के बताये जायेंगे।

अथ ये चतुर्धेत्याहुस्तेषामव्याप्तिदोषं प्रचिकटयिषुराह—

नामाख्यातनिपाता उपसर्गाश्चेति संमतं येषाम्।
तैरुक्ता न भवेयुस्तैः कर्मप्रवचनीयास्तु ॥ २ ॥

अब शब्द के चार भेद मानने वालों के पक्ष में अव्याप्ति दोष दिखाते हुये कहते हैं—

नाम, आख्यात (क्रिया), निपात और उपसर्ग—ऐसा जिनका स्थिर मत है उन्हें उन लोगों ने कर्मप्रवचनीय शब्दों की गणना ही नहीं करायी ॥ २ ॥

नामेति । वस्तुवाचि पदं नाम । क्रियाप्रधानं तिङन्तमाख्यातम् । नामाख्यातयोः समुच्चयाद्यर्थद्योतनिमित्तं निपाताः । क्रियाविशेषप्रतिनियमनमुपसर्गाः । चशब्द एवार्थे । इति परिसमाप्तौ । एत एव चत्वारः शब्दविधा इति येषां सम्यङ् मतं तत्र तेषु नामादिषु मध्ये तैर्मेधाविरुद्रप्रभृतिभिः कर्मप्रवचनीया नोक्ता भवेयुः । तुरवधारणे भिन्नक्रम । सप्तमी संभावने नैव नगृहीता भवन्तीति समावयामि । यतस्तैरुपसर्गेष्वन्तर्भावः कृतः स चायुक्तः । विद्यते ह्युपसर्गेभ्यो नामादीनामिव कर्मप्रवचनीयानामपि पृथग्व्यापारभेदः । तथाहि—'वृक्षमभिविद्योतते विद्युत्' इति विद्युद्वृक्षयोर्लक्षणलक्षणभावसम्बन्धोऽभिना द्योत्यते । उपसर्गेण तु क्रियाविशेषार्थाभिव्यक्तिरेव क्रियते । तथा कार्यभेदोऽपि तेषां दृश्यते । यथा षत्वणत्वादिकार्यस्योपसर्गा एव निमित्तम् । द्विर्वचनादिकस्य तु कर्मप्रवचनीया एवेति । तथा प्रयोगोऽप्युपसर्गाणां नियत एव प्राग्धातोः, न तु कर्मप्रवचनीयानामिति कथमेषामुपसर्गेष्वन्तर्भाव । नन्वव्ययानि स्वरादीनि भेदान्तरं विद्यत इति कथं षोढा न स्यादित्युक्तम् । स्वरादीनां स्वर्गादिसत्त्वभूतार्थवाचकत्वेन नामस्वेवान्तर्भावात् । यद्वा तेषामव्ययानि निपात एवेति निपातग्रहणेन तेषां संग्रहः । गत्योऽप्युपसर्गा एवेति पञ्चधा शब्द इति स्थितम् ॥

नामेति । वस्तु के वाचक पद को नाम कहते है, क्रिया प्रधान तिङन्त को आख्यात तथा नाम और आख्यात में समुच्चय आदि अर्थों के द्योतक कारणों को निपात कहते हैं । क्रिया के अर्थ में वैशिष्ट्य लाने वाले हेतु उपसर्ग कहे जाते हैं । (कारिका में) 'च' शब्द 'एव' के अर्थ में आया है 'इति' परिसमाप्ति के अर्थ में । शब्द के इतने चार भेद हैं। बताने वाले मेधावि रुद्र आदि ने इन (नाम आदि) में कर्मप्रवचनीय (शब्दों की) गणना ही नहीं की । 'तु' अवधारण अर्थ में भिन्न क्रम से आया है (तथा) 'तत्र' में सप्तमी का प्रयोग संभावना अर्थ में किया गया है । (इन नाम आदि में) कर्मप्रवचनीय का ग्रहण नहीं होता ऐसी संभावना करता हूँ । क्योंकि उन्होंने (कर्मप्रवचनीय को) उपसर्ग में अन्तर्भावित करके ठीक नहीं किया । क्योंकि वृक्ष पर बिजली चमकती है, बिजली और वृक्ष में लक्ष्यलक्षण सम्बन्ध 'अभि' से द्योतित किया गया है, उपसर्ग से तो क्रिया के अर्थ में ही वैशिष्ट्य का प्रतिपादन किया जाता है । इनके अतिरिक्त (कर्मप्रवचनीय और उपसर्ग) शब्दों के कार्य में भी भेद है । क्योंकि 'षत्व' 'णत्व' आदि कार्यों के उपसर्ग ही निमित्त होते हैं; द्विवचन आदि के निमित्त कर्मप्रवचनीय ही होते हैं (उपसर्ग

नहीं)। इसके अतिरिक्त भी उपसर्गों का प्रयोग धातु के पूर्व निश्चित है कर्मप्रवचनीय का नहीं। फिर कर्मप्रवचनीय का उपसर्ग में कैसे अन्तर्भाव हो सकता है? अव्यय और स्वः आदि अन्य भेद भी पाये ही जाते हैं, फिर शब्द को छः प्रकार का क्यों नहीं मान सकते—इसका उत्तर देते हैं। 'स्वः' आदि का स्वर्ग रूप अर्थ विशिष्ट के वाचक होने के कारण नाम में ही (उनका) अन्तर्भाव हो जायगा। अथवा निरुक्तकारों का अव्यय निपात ही है अतएव निपात का कथन कर देने से अव्यय का भी उनमें समाहार हो गया। गति भी उपसर्ग ही है—इस प्रकार शब्द का पञ्चविधत्व निश्चित हो गया।

ननु तथाप्युपगुराजपुरुषादयः शब्द-समुदाया व्यतिरिक्ता विद्यन्त इति कथमुक्तं पञ्चधेत्याशङ्क्याह—

नाम्नां वृत्तिर्द्वेधा भवति समासासमासभेदेन ।

वृत्तेः समासवत्यास्तत्र स्यू रीतयस्तिस्रः ॥ ३ ॥

'उपगु' 'राजपुरुष' आदि शब्द-समुदाय पृथक् ही हैं—फिर शब्द को पाँच ही प्रकार का क्यों कहा—इस शङ्का का उत्तर देते हैं—

नामों की वृत्ति समस्त और असमस्त भेद से दो प्रकार की होती है। समास से युक्त वृत्ति की तीन रीतियाँ होती हैं ॥ ३ ॥

नाम्नामिति। नाम्नां वृत्तिर्वर्तनं द्वेधा, समासवत्यसमासवती चेति। तयोरपि प्रकारविशेषमाह—तत्र तयोर्वृत्त्योर्मध्यात्समासवत्या वृत्तेस्तिस्रो रीतयो भवन्ति। रीतिर्भङ्गिर्विच्छित्तिरिति पर्यायाः॥

नाम्नामिति। नामों की वृत्ति (वर्तन) दो प्रकार की होती है—समासवती और असमासवती। उनमें भी विशेष भेद बताते हैं—उन दोनों वृत्तियों में से समासवती वृत्ति की तीन रीतियाँ होती हैं। रीति, भङ्गि, विच्छित्ति आदि पर्याय हैं।

कास्ता इत्याह—

पाञ्चाली लाटीया गौडीया चेति नामतोऽभिहिताः ।

लघुमध्यायतविरचनसमासभेदादिमास्तत्र ॥ ४ ॥

वे कौन-सी हैं—इसे बताते हैं—

पाञ्चाली, लाटीया और गौडीया—इस नाम से कही गयी हैं। लघु, मध्यम और समासभूयस्त्व (उनकी) रचना में भेदक तत्त्व हैं ॥ ४ ॥

पाञ्चालीति। चः समुच्चये। इति समाप्तौ। एतास्तिस्र एवेत्यर्थः। नामत इत्यनेन नाममात्रमेतदिति कथयति। न पुनः पञ्चालेषु भवा इत्यादि व्युत्पत्तिः। अतिप्रसङ्गात्। तर्हि केन विशेषेण तिस्र इत्याह—

लघुमध्येत्यादि। लघु मध्यमायतं च विरचनं यस्य समासस्य तद्भेदात्। तत्रेन्युत्तरत्र योज्यते॥

पाञ्चालीति। 'च' समुच्चय अर्थ में प्रयुक्त है और इति समाप्ति अर्थ में। ये (रीतियाँ) तीन ही हैं—यह अर्थ है। 'नामतः' पद का तात्पर्य है कि यह उनका नाममात्र बताया जा रहा है। 'पञ्चालेषु भवा' इत्यादि व्युत्पत्ति से (तत्र भवः। ४।३।५३) से नहीं। क्योंकि (ऐसा करने पर) अतिप्रसङ्ग आ जायगा। तो फिर किस वैशिष्ट्य को दृष्टि में रखकर तीन ही कहा—लघु, मध्य (समास) इत्यादि की दृष्टि से। स्वल्प, मध्यम और अत्यधिक रचना है समास की जहाँ इस भेद से। (कारिका में आये हुए) 'तत्र' का अन्वय पञ्चम कारिका के साथ होगा।

अनियमे प्राप्ते नियमार्थमाह—

> द्वित्रिपदा पाञ्चाली लाटीया पञ्च सप्त वा यावत्।
> शब्दाः समासवन्तो भवति यथाशक्ति गौडीया॥ ५॥

(स्वल्प आदि ये) नियम न होने के कारण नियम बताते हैं—पाञ्चाली में दो या तीन पद समस्त होते हैं, लाटीया में पाँच या सात तथा गौडीया में (कवि) अपनी शक्ति भर पदों को समस्त करता है॥ ५॥

द्वित्रिपदेति द्वे त्रीणि वा यस्या पदानि। द्वित्रिग्रहणस्योपलक्षणार्थत्वाच्चत्वारि वा समासवन्ति यस्यां सा पाञ्चाली रीतिर्भवति। यस्या तु द्वितयादारभ्य पञ्च सप्त वा यावत्सा लाटीया। पञ्च सप्त वेति मतद्वय तदुभयं संगृहीतम् यस्या तु समासवन्तः शब्दा अष्टभ्य आरभ्य यथाशक्ति भवन्ति। यावत कर्तुं शक्नोति तावन्त इत्यर्थः। सा गौडीया॥

द्वित्रिपदेति। जिसमें दो या तीन पद होते हैं। द्वि का ग्रहण उपलक्षण अर्थ में प्रयोग, जिसमें चार तक पद समस्त हों उसे पाञ्चाली रीति कहते हैं, यह तात्पर्य है।

जिसमें दो से लेकर पाँच या सात तक पद होते हैं उसे लाटीया (कहते हैं)। पाँच या सात यहाँ दोनों ही अभिमत हैं। जहाँ आठ से लेकर यथाशक्ति शब्द समस्त होते हैं एव जहाँ तक (कवि) कर सकता है वहाँ तक करता है, उसे गौडीया कहते हैं।

नन्वाख्यातेऽपि पचति प्रपचतीति वृत्तिद्वैविध्यं कथं न स्यादित्यत आह—

आख्यातान्युपसर्गैः संसृज्यन्ते कदाचिदर्थाय ।
वृत्तेरसमासाया वैदर्भी रीतिरेकैव ॥ ६ ॥

'पचति' और 'प्रपचति' के प्रयोग से आख्यात में भी दो प्रकार की वृत्ति क्यों नहीं होगी—इस (शङ्का) का उत्तर देते हैं—

कभी कभी आख्यात उपसर्ग के साथ अर्थ के लिये (किसी विशेष प्रयोजन के लिये नहीं) जोड दिये जाते हैं (न कि समस्त किये जाते हैं) असमासा वृत्ति की वैदर्भी ही एकमात्र रीति होती है ॥ ६ ॥

आख्यातानीति । आख्यातानि तिङन्तक्रियापदान्युपसर्गैः सार्धं संसृज्यन्ते, न तु समस्यन्ते । सुप्सुपेत्यधिकारात् । किं नित्यमेव । न । कदाचित्क्वचिदपि । किमर्थमित्याह—अर्थाय । यत उक्तम्—'धात्वर्थं बाधते कश्चित्कश्चित्तमनुवर्तते । तमेव विशिनष्टयन्य उपसर्गगतिस्त्रिधा ॥' तत्र बाधते यथा—प्रहरति प्रतिष्ठते इत्यादि । अनुवर्तते यथा—प्रहन्ति अभिहन्ति विशिनष्टि यथा—प्रपचतीत्यादि । इदानीमसमासाया वृत्ते रीतिमाह—वृत्तेरसमासाया समासरहितपदवृत्तेर्वैदर्भी नाम रीतिरेकैव । एताश्च रीतयो नालंकाराः, किं तर्हि शब्दाश्रया गुणा इति ॥

आख्यातानीति । आख्यात (अर्थात्) तिङन्त क्रियापद उपसर्गों के साथ जोड दिये जाते हैं न कि समस्त किये जाते हैं । 'सुप्सुपा' इस अधिकार सूत्र से । क्या नित्य (ही जोडे जाते हैं ? नहीं । कभी-कभी । क्यों जोडे जाते हैं) ? अर्थ देने के लिये, कहा भी गया है—कोई (उपसर्ग) तो धात्वर्थ को बाधित कर देता है । कोई उसी का अनुसरण करता है, कोई उसी (धात्वर्थ) को विशिष्ट बनाता है—इस प्रकार उपसर्ग तीन प्रकार का कार्य करते हैं । जैसे, 'प्रहरति' 'प्रतिष्ठते' में 'हृ' तथा 'स्था' धातु के उपसर्ग के प्रयोग से अर्थ बाधित हो गये हैं । 'प्रहन्ति' और 'अभिहन्ति' के उपसर्ग धात्वर्थ का ही अनुगमन कर रहा है तथा प्रपचति में उपसर्ग धात्वर्थ को विशिष्ट बना रहा है । अब असमासा वृत्ति की रीति बताते हैं—असमासा समासरहित पदों वाली वृत्ति की वैदर्भी नाम की एक ही रीति होती है । ये रीतियाँ अलङ्कार नहीं हैं । फिर क्या हैं ? शब्द है आश्रय जिनका ऐसी गुण ॥

पञ्चविधस्यापि शब्दस्य यत्रोपयोगस्तस्येदानीं वाक्यस्य लक्षणं कर्तुमाह—

वाक्यं तत्राभिमतं परस्परं सव्यपेक्षवृत्तीनाम् ।
समुदायः शब्दानामेकपराणामनाकाङ्क्षः ॥ ७ ॥

जिस वाक्य में पञ्चविध शब्द का उपयोग होता है उसका इस समय लक्षण करते हुये कहते हैं—

'इन पाँच प्रकार के शब्दों में परस्पर अपेक्षित व्यापार वाले एक वस्तु को सिद्ध करने के लिये उद्यत अनाकाङ्क्ष शब्दों का समुदाय वाक्य कहा जाता है ॥ ७ ॥

वाक्यमिति । तत्रेति पञ्चविधशब्दमध्यादन्यतरद्वित्र्यादिभेदानां समुदायो वाक्यम् । ननु नामादीनां पञ्चानामेव युगपत्प्रयोगे । कीदृशां शब्दानाम् । परस्परं सव्यपेक्षवृत्तीनां अन्योन्यं साकाङ्क्षव्यापाराणाम् । न त्वेवंविधानां यथा—'आषाढी कार्तिकी माघी वचा हिङ्गु हरीतकी । पञ्चैतान्महदुच्चिक्रमायुर्मर्माणि कृन्तति ॥' तथा एकपराणाम् । एकं वस्तु साधयितुमुद्यतानामित्यर्थः । तथा अनाकाङ्क्षः । साकाङ्क्षोऽपि भवति यस्मादाख्यातं विना शब्दसमुदायः साकाङ्क्षो भवति । तमपेक्षत इत्यर्थः ॥

वाक्यमिति । (तत्र) पद का तात्पर्य है कि पञ्चविध शब्दों में से दो प्रकार या तीन प्रकार के शब्दों का समुदाय भी वाक्य हो सकता है, नाम आदि पाँचों प्रकार के शब्दों का ही प्रयोग होने पर नहीं । किस प्रकार के शब्दों का (समुदाय)? परस्पर अपेक्षित व्यापारवाले एवं एक दूसरे के व्यापार की आकाङ्क्षा रखनेवाले, न कि इस प्रकार के जैसे—"आषाढी आदि पद' (परस्पर एक दूसरे शब्द की आकाङ्क्षा न रखने के कारण वाक्य नहीं है)। तथा एक पर शब्दों का अर्थात् एक बात (वस्तु) को सिद्ध करने के लिये उद्यत शब्दों का। इसके अतिरिक्त अनाकाङ्क्ष ही शब्द समुदाय वाक्य होता है, यदि शब्द-समुदाय साकाङ्क्ष होता है तो वह वाक्य नहीं होगा क्योंकि क्रियापद के अभाव में शब्द समुदाय साकाङ्क्ष होता है (अतएव वह वाक्य नहीं होता)। उस क्रिया पद की उसे अपेक्षा रहती है ॥

अथ वाक्यगुणानाह—

अन्यूनाधिकवाचकसुक्रमपुष्टार्थशब्दचारुपदम् ।
[1]क्षोदक्षममक्षूणं सुमतिर्वाक्यं प्रयुञ्जीत ॥ ८ ॥

अब वाक्य गुण बताते हैं—

'न्यून, अधिक, अवाचक, अक्रम, अपुष्टार्थ, अशब्द, दुःश्रवादि दोषों से शून्य (समस्त दोषों के त्याग और गुण के ग्रहण से) परिपूर्ण अर्थ निर्भर वाक्य का प्रयोग विद्वान् को करना चाहिए ॥ ८ ॥

---

१. 'अक्षुण्णदेहोऽपि पाण्डुस्तान्' इति विक्रमाङ्कदेवचरितम् (७।४०) 'अक्षुण्णम्' इति पाठः सम्यग्भाति ।

अन्यूनेति। शब्दाश्च ते चारुपदानि च शोभनपदानि च शब्दचारुपदानि, ऊनानि चाधिकानि, चोनाधिकानि नितरामूनाधिकानि, न्यूनाधिकानि, न तथा अन्यूनाधिकानि, तानि च तानि वाचकानि च, सुक्रमाणि च पुष्टार्थानि च शब्दचारुपदानि यत्र वाक्ये तत्तथाभूतं वाक्यं प्रयुञ्जीतेति सम्बन्धः। तत्रान्यूनग्रहणाद्यत्र कंचिच्छब्दं विना दुष्टार्थप्रतीतिर्विवक्षितार्थाप्रतिपत्तिरेव वा भवति तन्न्यूनपदं वाक्यं निरस्तम्। यथा—'संपदो जलतरङ्गविलोला यौवनं त्रिचतुराणि दिनानि। शारदाभ्रमिव पेलवमायुः किं धनैः परहितानि कुरुध्वम् ॥' अत्र हि धनशब्दादनन्तरं यावत्कार्यशब्दो न प्रयुक्तस्तावत् 'धनैः किमिति परहितानि कुरुध्वम्'। मा कुरुत इति दुष्टोऽर्थः प्रतीयते। विवक्षितार्थाप्रतीतिर्यथा—'सीसपडिच्छियगंगं पणमिय संझं नमह नाहं'। अत्र 'संझं' शब्दादनन्तरं 'तत' शब्दमन्तरेण न ज्ञायते किं 'प्रणम्य सध्या ततो नाथ नमत,' आहोस्वित् 'प्रणतसध्यं नाथ नमत' इति। निःशब्दग्रहणाद्यत्र विनापि पदमसाधारणविशेषणोपादानात्तदनुरूपकारकप्रयोगाद्वा। विवक्षितपदार्थप्रतीतिस्तदूनमात्र साध्वेव। यथा—'स व पायात्कला चान्द्री यस्य मूर्ध्नि विराजते। गौरीनखाग्रधारेव भग्नरूढा कचग्रहे ॥' अत्र ह्यसाधारणविशेषणैः शंभुरित्यनुक्तमपि लभ्यते। अनुरूपकारकप्रयोगात्पदार्थप्रतीतिर्यथा—'यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा। यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव सः ॥' अत्र च्छेदसेकालकारा अनुक्ता अपि परश्वाद्युपादानात्प्रतीयन्ते। नहि तेषां च्छेदादेरन्यो व्यापार इति। अधिकग्रहणाद्यत्र शब्दान्तरेणोक्तेऽप्यर्थे पुनस्तदर्थपदं प्रयुज्यते तन्निरस्तम्। यथा—'स्फारध्वानाम्बुदालीवलयपरिकरालोकनं प्रेमदाम्नोः' इत्यत्रालीशब्देन मेघानां बाहुल्यं प्रतिपादितमिति तदर्थौ वलयपरिकरशब्दौ निष्प्रयोजनाविति। निःग्रहणादधिकमात्र साध्वेव। यथा—'नादेन यस्य सुरशत्रुविलासिनीनां काञ्च्यो भवन्ति शिथिला जघनस्थलेषु'। अत्र हि काञ्चयस्तत्स्थानत्वादेव जघनस्थले लब्धे तदुपादानमधिकमात्रमिति। वाचकग्रहणमवाचकनिवृत्त्यर्थम्। यथा—'लावण्यसिन्धुरपरैव हि केयमत्र यत्रोत्पलानि शशिना सह संप्लवन्ते। उन्मज्जति द्विरदकुम्भतटी च यत्र यत्रापरे कदलिकाण्डमृणालदण्डाः ॥' अत्र शशिशब्देन मुखम्, उत्पलशब्देन नेत्रे द्विरदकुम्भाभ्यां स्तनौ, कदलिकाण्डशब्देनोरू, मृणालदण्डशब्देन बाहू कवेर्विवक्षितौ। न च शब्दास्तथा वाचकाः, न च मुखादिषु शशिप्रभृतीनि पदानि यौगिकानि रूढानि चेत्यवाचकान्येव। उपमेयपदाप्रयोगाच्च रूपकभ्रान्तिरपि

नास्ति। तथा दशरथ इति वक्तव्ये पङ्क्तिरथशब्दोऽप्यवाचकः संज्ञाशब्दत्वात्तस्य। न च दशसंख्यार्थो वा घटते। येन यौगिकरूढपदं स्यात्। तथा आम्रदेवादिषु पूतामरादयः शब्दा अवाचका इति। सुक्रमग्रहणं दुष्टक्रमनिवृत्त्यर्थम्। यथा—'वदन्त्यपर्णामिति तां पुराविदः' इत्यत्र हि इतिशब्देन पुराविदां संबन्धः, न त्वपर्णायाः। अपर्णायास्तु संबन्धे द्वितीया न स्यात्। यथा—'क्रमादमुं नारद इत्यबोधि सः' इत्यादौ हि वस्तुस्वरूपमात्रमवस्थापयतीति। लिङ्गार्थमात्रे प्रथमैव न्याय्या न द्वितीया। क्वापि च शब्दमात्रप्रतिपादनेन प्रथमापि न भवति यथा—'गवित्ययमाह' इति।

अन्यूनेति। वे (पूर्वोक्त, पञ्चविध) शब्द (किस प्रकार के होंगे) चारुपद अर्थात् सुन्दरपद, शब्दों का सुन्दर पद, ऊन अर्थात् न्यून और अधिक, 'नि' का अर्थ अत्यधिक है। अर्थात् वाक्य में न्यूनाधिक, वाचक, सुन्दरक्रम वाले, पुष्ट अर्थवाले शब्दों के सुन्दर पदों को प्रयोग करना चाहिये। 'अन्यूनाधिक' में 'अ' का अर्थ है कि न्यूनाधिक पदों का प्रयोग नहीं करना चाहिये। जहाँ किसी शब्द के बिना या अभाव में अर्थ सदोष हो अथवा अभीष्ट अर्थ में आपत्ति होती है वह न्यून-पद वाक्य काव्य में नहीं प्रयोग किया जा सकता—यह (कारिका) में 'अन्यून' पद का अभिप्राय है। जैसे, 'संपत्तियाँ जल की तरङ्ग के समान चञ्चल होती हैं और यौवन तीन-चार दिन का होता है, शरत्काल के मेघके समान आयु कोमल होती है, धन से क्या—परोपकार करना चाहिये।' यहाँ धन के बाद जब 'कार्य' पद का प्रयोग नहीं किया गया तब तक 'धनैः किमिति परहितानि कुरुध्वम्' कह दिया गया। (जिससे) (परहित) मत करो इस दुष्ट अर्थ की प्रतीति होने लगती है। विवक्षित अर्थ की अप्रतीति का उदाहरण देते हैं—यहाँ 'सन्ध्यां' शब्द के बाद 'ततः' शब्द के अभाव में यही नहीं ज्ञात होता कि 'सन्ध्या को नमस्कार कर के फिर स्वामी को नमस्कार करें' 'अथवा' सन्ध्या को नमस्कार करनेवाले स्वामी को नमस्कार करें। जहाँ पदके अभाव में भी असाधारण विशेषणों के उपादान अथवा अनुरूप कारक के प्रयोग से विवक्षित अर्थ की प्रतीति हो जाती है वहाँ (वाक्य) ऊनमात्र होने से साधु होता है—यह 'नि' उपसर्ग के ग्रहण का तात्पर्य है, जैसे 'केश पकड़ने के समय टूटी हुई पुनः रूठ हुई गौरी के नख के अग्रभाग की धारा के समान चन्द्रमा की कला जिसको शिर पर सुशोभित है वह आप सामाजिकों की रक्षा करें॥' यहाँ 'शम्भु' अनुक्त होने पर भी असाधारण विशेषणों से प्रतीत हो जाता है। अनुरूपकारक के प्रयोग से पदार्थ की प्रतीति का उदाहरण देते हैं—'जो नीम की

फार्सा से, जो उसे मधु और घृत से और जो उसे गन्धमाल्य से—सबके लिये यह नीम कटु ही होता है।' परशु आदि के उपादान से काटने, सींचने और अलकृत करने की क्रिया का बोध हो जाता है। क्यों कि (परशु आदि) कर्तन आदि के अलावा कोई भी व्यापार नहीं है। अधिक के ग्रहण से 'जहाँ एक अन्य शब्द—अर्थ का कथन कर चुका है वहीं उस अर्थ के लिये एक और पद का प्रयोग हो रहा है' ऐसे पद का परिहार हो जाता है। जैसे—'स्फारध्वानाम्बुदाली' आदि में 'आली' शब्द से ही बाहुल्य का कथन हो जाने पर 'वलय' और 'परिकर' पद किसी प्रयोजन की सिद्धि नहीं करते। 'अधिकमात्र'—पद से (वाक्य) दुष्ट नहीं होता यह 'नि' के उपादान का प्रयोजन है; जैसे, 'जिसके नाद से राक्षस-रमणीजनों की कटिसूत्रियाँ जघनस्थलों पर शिथिल हो जाती हैं।' यहाँ काञ्ची से ही उसके स्थान जघनस्थल की प्रतीति हो जाने से (जघन-स्थल पद का) प्रयोग अधिकमात्र है (अत्यधिक नहीं)। अवाचक की निवृत्ति के लिये वाचक का ग्रहण किया गया है; जैसे, 'यह कौन सी लुनाई की दूसरी नदी है जिसमें नील कमल चन्द्र के साथ तैर रहे हैं, जिसमें हाथी के गण्डस्थल की पंक्ति स्नान कर रही है तथा जिसमें दूसरे ही केले के खम्भे एवं मृणाल-दण्ड हैं।' यहाँ शशि शब्द से मुख, उत्पल शब्द से नेत्र, द्विरदकुम्भ से स्तन, कदलिकाण्ड शब्द से जघाये और मृणाल-दण्ड से कवि को भुजाये विवक्षित हैं। यहाँ शब्द उक्त रीति से (अर्थात्—शशि मुख का) वाचक नहीं हैं और शशि आदि पद मुख आदि अर्थ में यौगिक अथवा रूढ भी नहीं है (अत एव) वे अवाचक ही हैं। उपमेय पद का प्रयोग (मुख आदि पदों का उपादान) न होने के कारण रूपक की भ्रान्ति के लिये भी अवसर नहीं है। इसी प्रकार 'दशरथ' कहने के लिए 'पंक्तिरथ' पद अवाचक (दोष से दुष्ट) होगा क्यों कि दशरथ सज्ञा शब्द है (और पंक्ति एव रथ जातिवाचक शब्द हैं)। न तो दशसख्या का अर्थ अथवा रथका अर्थ युक्त ही हो सकता है जिससे पंक्तिरथ' शब्द 'दशरथ' शब्द के लिए यौगिकरूढ पद हो सके। इसी प्रकार 'आम्रदेव' आदि शब्दों के लिये 'चूतामर' आदि शब्द अवाचक हैं। 'सुक्रम' का ग्रहण दुष्क्रम का निराकरण करने के लिये किया गया है; जैसे, 'वदन्त्यपर्णामिति तां पुराविदः' में इति शब्द का संबन्ध 'पुराविद्' के साथ है, अपर्णा के साथ नहीं। अपर्णा के साथ संबन्ध होने पर 'अपर्णा' पद में द्वितीया विभक्ति न होती; जैसे 'क्रमादमुं नारद इत्यबोधि स." इस क्रम से उन्हें नारद हैं ऐसा उन्होंने (कृष्ण ने) जाना, इत्यादि (इति) वस्तु के स्वरूपमात्र को उपस्थित करता है। 'लिङ्गार्थ' मात्र के लिये प्रथमा हो 'प्रातिपदिकार्थ—' (२।३।४६) से उचित है द्वितीया नहीं। कहीं कहीं तो शब्द (प्रातिपदिक) मात्र से प्रति-

पादन हो जाने के कारण प्रथमा भी नहीं होती; जैसे 'गो—यह ऐसा कहता है (न कि गौ)।

पुष्टार्थग्रहणमपुष्टार्थनिवृत्त्यर्थम् एकशब्दप्रतिपाद्यार्थे निरभिप्रायबहुशब्दप्रयोगादपुष्टार्थता जायते। यथा—'पातु वो गिरिजामाता द्वादशार्धार्धलोचन। यस्य सा गिरिजा माता स च द्वादशलोचन॥' इत्यत्र न त्रिलोचनशब्दाद्द्वादशार्धार्धलोचन इत्यादिभिः शब्दैरधिकोऽर्थः प्रतिपाद्यत इत्यपुष्टार्थता। शब्दग्रहणमपशब्दनिरासार्थम्। अपशब्दनिरासश्च यद्यपि व्युत्पत्तिद्वारेणैव कृतस्तथापि महाकवीनामप्यपशब्दपातदर्शनात्तन्निरासादरत्यापनाय पुनरभियोग। तथाहि पाणिने पातालविजये महाकाव्ये—'सन्ध्याव धूं गृह्य करेण' इत्यत्र गृह्येति क्त्वो ल्यबादेशः तथा तस्यैव कवेः—'गतेऽर्धरात्रे परिमन्दमन्दं गर्जन्ति यत्प्रावृषि कालमेघाः। अपश्यती वत्समिवेन्दुबिम्बं तच्छर्वरी गौरिव हुं करोति॥' इत्यत्र 'पश्यतो दृष्टम् 'न्ती' नकार पदम्। तथा च भर्तृहरे—'इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते' इत्यत्रात्मनेपदम्। यथा वा कालिदासस्य—'अवजानासि मां यस्मादतस्ते न भविष्यति। मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा॥' इत्यत्र हि अनाराध्येति भिन्नकर्तृ पूर्वकाले क्त्वा। यस्मादाराधनस्य राजा कर्ता भवनस्य प्रजेति। यथा च भारवेः—'गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः।' इत्यात्रात्मनेपदमन्याङ्गे। एवमन्येषामपि। चाग्रहण यर्वर्त्रीत्यादिषु अपशब्दनिवृत्त्यर्थमिति। यथैवमेवगुणयुक्ते काव्ये प्रसादगुणयोगात्प्रसाद एव काव्ये गुण समाश्रितो भवति, न तु गाम्भीर्यमित्याह—क्षोदक्षमं श्रेणसहं वाक्यं प्रयुञ्जीत। गाम्भीर्ययुतमिति तात्पर्यार्थ। किमेतावद्गुणमेव वाक्यमित्याह—अक्षुणमिति। समस्तदोषत्यागात्समस्तगुणसम्भवाच्च परिपूर्णम्। एतेन 'असमर्थमप्रतीत विसन्धि' इत्यादि वक्ष्यमाणदोषत्यागाच्च वाक्यस्य प्रयोगार्हत्वमावेदितम्॥

अपुष्टार्थ के निराकरण के लिये पुष्टार्थ का ग्रहण किया गया। एक शब्द से प्रतिपाद्य अर्थ के लिये बिना किसी प्रयोजन के अनेक शब्दों का प्रयोग करने पर अपुष्टार्थत्व (दोष) होता है। जैसे—'वह गिरिजामाता और बारह के आधे के आधे नेत्र वाले (वह शिव) आप लोगों की रक्षा करें (और) जिसकी वह गिरिजा माता है वह द्वादशलोचन (षडानन) भी (आप लोगों की रक्षा करें)।' यहाँ त्रिलोचन शब्द के स्थान 'द्वादशार्धार्धलोचन' पद से कोई विशिष्ट अर्थ नहीं मिलता अतएव (वह पद) अपुष्टार्थ (दोष से) दुष्ट है। अपशब्द के

निराकरण के लिये शब्द का प्रयोग किया गया है। अपशब्द का निराकरण यद्यपि व्युत्पत्ति से ही किया जा चुका तथापि (व्युत्पन्न) महाकवियों में भी अपशब्द के उपलब्ध होने के कारण उसके निराकरण के लिये सावधान रहने की आवश्यकता को सूचित करने के लिये फिर से कहना पड़ा। उदाहरण के लिये पाणिनि के पाताल विजय (नामक) महाकाव्य में 'सध्यावधू गृह्य-करेण' में क्त्वा के स्थान पर ल्यप् प्रत्यय करने से गृह्य (अपशब्द) हो गया है। और भी उसी कवि के—'आधी रात बीत जाने पर जब कालमेघ धीरे-धीरे गरजने हैं तो रात चन्द्रबिम्ब को न देखती हुई उसी प्रकार हुँकारी करती है जिस प्रकार बछड़े को न देखने के कारण गाय 'हुँ' 'हुँ' करती है॥ यहाँ पश्यती में नकार का लोप ('शप्श्यनोर्नित्यम्' का उल्लघन होने से) अपशब्दत्व का हेतु है। इसी प्रकार भर्तृहरि का 'यहाँ बुद्धिमान् लोग ही चौदहों लोकों का भोग करते हैं' यहाँ भुञ्जते में आत्मनेपद का प्रयोग 'भुजोऽनवने' (१।३।६६) के प्रतिकूल है। अथवा जैसे कालिदास का—'जो तुम मेरी सन्तति की पूजा न करके मेरा तिरस्कार कर रहे अत एव तुम्हारे कोई सन्तान न होगी—ऐसा उसने तुम्हें शाप दे दिया।' यहाँ पर 'अनाराध्य' पद में पूर्वकाल के अर्थ में भिन्न कर्ता में 'क्त्वा' प्रत्यय प्रयुक्त हुआ है। क्यों कि आराधन का कर्ता राजा और 'भवन' का प्रजा है। और जैसे भारवि के गाण्डीवधारी 'अर्जुन ने स्वर्णशिला के समान शिवजी के वक्षस्थल पर (अपनी) दोनों भुजाओं से चोट किया' में आत्मनेपद का प्रयोग अपने अङ्ग से अतिरिक्त के लिये किया गया है। इसी प्रकार और भी उदाहरण खोजे जा सकते हैं। कारिका में 'चारु' पद का ग्रहण बर्वर्टि आदि श्रुतिकटु शब्दों के निराकरण के लिये किया गया है। चूँकि ऊपर गिनाये गुणों से निर्भर काव्य में प्रसाद मात्र गुण का उसमें समावेश हो सकता है, गाम्भीर्य का नहीं इसलिये कहते हैं क्षोदक्षम (वाक्य) का प्रयोग करना चाहिये। क्षोदक्षम अर्थात् गाम्भीर्य (गुण) से युक्त। (टीका में) प्रेरण सह का तात्पर्य है गाम्भीर्य से युक्त। क्या इन्हीं गुणों से युक्त वाक्य होना चाहिये? कहते है—अक्षुण अर्थात् समस्त दोषों के त्याग और गुणों के सङ्ग्रह से परिपूर्ण (वाक्य होना चाहिये)। इससे—असमर्थ, अप्रतीत, निरर्थ आदि आगे कहे जाने वाले दोषों से शून्य होने पर ही वाक्य व्यवहार के योग्य होता है—यह बता दिया गया॥

अथ पूर्वप्रसङ्गृहीतवाक्यगुणप्रतिपादनार्थमाह—

रचयेत्तमेव शब्दं रचनाया यः करोति चारुत्वम्।
सत्यपि सकलयथोदितपदगुणसाम्येऽभिधानेषु॥ ९॥

अब उक्त कारिका में अप्रतिपादित वाक्य-गुणों का विवेचन करते हुये कहते हैं—

'अर्थों में पूर्वोक्त सकल गुणों के समान होने पर भी कवि को उसी शब्द का उपादान करना चाहिये जिससे प्रबन्ध के सौन्दर्य में अभिवृद्धि होती है ॥९॥

रचयेदिति। तमेव शब्दं विरचयेत्। सकलैर्यथोदितैर्यथाभिहितै: षड्गुणैरन्यूनादिकै साम्ये समानत्वे सत्यपि विद्यमानेऽप्यभिधानेषु। नामसु मध्ये रचनाया शब्दसंदर्भरूपायाश्चारुत्व सौन्दर्यं करोति ॥

रचयेदिति। (काव्य में) उसी शब्द का ग्रहण करना चाहिये जो उक्त (कारिका) मे गिनाये गये अन्यून आदि गुणों के अर्थों में समान होने पर भी (रचना-सौन्दर्य में वृद्धि करे)। नाम (आदि) मे से जो शब्दसंदर्भ रूप रचना के सौन्दर्य में वृद्धि करते हैं ॥

किमिति चारुत्वापादकं शब्दं रचयेदित्याह—

रचनाचारुत्वे खलु शब्दगुणः संनिवेशचारुत्वम् ।
तर्वाल्युर्वेवर्पे तरुपङ्क्तिरसंकटेव मुने ॥ १० ॥

सौन्दर्य-वर्धक ही शब्दों का ग्रहण क्यों करना चाहिये-इसे कहते हैं—। रचना का सुन्दरता मे (पदों के) सन्निवेश की सुन्दरता ही शब्द गुण होती है। 'तवाल्युर्वेवपे' (अचारुत्व का उदाहरण है) (और) 'तरुपंक्तिरसंकटेव मुने' (चारुत्व का) ॥ १० ॥

रचनेति। खल्वयस्मादर्थे। यतो रचनाचारुत्वे गुम्फसौन्दर्ये सति सन्निवेश शब्दाना संहिताख्यं नैरन्तर्योच्चारण तस्य चारुत्वलक्षणो य शब्दगुण स भवतीति। तत्रोदाहरणं यथा—तरूणामाली पङ्क्तिरुर्व्येव महत्येव हे ऋषे मुने। एतदचारुरचनं वाक्यम्। एतत्समानार्थं चारुरचनं चेदम्। यथा—तरुपङ्क्तिरसंकटेव मुने। अत एवंविधमेव वाक्य प्रयोज्यम्, न त्वाद्यसममिति ॥

रचनेति। खलु का प्रयोग कारण के अर्थ में हुआ है। क्यों कि रचना के चारुत्व अर्थात् बन्ध के सौन्दर्य के होने पर अविरत उच्चारण के स्वरूपवाले चारुत्व रूप, शब्दों की संहति का, गुण की सत्ता होती है। (कारिका में) उसका उदाहरण देते हैं। वृक्षों की पंक्ति 'हे मुने विशाल ही है' इस वाक्य की रचना सुन्दर नहीं है। इसी के समान अर्थवाले वाक्य की सुन्दर रचना यह है—जैसे, 'हे मुने! वृक्ष पंक्ति सघन हो नहीं है।' अत एव इसी प्रकार के वाक्यों का प्रयोग करना चाहिये, न कि पहले (बताये गये) वाक्यों के समान (वाक्यों का) ॥

वाक्यलक्षणमभिधाय तस्य भेदप्रदर्शनार्थमाह—

वाक्यं भवति द्वेधा गद्यं छन्दोगतं च भूयोऽपि ।
भाषाभेदनिमित्तः षोढा भेदोऽस्य संभवति ॥ ११ ॥

वाक्य के लक्षण को बताकर उसके भेद-प्रदर्शित करने के लिये कहते हैं—

वाक्य दो प्रकार का होता है—गद्य और पद्य। भाषा को भेदके कारण मानने पर पुनः इसके छ भेद हो सकते हैं' ॥ ११ ॥

वाक्यमिति। वाक्य च द्विविधं भवति। कथम्। एक गद्यमुत्कलम् अन्यच्छन्दोगतं छन्दोनिबद्धम्। भूयस्तथापि भाषाभेदात्षोढा। भेदो वाक्यस्य सभवतीति। षोढेत्यनेन यदुक्तं कैश्चिद्यथा—'प्राकृतं संस्कृतं चैतदपभ्रंश इति त्रिधा' इत्येतन्निरस्तं भवति॥

वाक्यमिति। और वाक्य दो प्रकार का होता है। जैसे एक गद्य (उत्कल-कला विहीन) दूसरा छन्दोगत (छन्दोबद्ध)। इसके अतिरिक्त भाषा के भेद से छ प्रकार का (होता है)। भेद वाक्यों का सभव है—यह भाव है। षोढा यह कहने से जैसा किसी ने कहा है 'प्राकृत'संस्कृत और अपभ्रंश—यह तीन प्रकार के (वाक्य होते हैं)'—इसका खण्डन हो जाता है॥

कास्ता भाषा इत्याह—

प्राकृतसंस्कृतमागधपिशाचभाषाश्च सूरसेनी च ।
षष्ठोऽत्र भूरिभेदो देशविशेषादपभ्रंशः ॥ १२ ॥

वे भाषायें कौन सी हैं—इसे बताते हैं—

'*प्राकृत, संस्कृत, मागध, पिशाच और सूरसेनी (ये पाँच) भाषायें हैं,* देशभेद से अनेकरूपों वाली छठी भाषा अपभ्रंश है ॥ १२ ॥

प्राकृतेति। सकलजगज्जन्तूनां व्याकरणादिभिरनाहितसंस्कारः सहजो वचनव्यापारः प्रकृतिः। तत्र भवं सैव वा प्राकृतम्। 'आरिसवयणे सिद्धं देवाण अद्धमागहा वाणी' इत्यादि वचनाद्वा प्राक्पूर्वं कृतं प्राकृतं बालमहिलादिसुबोधं सकलभाषानिबन्धनभूतं वचनमुच्यते। मेघनिर्मुक्तजलमिवैकस्वरूपं तदेव च देशविशेषात्संस्कारकरणाच्च समासादितविशेषं सत्संस्कृतायुत्तरविभेदानाप्नोति। अत एव शास्त्रकृता प्राकृतमादौ निर्दिष्टं तदनु संस्कृतादीनि। पाणिन्यादिव्याकरणोदितशब्दलक्षणेन संस्करणात्संस्कृतमुच्यते। तथा प्राकृतभाषैव किंचिद्विशेषलक्षणान्मागधिका भण्यते। तथैव यथा—रसयोर्लशौ मागधिकायाम्। रेफस्य लकारो दन्त्यसकारस्य तालव्यशकारः। यथा—सुरा शुला, सरसी, शलशी इत्यादि। तथा एवम-

ष्यारम्य सौ पुंसि। यथा—एसो पुरिसो, एशे पुलिसे इत्यादि। पुम्येवै-त्वम्। तेन तं शलिल। तथा अहवयमोर्हगे आदेश। यथा—हगे संपत्ते, हगे सपत्ता। तथा जय्ययोर्यकारो भवति। यथा—य्याणदि य्याणवादी जाणइ जाणवरेय्यस्य च। अवय्यं मय्य विय्याहले। अवय मद्य विद्या-धर। तथा क्षस्य स्कोऽनादौ। यथा—यस्के लस्कसे यश्रो राक्षस इति। अनादावित्येव। क्षयजलधर. खयय्यलहले इति न स्यात्। स्क प्रेक्षा-चक्ष्यो। प्रेक्षाचक्ष्योर्धात्वो क्षस्य स्कादेश। यथा—पेस्कदि आचस्कदि। तथा छस्य श्चो भवति। यथा—पिश्चिले आवण्णश्चले। तथा षशोः संयोगस्ययोस्तालव्यशकार.। यथा—विष्नुः विहस्पदी कास्यगाल। अर्थस्थयो' थस्य स्तादेश। यथा—एसे अस्ते एषोऽर्थ, समुपस्तिदे समु-पस्थित'। तथा ज्ञण्यन्यञ्वीना ञ्ञो भवति। यथा—ज्ञ। अञ्जली अञ्जलिः। ण्य। पुञ्ञकम्मे पुण्यकर्मा, पुञ्ञाहं पुण्याहम्। न्यस्य च अभिमञ्ञु अभि-मन्यु, कञ्ञका कन्यका। व्रजे' ञ्जादेशस्य वञ्चइ वञ्जइ। तथा तस्य दकारोऽन्ते। यथा—मालेदि होदि य्याणदि इत्यादि। अन्यल्लक्षणं ग्रन्था-न्तराल्लक्ष्याच्च ज्ञेयमिति। तथा प्राकृतमेव किंचिद्विशेषात्पैशाचिकम्। यथा णनोर्नकार पैशाचिक्याम्। यथा—आगंतूनयनमतीत्यादि। तथा दस्य वा तकार'। यथा—वतनं वदनम्। प्राकृतलक्षणापवादश्चात्र। यथा टस्य न डकार। यथा—पाटलिपुत्रम्। तथा पस्य न वकारः। यथा—पदीपो, अनेकपो। तथा कगचजतदपयवानामनादौ यथाप्रयोगं लोप. स्वरशेषता च न कर्तव्या। यथा क्रमेण—आकाश, भिगंको, वचनं, रजतं, वितानं, मदनो, सुपुरिसो, दयालू, लावण्ण। एवं सुको, सुभगो, सूची, गजो, भवति, नदी इत्यादि च। तथा खघथधफभानां हा न भवति। यथा—मुख मेघो रथो विद्याधरो विफल सभा इत्यादि। यथा थठयोर्ढोऽपि न भवति। यथा—पथम, पुथुवी, मठो, कमठो। तथा ञस्य ञ्ञो भवति। यथा—पञ्चकोसल राञा लपित। तथा हृदये यस्य प। हितपकं। तथा सर्वत्र तकारो न विक्रियते। एति विर्गमित्या-दिषु। इत्यादयोऽन्येऽपि प्राकृतविहिता व्यञ्जनादेशा न क्रियन्ते ते च बृहत्कथादिलक्ष्यदर्शनाज्ज्ञेया इति। सूरसेन्यपि प्राकृतभाषैव। केवलमय विशेष.। यथा सूरसेन्यामयसंयोगस्यानादौ तस्य दो भवति यथा—तदो, दीसदि, होदि, अन्तरिदमित्यादिषु। अयसंयोगस्येति किम्। मत्तो, पमुत्तो। स्वग्रहणात् निश्चिन्दो, अन्देउरमित्र स्यादेव। अनादावित्येव तेव तदेत्यादौ न भवति। तथा र्यस्य य्यो भवति। यथा एदयम्—अय्यउत्त, पय्याकुलीकदह्मि। यथालक्ष्यमित्येव। तेन कज्जपर-

वसो, वज्जकज्ज इत्यादौ न भवति । इह थध्वमां धो वा भवति । इध, होध, परित्तायध । पक्षे इथ, होह, परित्तायह । तर्यो पूर्वस्य पुरवो वा । यथा—न कोवि अपुरवो । पक्षे अपुव्वं पदं । तथा कडुय करिय गड्डय गच्छिय इति क्त्वान्तस्यादेश । तथा एदु भवं, जयदु भव, तथा आमन्त्रणे भयव कुसुमाउह इत्यादि । तथा इनः आ वा । यथा—भो कंचुइया । अतश्च । भो वयस्सा, भो वयस्स । तथा इलोप इदानीमि । यथा—किं दाणि करइस्सं । निलज्जो दाणि सो जणो । तथा अन्त्यान्मादिहेतोर्णो भवति । यथा—जुत्तण्णिमं, किण्णिमं, एवण्णेद । यथाप्रयोगमित्येव । तेन किं एत्थ करइस्सं । तदस्ता भवति । यथा ता जाव पविसामि । तथा एवार्थे य्येव । यथा—मम य्येव एक्कस्स । हंजे चेट्याह्वाने । हंजे चतुरिए । हीमाणहे निर्वेदविस्मययोर्निपात. । यथा—हीमाणहे पलिस्सता हगे एदिणा नियविहिणो दुव्विलसिदेण । हीमाणहे जीवतवच्छा मे जणणो । ण निपातो नन्वर्थे । यथा—ण भणामि । अम्महे हर्षे निपात' । हीहीभो विदूषकाणां हर्षे । शेषं प्राकृतसमं द्रष्टव्यमिति । तथा प्राकृतमेवापभ्रंश. । स चान्यैरुपनागराभीरग्राम्यत्वभेदेन त्रिधोक्तस्तन्निरासार्थमुक्तं भूरिभेद इति । कुतो देशविशेषात्कारणात् । तस्य च लक्षणं लोकादेव सम्यगवसेयम् । सामान्यं तु किंचिदिदम् । यथा न लोपोऽपभ्रंशेऽधोरेफस्य । यथा—प्रखुरभ्रायरवग्रेणेत्यादि । तद्वदभूतोऽपि क्वाप्यधो रेफ क्रियते । यथा—ब्राचालउत्रचत्रचत्क्राउकूखीत्यादि । तथोदन्तस्य दकारो भवति । यथा—गोङ्गुगजिद्दुमलिद्दुचारितु इत्यादि । तथा ऋतः स्थाने ऋकारो वा भवति । यथा—तृणमसुगणिजई । पक्षे तणं इत्यादि लक्ष्यादवसेयम् । व्यत्ययो वहुल भाषालक्षणस्य । यथा—थहकारयो. सूरसेन्यां धत्वमुक्तं मागध्यामपि भवति । आभीरीभाषा अपभ्रंशस्था कथिता कचिन्मागध्यामपि दृश्यते । सूरसेन्यामिदानींशब्दे इलोप उक्तः शुद्धप्राकृतेऽपि भवति । तथा कगचजतदपयादीनां पैशाचिक्यां स्वरशेषत्वाभावोऽभिहित । खघथधफभादीनां हत्वाद्यभावश्च सूरसेन्यामपि भवति । इत्यादन्यदपि सांकर्यं महाकविलक्ष्यादवसेयमिति । विशेषतस्तु भाषालक्षणं ग्रन्थान्तरादवसेयमिति ॥

प्राकृतेति । सकल लोगों के जीवों का स्वाभाविक वचन व्यापार जिसका व्याकरण आदि के द्वारा संस्कार न किया गया हो, प्रकृति (कहलाता है) (तथा) उससे उत्पन्न अथवा उसी को प्राकृत (कहते हैं) । 'ऋषियों के वचन में ही देवों की अर्धमागधी वाणी सिद्ध है' इत्यादि आप्तवाक्यों के अनुसार

बालक, स्त्री आदि के लिये भली भाँति समझ मे आने वाली प्राचीन काल से ही रची गयी सभी भाषाओं की जननी प्राकृत भाषा कही जाती है। वही (प्राकृत), मेघ से गिरा हुआ समान गुण वाला जल जिस प्रकार देश भेद और सस्कार-भेद से भिन्न भिन्न प्रतीत होता है, उसी प्रकार देश भेद और सस्कार भेद से उत्तर काल में पनपने वाली सस्कृत आदि बोलियों के भेद को प्राप्त हो गयी। इसीलिये शास्त्रकार ने (कारिका में) प्राकृत का पहले निर्देश किया और सस्कृत आदि का बाद मे। पाणिनि आदि के व्याकरण से उपदिष्ट शब्दों का सस्कार होने के कारण (भाषा) सस्कृत कही जाती है। तथा वही प्राकृत भाषा कुछ विशेष लक्षणों के कारण मागधी कही जाती है। वह (विशेष लक्षण) यह है—जैसे, मागधी में र और स के स्थान पर (क्रमशः) ल और श हो जाता है—रेफ का लकार और दन्त्य सकार का तालव्य शकार, जैसे सुरा का शुला, सरसी का शलशी आदि। तथा 'सु' प्रत्यय परे रहने पर पुल्लिंग में अकार के स्थान पर *एकार हो जाता है, जैसे 'एसो पुरिसो' (के लिये) एशे पुलिशे (यह पुरुष)*। पुल्लिंग में ही एकार होता है। अतएव (नपुंसक मे) 'त शलिल' होगा तथा 'अहम्' आर 'वयम्' के स्थान पर 'हगे' आदेश होता है, जैसे, 'हगे सपत्ते' 'हगे सत्ता' *(हम सपत्ति वाले)। तथा जकार और यकार के स्थान पर यकार होता है*, जैसे, याणदि (जानाति), याणवादी (ज्ञानवादी), जाणइ (जानाति) और जाणउदेयस्य, अवय्य मय्य विय्याहले (अवश्य मन्त्र विद्याधरः)। तथा क्ष के आदि में न रहने पर (उसके स्थान पर) 'स्क' आदेश होता है, जैसे, यक्ष से यस्के, लस्कशे, राक्षस आदि। 'क्षयजलधर' से 'सयय्यलहले' (अर्थात् क्ष के यहाँ आदि में न होने से स्क) आदेश नहीं हुआ। स्कः प्रेक्षाचक्षोः। 'प्रेक्ष' और 'आचक्षि' धातुओं में 'क्ष' के स्थान पर स्क आदेश होता है, जैसे, पेस्कदि, आचस्कदि आदि। तथा छ के स्थान पर 'श्च' होता है, जैसे, पिश्चिले, आवण्ण-वश्चले (आपन्नछल)। तथा सयोग मे आये हुये षकार और सकार के स्थान पर तालव्य शकार हो जाता है, जैसे, विश्नु विश्स्पदीकास्य (आदि में उच्चारण में)?। अर्थ पद में आये हुये थकार के स्थान पर 'स्त' आदेश होता है। जैसे—एशे अस्ते (एषोऽर्थः), समुपस्तिदे (समुपस्थितः)। तथा 'ञ' 'ण्य' 'न्य' और 'र्ञ' के स्थान पर 'ञ' होता है, जैसे ञ—'अञली' (*अञ्जलिः*), ण्य—'पुञकम्मे' (पुण्यकर्मा) 'पुञाह' (पुण्याहम्) और न्य का 'अभिमञु' (अभिमन्युः) 'कञका' (कन्यका)। आदेश किये गये 'व्रजि' के स्थान पर 'वञ्चद' और 'वञइ' होता है। तथा तकार का (पद के) अन्त में दकार होता है, जैसे मालेदि (मारयति) होदि (भवति) याणदि (जानाति) आदि। अतिरिक्त लक्षणों को अन्य ग्रन्थों और उदाहरणों से जानना चाहिये। तथा

प्राकृत ही कुछ भेद के कारण पैशाची हो जाती है, जैसे—पैशाची में ण और न के स्थान पर नकार हो जाता है, जैसे—आगनूनजनम् (अह्णोतब्बनम्)। तथा दकार का तकार विकल्प से होता है, जैसे वतन (वदनम्)। यही प्राकृत-लक्षण का अपवाद है। जैसे—टकार का डकार न होना, जैसे पाटलिपुत्र तथा पकार का वकार न होना, जैसे, पदीपो (प्रदीपः), अनेकपो (अनेकपः आदि)। तथा क, ग, च, ज, त, द, प, य और व का आदि में प्रयोग न होने पर प्रयोग के अनुसार लोप और स्वरूपता नहीं करनी चाहिये। जैसे क्रमशः आकारो, मिगंको, वचनं, रजत, वितान, मदन, नुपुरिसो, दयाद, लावण्य आदि (प्राकृत-प्रयोगों में क आदि का आदि में न होने के कारण लोप नहीं हुआ)। इसी प्रकार मुत्तो, सुभगो, सूची, गजो और नदी आदि प्रयोग होते हैं। इसके अतिरिक्त ख, घ, थ, ध, फ, भ के स्थान पर 'ह' नहीं होता है, जैसे—मुखं, मेघो, रथो, विद्याधरो, विरल, सभा आदि (शब्दों में)। इस प्रकार 'थ' और 'ठ' के स्थान पर ढ नहीं होता है। जैसे—पथम, पुथुवी, मठो, कमठो आदि (प्राकृत-शब्दों में)। तथा श के स्थान पर न होता है, जैसे—'पनकोसल' (यशकोसल्लम्) राजा लपित (राज्ञा लपितम्)। तथा हृदय के यकार के स्थान पर पकार होता है; जैसे—हितपकं (हृदयकम्)। तथा तकार सर्वत्र विकल्प नहीं होता है। 'पति विनम्' इत्यादि प्रयोगों में इत्यादि अन्य भी प्राकृत के द्वारा किये गये व्यञ्जन के आदेश नहीं किये जाते हैं उनका उदाहरण बृहत्कथा आदि ग्रन्थों से जानना चाहिए। सूरसेनी भी प्राकृत भाषा ही है। उसका वैशिष्ट्य केवल यह है जैसे—सूरसेनी अपने संयुक्त न होने पर तकार के स्थान पर उसके आदि में न आने पर दकार हो जाता है—जैसे तदो (ततः), दीसदि (दृश्यते), होदि (भवति), अन्तरिद (अन्तरितम्) आदि प्रयोगों में। अपने से असयुक्त—ऐसा क्यों कहा ? मत्तो, पमुत्तो (आदि उदाहरणों में अपने से सयुक्त होने के कारण दकार नहीं हुआ)। स्वग्रहण करने से 'निश्चिन्द', 'अन्देउर' आदि शब्दों की सिद्धि हो जाती है। आदि में न रहने पर ही। 'तेव' 'ते एव' (वे ही) (तथा) तदा आदि प्रयोग होते हैं। तथा 'र्य' का 'य्य' हो जाता है। जैसे उदाहरण—अय्यउत्त (आर्यपुत्र), 'पय्याकुली कदम्हि (पर्याकुलीकृतोस्मि)। उदाहरण के अनुसार ही जानना चाहिये अतएव 'कज्जपरवसो' (कार्यपरवशः), 'वज्जज्ज' (वर्ज्यकार्य) आदि में (य्य) नहीं होता है। सूरसेनी में 'थ' और 'ध्य' के स्थान पर ध विकल्प से होता है। (जैसे) इध, होध, परित्तायध। पक्ष में (ध न होने पर) इथ, होद, परित्तायद। तथा पूर्व का पुरव विकल्प से होता है। जैसे—'न कोवि अपुरवो' (न कोऽपि अपूर्वः)। पक्ष में 'अपुव्वं पद' (अपूर्वं पदम्)। तथा क्त्वान्त के आदेश

कडुय, करिय (कृत्वा) गडुय गच्छिय (गत्वा) होते हैं। इसी प्रकार 'एदु भव' (एतु भवान्) 'जयदु भव' (जयतु भवान्) तथा बुलाने के लिये 'भयव' (भगवन्) 'कुसुमाउह' (कुसुमायुध) आदि प्रयोग होते हैं। तथा 'इन्' के नकार के स्थान पर 'आ' विकल्प से होता है। जैसे कचुइआ (कञ्चुकिन्)। अकार के स्थान पर भी (आकार विकल्प से होता है) जैसे 'भो वयस्सा' भो वयस्स (भो वयस्य—मित्र)। तथा 'इदानीं' के इकार का लोप हो जाता है जैसे 'किं दाणि करइस्स' (किमिदानीं करिष्ये) अब क्या करूँगा। 'निल्लज्जो दाणि सो जन' (निर्लज्ज इदानीं स जनः—अब वह निर्लज्ज हो गया है)। तथा अन्त्य म था इ परे रहते ण हो जाता है जैसे जुत्तण्णिम (युक्तमिदम्) किण्णिमं (कि नु इदम्) एवण्णेद (एव नु इदम्) प्रयोग के अनुसार ही। अतएव 'किम् इयम् करिष्ये' में यह नहीं लागू हुआ। जैसे तब तक जब तक प्रवेश करती हूँ। तथा 'एव' के लिये 'य्येव' जैसे 'मम एव एक्कस्य'। चेटी के बुलाने में हजे प्रयोग होता है जैसे 'हजे चतुरिके'। निर्वेद और विस्मय के लिये 'हीमाणहे' निपात प्रयुक्त होता है। जैसे—खेद है कि हम लोग अपने भाग्य के अनाचार से परेशान हैं। हर्ष है मेरी माता जीवित वत्स वाली है। 'ण' निपात 'ननु' के अर्थ में आता है। जैसे, ण (ननु) भणामि (कहता हूँ)। 'अम्महे' हर्ष-सूचक निपात है। 'हीहीभो' विदूषकों के हर्ष के लिये आता है। शेष बात प्राकृत के समान ही जाननी चाहिए। तथा प्राकृत ही अपभ्रंश है। उसे कुछ लोगों ने उपनागर, आभीर और ग्राम्यत्व भेद से तीन प्रकार का बताया है उसका निराकरण करने के लिये 'भूरिभेद' (अनेक भेदों वाला) कहा गया। क्यों? देशविशेष के कारण। उसका उदाहरण तो लोक से ही भली भाँति जाना जा सकता है। कुछ सामान्य भेद तो यह है—जैसे, अपभ्रंश में नीचे के रेफ का लोप नहीं होता, उदाहरणार्थ—प्रचुर, भ्राप, प्रभेण आदि। इसी प्रकार कहीं-कहीं न होने वाले भी नीचे के रेफ का विधान होता है, जैसे—व्राचाल, उन्नच, भ्रच, उक्काल, क्रूरी आदि। तथा उदन्त के स्थान पर दकार होता है, जैसे—गोत्तुगजिट्टमलि दुच्चारितु आदि। तथा ऋकार के स्थान पर ऋकार विकल्प से होता है—उदाहरणार्थ 'तृणसमुगणिजई'। पक्ष में (तृण के स्थान पर) 'तण' आदि उदाहरण समझने चाहिये। भाषा के लक्षण में व्यत्यय प्रचुर रूप से मिलता है। उदाहरणार्थ 'ध' और 'ह' के स्थान पर बताया गया सूरसेनी में 'ध' मागधी में भी मिलता है। (यद्यपि) आभीरी भाषा अपभ्रंश से प्रसृत कही गयी है किन्तु कहीं कहीं मागधी से भी मिलती है। सूरसेनी में बताये गये 'इदानीं' शब्द के इकार का लोप शुद्ध-प्राकृत में भी होता है। इसी प्रकार क ग च ज त द प य आदि के लोप एवं स्वर के अवशेष रहने का अभाव

पैशाची मे बताया गया। ख, घ, घ, फ, और भ के स्थान पर सूरसेनी में भी हकार नहीं होता है। इस प्रकार भाषा के और भी सांकर्य (मिश्रण) महाकवियों के उदाहरणों से जानना चाहिए। विशेषतः भाषा का स्वरूप अन्य (व्याकरण आदि) ग्रन्थों से जानना चाहिए।

एवं शब्दलक्षणं गुणदोषांश्चाभिधायेदानीं तस्यालंकारान्विवक्षुराह—

वक्रोक्तिरनुप्रासो यमकं श्लेषस्तथा परं चित्रम्।

शब्दस्यालंकाराः श्लेषोऽर्थस्यापि सोऽन्यस्तु ॥ १३ ॥

इस प्रकार शब्द का स्वरूप, उसका गुण और दोष बताकर अब उसके अलङ्कार बताते हैं—

वक्रोक्ति, अनुप्रास, यमक, श्लेष तथा इसके अतिरिक्त चित्र शब्दालङ्कार हैं। श्लेष अर्थालङ्कार भी है वह (शब्दश्लेष से) भिन्न होता है ॥ १३ ॥

वक्रोक्तिरिति। तथाशब्दः समुच्चये। अन्यैरनुक्तं चित्रं शब्दालंकारमध्ये समुच्चीयते। परमुत्कृष्टमपरं वा। अन्यदित्यर्थः। शब्दस्येत्यर्थनिवृत्त्यर्थम्। अतश्च कश्चिदाशङ्कते—शब्दालंकार एवायं श्लेषो न त्वर्थालंकारोऽपीति तं प्रत्याह—श्लेषोऽर्थस्यापीति। किमयमेव श्लेषोऽर्थस्यापि नेत्याह—सोऽन्यस्तु। तुरवधारणे। सोऽन्यादृक्ष एवेत्यर्थः। तेन यदन्यैरभेदेन श्लेषलक्षणमवादि तदयुक्तमित्युक्तम्। नन्वलंकारोऽलंकार्याद्भिन्नो दृष्टः। यथा पुरुषात्कटकादयः। न चैवमत्र भेदमवगच्छाम इति। सत्यम्। विद्यत एव भेदः। यथा—'किं गौरि मां प्रति रुषा' इति शब्दसमुदायोऽलंकार्य एव। तस्य यद्भङ्ग्यन्तरेण व्याख्यानं सोऽलंकारः। अनुप्रासेऽपि प्रथमोक्ता वर्णा आवृत्ताश्चान्योन्यमलंकुर्वते। यथा हि—द्वौ साधू मिलितौ परस्परमलंकुर्वाते इति। एवं यमके श्लेषे च द्रष्टव्यम्। चित्रेऽपि स्पष्टो वर्णक्रमोऽलंकार्यो भङ्ग्यन्तरकृतस्त्वलंकार इति॥

वक्रोक्तिरिति। तथा शब्द समुच्चय अर्थ में आया है। दूसरों के द्वारा अवर्णित चित्र शब्दालङ्कारों में आता है। 'परम्' का अर्थ है उत्कृष्ट अथवा दूसरा। अर्थात् 'अन्यत्'। अर्थ के निराकरण के लिये 'शब्दस्य' कहा गया। अतएव यदि कोई सन्देह करे—यह श्लेष शब्दालङ्कार ही है अर्थालंकार नहीं, तो उसे उत्तर देते हैं—अर्थ का भी श्लेष अलङ्कार होता है। क्या यही श्लेष (जो शब्द का है) अर्थ का भी श्लेष होता है? नहीं। उत्तर देते हैं—वह (अर्थश्लेष) दूसरा ही होता है। 'तु' अवधारण अर्थ में आया है। तात्पर्य यह है कि वह (अर्थश्लेष) दूसरे ही प्रकार का होता है। अतएव जिन्होंने (शब्द और अर्थ दोनों) श्लेष का एक ही लक्षण बताया है वह ठीक ही नहीं है। अलंकार

अलङ्कार्य से भिन्न देखा गया है। यहाँ ऐसा कोई भेद हमारी समझ में नहीं आता। जैसे पुरुष से कटक में। ठीक है। भेद तो है ही। जैसे 'किं गौरि मां प्रति रुषा' में शब्दसमुदाय अलङ्कार्य ही है। उसी का जो भङ्ग्यन्तर से कथन है वही अलङ्कार है। अनुप्रास में भी प्रथम कह दिये गये वर्ण आवृत्त होकर एक दूसरे की शोभा बढ़ाते हैं। जैसे दो साधु मिलकर एक दूसरे को शोभित करते हैं। इसी प्रकार यमक और श्लेष में भी जानना चाहिए। चित्र में भी स्पष्ट वर्णों का क्रम अलङ्कार्य होता है और भङ्ग्यन्तर के द्वारा किया गया अलङ्कार॥

यथोद्देशं निर्देश इति पूर्वं वक्रोक्तिलक्षणमाह—

वक्त्रा तदन्यथोक्तं व्याचष्टे चान्यथा तदुत्तरदः।
वचनं यत्पदभङ्गैर्ज्ञेया सा श्लेषवक्रोक्तिः॥ १४॥

उद्देश के ही क्रम से निर्देश भी करना चाहिए, इस नियम के अनुसार सर्वप्रथम वक्रोक्ति का स्वरूप बताते हैं—

वक्ता के द्वारा भिन्न अर्थ में कही गयी बात को, उत्तर देने वाला पदों को विभक्त कर जहाँ अविवक्षित अर्थ में, व्याख्या करे उसे श्लेष वक्रोक्ति समझना चाहिए॥ १४॥

वक्त्रा प्रतिपादकेन तस्मादुत्तरवचनादन्यथा प्रकारान्तरेणोक्तम्। तदन्यथोक्तं व्याचष्टे वक्ति चान्यथा। तस्योक्तस्योत्तरं ददातीति तदुत्तरदः। यद्वचनं यद्वाक्यम्। कैर्व्याचष्टे पदभङ्गैः। पदखण्डनैरित्यर्थः। सा श्लेषवक्रोक्तिर्ज्ञेया। वक्रोक्तिस्तु द्विविधा, श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च। तल्लक्षणयोश्च वैलक्षण्यान्नैकं लक्षणमस्तीति भेदेनाभिधानमुपपन्नम्॥

उस उत्तरवाक्य से विपरीत बोलने वाले या प्रतिपादन करने वाले के द्वारा कहा गया। उस भिन्न अर्थ में कही गयी बात की भिन्न प्रकार से व्याख्या करता है। उस कथित का जो उत्तर देता है वह है 'उत्तरद'। जो वचन, जो वाक्य। कैसे व्याख्या करता है? (कहते हैं) पदविच्छेद से। पदों को अलग-अलग करके। उसे श्लेष वक्रोक्ति जानना चाहिए। वक्रोक्ति भी दो प्रकार की होती है, श्लेष वक्रोक्ति और काकु वक्रोक्ति। उन दोनों के स्वरूप में भेद होने के कारण एक ही लक्षण से काम न चलता अतएव भेदपूर्वक नाम लेना उचित ही है॥

तत्रोदाहरणमाह—

किं गौरि मां प्रति रुषा ननु गौरहं किं
कुप्यामि कां प्रति मयीत्यनुमानतोऽहम्।

जानाम्यतस्त्वमनुमानत एव सत्य-
मित्थं गिरो गिरिभुवः कुटिला जयन्ति ॥ १५ ॥

उनके उदाहरण देते हैं—

हे गौरि (पार्वती), इसके ऊपर क्रोध करने से क्या ? क्या मैं गौ हूँ (उत्तरवाक्य में गौरि पद को खण्ड करके 'गौः इ' अर्थ लिया गया)। मैं किस पर क्रोधित हूँ। मेरे ऊपर ऐसा मैं अनुमान से जानता हूँ। अतएव तुम (पार्वती से नत नहीं हो) अनुमानत हो। यह सही है। पार्वती की इस प्रकार की वक्र उक्तियाँ विजयिनी हों (यह श्लेषवक्रोक्ति का उदाहरण है)॥ १५ ॥

किमिति। इत्थमेवं गिरो वाचो गिरिभुवो गौर्या कुटिला वक्रा जयन्ति। कथम्। प्रणयकुपितां गौरीं शंभुरनुनयन्नाह्—हे गौरि उमे, मा प्रति मामुद्दिश्य किं तव रुषा रोषेण। तत्प्रसीदेत्यर्थः। एतदुत्तरदायिनी सान्यथा पदभङ्गेनाह—ननु गौरहं किम्। ननुरक्षमायाम्। किमहं गास्त्वया कृता यद्गौरित्यामन्त्रयसे। का च प्रति मया कोपः कृतः यदाह किमिमां प्रति रुषेति। पुनः शंभुमाह—अतोऽस्मादनुमानतोऽनुमानाद्वक्रवचनलक्षणान्मयि विषये त्वं कुप्यसीत्यहं जाने। भूयो भवान्याह—त्वमनुमानत एव सत्यम्। न उमा अनुमा तस्या एव नतः। अस्मदनमनं केन तव ज्ञातमित्यर्थः॥

किमिति। इस प्रकार गिरि से उत्पन्न पार्वती की टेढी उक्तियाँ विजयिनी हों। किस प्रकार ? प्रेम में क्रुद्ध हुई गौरी की विनती करते हुए शिवजी कहते हैं—हे उमे ! मेरे ऊपर तुम्हारे क्रोध करने से क्या ? अर्थात् प्रसन्न हो जाओ। इस बात का उत्तर देने वाली वह (पार्वती) भिन्न प्रकार से पदच्छेद करके कहने लगी—क्या मैं (गौः) गौ हूँ। ननु का प्रयोग यहाँ क्षमा न करने के अर्थ में आया है। क्या तुम्हारे द्वारा मैं गाय बना दी गयी जो गौरि कहकर पुकार रहे हो। किसके ऊपर मैंने क्रोध किया जो कह रहे हो कि इसके ऊपर क्रोध करने से क्या। फिर शंकर से कहने लगी—इस अनुमान से मेरे ऊपर क्रोधित है (इसे) मैं जानता हूँ (काव्यमाला में छपे हुये शम्भुमाह पाठ का ग्रहण यद्यपि किया गया है किन्तु शम्भुराह पाठ अधिक उपयुक्त प्रतीत होता है। अतएव यहाँ शंकरजी कहने लगे यह अनुवाद करना अधिक उपयुक्त होगा)। पार्वती पुनः बोली—तुम पार्वती से नत नहीं हो, यही सत्य है। जो उमा नहीं है वह हुई अनुमा, जो उससे नमस्कार करे उसे कहेंगे 'अनुमानत'। तुम्हारा हमें न नमस्कार करना किसे ज्ञात है—यह तात्पर्य है॥

इदानीं काकुवक्रोक्तिलक्षणमाह—

विस्पष्टं क्रियमाणादक्लिष्टा स्वरविशेषतो भवति ।
अर्थान्तरप्रतीतिर्यत्रासौ काकुवक्रोक्तिः ॥ १६ ॥

अब काकु वक्रोक्ति का स्वरूप बताते हैं—

स्पष्ट रूप से उच्चारण किये गये स्वर के वैशिष्ट्य के कारण जहाँ दूसरे अर्थ की स्फुट प्रतीति होती है उसे काकुवक्रोक्ति अलंकार कहते हैं ॥ १६ ॥

विस्पष्टमिति । यत्र स्वरविशेषादर्थान्तरप्रतीतिर्भवति । कीदृशात् । विस्पष्टं स्फुटं क्रियमाणादुच्चार्यमाणात् । कीदृशी अर्थान्तरप्रतीतिः । अक्लिष्टा कल्पनारहिता सा काकुवक्रोक्तिः ॥

विस्पष्टमिति । जहाँ स्वर की विलक्षणता के कारण अन्य अर्थ की प्रतीति होती है । कैसे (स्वर से) । जिसका स्पष्ट उच्चारण किया जाये । किस प्रकार के अर्थ की—जो कल्पना से रहित हो (जिसकी झटिति प्रतीति हो) उसे काकुवक्रोक्ति कहते हैं ।।

तत्रोदाहरणम्—

शल्यमपि स्खलदन्तः सोढुं शक्येत हालहलदिग्धम् ।
धीरैर्न पुनरकारणकुपितखलालीकदुर्वचनम् ॥ १७ ॥

उसका उदाहरण देते हैं—

विष से लिपटा हुआ काँटा हृदय में चुभता हुआ भी धीर पुरुषों के लिए सह्य होता है—किन्तु अकारण नाराज हुये दुष्टों की कटु वाणी नहीं ॥ १७ ॥

शल्यमिति । इममनपराधकुपितखलवचनान्यसहमानं कश्चित्समुद्दीपयन्नाह—आस्तामन्यत् । शल्यमपि काण्डमपि स्खलदन्तर्मध्ये मर्मघट्टनां कुर्वाणं सोढुं क्षन्तुं शक्येत । कीदृशम् । हालहलेन विषेण दिग्धं लिप्तम् । धीरैर्धैर्यपरैर्न पुनरकारणकुपितखलालीकदुर्वचनमित्येकोऽर्थः । एतदेव वाक्यं काका स्वरविशेषेण वदन्समाश्वासयति—यथा अपि शल्यं स्खलदन्तः सोढुं शक्येत धीरैर्न पुनरकारणकुपितखलालीकदुर्वचनम् । यदि शल्यमपि सोढुं शक्यते तदा दुर्वचनं सुसहमेवेत्यर्थः । पूर्वपक्षे खलदुर्वचनस्य दुःसहत्वोक्ता, द्वितीये तु सुसहतेति भेदः ॥

शल्यमिति । बिना किसी अपराध के ही क्रोधित हुए दुष्ट के वचनों को न सहने वाले को कोई इस छन्द में उत्तेजित कर रहा है—और सब या तो कहना ही क्या । हृदय विदारण करने वाला काँटा भी सहा जा सकता है । कैसा (काँटा) । विष से लिपटा हुआ । किन्तु धैर्यवान् पुरुष बिना किसी

हेतु के क्रुद्ध हुये दुष्टों के दुर्वचन नहीं सह सकते—यह एक अर्थ है। यही वाक्य काकु के कारण इस प्रकार दाइस बँधाता है—जैसे धीर पुरुष हृदय में चुभते हुये काँटे को क्या सह सकते हैं और अहेतुक दुष्टों के कटु वचन नहीं? तात्पर्य है कि यदि काँटा भी सहा जा सकता है तो दुष्टों का वचन तो सरलतापूर्वक सहा जा सकता है। प्रथम अर्थ में दुष्ट-वाक्य की दुःसहता कही गयी है और दूसरे अर्थ में सुलभता ॥

अथानुप्रासलक्षणमाह—

एकद्वित्र्यन्तरितं व्यञ्जनमविवक्षितस्वरं बहुशः ।
आवर्त्यते निरन्तरमथवा यदसावनुप्रासः ॥ १८ ॥

आगे अनुप्रास का लक्षण बताते हैं—

एक, दो या तीन (व्यञ्जनों के) अन्तर पर स्वर के विवक्षित होने पर व्यञ्जन की जो असकृत् अथवा निरन्तर आवृत्ति होती है उसे अनुप्रास कहते हैं ॥ १८ ॥

एकेति। यद्व्यञ्जनं बहुशो बहून्वारानावर्त्यते। कीदृशम्। एकद्वित्र्यन्तरितम्। एकेन द्वित्रैर्वा व्यञ्जनैरन्तरितं व्यवहितम्। किं व्यवहितानुवर्तनमेवानुप्रासो नेत्याह—निरन्तरमथवा। एतेनैकव्यञ्जनस्तोकानामनुप्रासतोक्ता। व्यञ्जनग्रहणं स्वरनिरासार्थम्। ननु स्वरनिरासे कुतोऽनुप्रासस्याभाव एव स्यात्। स्वररहितस्यावृत्तेरनुपलम्भादित्याह—अविवक्षितस्वरम्। अविवक्षिताः स्वरा यत्र तथा। स्वरचिन्ता न क्रियत इत्यर्थः। बहुशोग्रहणादेकावृत्तिमात्रेण नानुप्रासः। किं तर्हि। एकद्वित्र्यन्तरितमनेकवारानावर्त्यते ततोऽनुप्रास इति ॥

एकेति। जहाँ व्यञ्जन की अनेकशः आवृत्ति होती है—कैसी (आवृत्ति)? एक या दो के अन्तर पर अर्थात् एक या दो व्यञ्जनों की दूरी पर। क्या अन्तर देकर ही आवृत्ति होने पर अनुप्रास होगा—कहते हैं नहीं। अथवा निरन्तर (आवृत्ति होने पर भी अनुप्रास होगा)। इससे एक व्यञ्जन के स्तोकों का भी अनुप्रास होना सिद्ध हो गया। स्वर का निराकरण करने के लिये (व्यञ्जन) पद का ग्रहण किया गया। स्वर का निराकरण कर देने पर अनुप्रास का अभाव ही होगा। स्वर से शून्य (वर्ण समुदाय की) आवृत्ति होती ही नहीं—इस शंका का समाधान करने के लिये कहते हैं—स्वर अविवक्षित है। अनुप्रास में स्वर (की आवृत्ति) अविवक्षित है—अर्थात् स्वर (की आवृत्ति) की परवाह नहीं की जाती—यह तात्पर्य है। 'बहुशः' (पद के) उपादान का तात्पर्य है कि एक आवृत्ति होने पर अनुप्रास नहीं होता।

फिर कितनी ? एक, दो चरणों की दूरी पर जब अनेक बार आवृत्ति होगी उसी समय अनुप्रास होगा ॥

सामान्येनानुप्रासलक्षणमभिधायेदानीमस्यैव भेदानाह—

मधुरा प्रौढा परुषा ललिता भद्रेति वृत्तयः पञ्च ।
वर्णानां नानात्वादस्येति यथार्थनामफलाः ॥ १९ ॥

अनुप्रास का सामान्य लक्षण करके अब उसी के भेद बताते हैं—

वर्णों के अनेक प्रकार होने के कारण अन्वर्थ नाम वाला मधुरा, प्रौढा, परुषा, ललिता, और भद्रा—इस अनुप्रास की ये पाँच वृत्तियाँ हैं ॥ १९ ॥

मधुरेति । अस्यानुप्रासस्य पञ्च वृत्तयो भवन्ति । कुत. । वर्णाना व्यञ्जनाना नानात्वात् । व्यञ्जनानामावृत्त्यानुप्रासस्योक्तत्वाद्वर्णानामित्युक्तेऽपि व्यञ्जनानामिति गम्यते । कास्ता मधुरा, प्रौढा, परुषा, ललिता, भद्रा । इतिशब्द परिसमाप्त्यर्थ । एता एव, न त्वष्टौ तिस्रो वा । तथा ह्यष्टौ हरिणोक्ताः । यथा—'महुर परुस कोमलमोजस्सि निट्ठुरं च ललियं च । गभीरं सामण्ण च अट्ठभणिति उनायव्वा ॥' अत्रौजस्विनिष्ठुरगम्भीराणा न तथा भेद इत्येकतरोपादानमेव न्याय्यम् । तथा वृत्तीना मिश्रता सामान्यम् । तच्चानुक्तमपि लभ्यते । इत्येता पञ्चैव । तथान्यैर्ग्राम्या परुषोपनागरिकेत्युक्तं तत्र त्वसंग्रह एवेति । कीदृश्यस्ता । यथार्थनामफला सान्वयनामिका. । कुत । इति हेत्वर्थे । सा च माधुर्यान्मधुरा, प्रौढत्वात्प्रौढा, इत्यादिर्हेत्वर्थो द्रष्टव्य ॥

मधुरेति । इस अनुप्रास की पाँच वृत्तियाँ होती हैं । क्यों ? वर्णों की एवं व्यञ्जनों की भिन्नता के कारण । व्यञ्जनों की ही आवृत्ति होने पर अनुप्रास होने का कथन होने के कारण 'वर्ण' कहने से भी 'व्यञ्जन'—यह गम्य होता है । वे (वृत्तियाँ) कौन कौन है—(कहते हैं) मधुरा, प्रौढा, परुषा, ललिता (और) भद्रा । 'इति' परिसमाप्ति के अर्थ में आया है । ये ही (पाँच) वृत्तियाँ हैं न कि आठ या तीन । आठ वृत्तियों का उदाहरण हरि ने दिया है—जैसे, मधुर, परुष, कोमल, ओजस्वी, निष्ठुर, ललित, गभीर और सामान्य । इनमें ओजस्वी, निष्ठुर और गभीर में कोई विशेष भेद नहीं है अतएव (इन में से) एक ही का ग्रहण करना उचित है । तथा वृत्तियों का साङ्कर्य ही सामान्य है और उसका बोध बिना बताये ही हो जाता है । इस प्रकार वृत्तियाँ पाँच ही हैं । तथा कुछ अन्य लोगों ने ग्राम्या, परुषा और उपनागरिका—ये तीन वृत्तियाँ बतायी हैं जिनमें (उक्त वृत्तियों) का अन्तर्भाव नहीं हो सकता । वे पाँचों वृत्तियाँ कैसी हैं ? यथार्थ नाम के फलों वाली एवं अन्वित नामों

वाली। 'कृत.' पद का उपादान कारण अर्थ में किया गया है। इस प्रकार मधुर होने के कारण मधुरा, प्रौढ होने के कारण प्रौढा आदि नाम हेतु अर्थ में घटित हो जाते हैं॥

इदानीमासां लक्षणमाह। तत्र मधुरायास्तावत्—

निजवर्गान्त्यैर्वर्ग्याः संयुक्ता उपरि सन्ति मधुरायाम्।
तद्युक्तश्च लकारो रणौ च ह्रस्वस्वरान्तरितौ॥ २०॥

अब इन (वृत्तियों) के लक्षण बताते हैं—

उनमें मधुरा का—अपने वर्गान्त्य (ङ आदि) के साथ ऊपर से संयुक्त क आदि, लकार से युक्त लकार और ह्रस्व के अनन्तर रेफ और णकार मधुरा वृत्ति में होते हैं॥ २०॥

निजवर्गान्त्यैरिति। मधुरायां वर्ग्या कचटतपवर्गवर्णा उपर्युपरिष्टात्संयुक्ताः सहिताः सन्ति विद्यन्ते। कैरित्याह—निजवर्गान्त्यैर्ङञणनमैर्वर्णैः। तथा तद्युक्तस्तेन लकारेण युक्तो लकारः। रणौ च रेफणकारौ च। कीदृशौ। ह्रस्वस्वरेणान्तरितौ व्यवहितौ भवतः। नन्वेकव्यञ्जनावृत्तिरनुप्रासलक्षणमुक्तम्, तत्किमिह बहुवर्णसद्भाव उच्यते। सत्यम्। बहुत्वाद्वर्णानां बहवोऽनुप्रासा अपीति न दोषः। एतेषां च वर्णानां युगपत्प्रयोग एव मधुरा वृत्तिरित्येव न द्रष्टव्यम्। किं तर्हि। तेषां वर्णानां मध्यादन्यतमवर्णैरनुप्रासे मधुरा वृत्तिरिति॥

निजवर्गान्त्यैरिति। मधुरा वृत्ति में वर्ग्य अर्थात् क, च, ट, त तथा प वर्गों के वर्ण ऊपर से संयुक्त होते हैं। किनके साथ (संयुक्त) होते हैं—इसे बताते हैं—अपने वर्गान्त्य अर्थात् ङ, ञ, ण, न और म वर्णों के साथ। तथा लकार से संयुक्त लकार और र और ण अर्थात् रेफ और णकार। किस प्रकार (संयुक्त होते हैं)? ह्रस्व स्वर से अन्तरित अर्थात् उसकी दूरी होने पर। एक व्यञ्जन की ही आवृत्ति अनुप्रास के लक्षण में बतायी गयी है तो फिर यहाँ अनेक वर्णों के सद्भाव बताने की क्या आवश्यकता (इसका समाधान करते हैं)। ठीक है। वर्णों के अनेक होने के कारण अनुप्रास भी अनेक होंगे इसलिये (वर्ण बहुत बताने में) कोई दोष नहीं है। इन वर्णों का एक साथ प्रयोग ही मधुरा वृत्ति है ऐसा नहीं समझना चाहिए। फिर कैसे (मधुरा होगी)। इन वर्णों में से अन्य वर्णों के साथ अनुप्रास होने पर ही मधुरा (वृत्ति) होगी—यह नियम है॥

किमविशेषेणैते प्रयोक्तव्याः ? नेत्याह—

तत्र यथाशक्ति रणौ द्विस्त्रिर्वा युक्तितो लकारं च ।
पञ्चभ्यो न कदाचिदूवर्ग्यानूर्ध्वं प्रयुञ्जीत ॥ २१ ॥

क्या बिना विचार के ही इन वर्णों का प्रयोग करना चाहिए ? कहते हैं नहीं—

इन वर्णों में दो या तीन बार युक्तिपूर्वक लकार का और सामर्थ्य भर रेफ और णकार का प्रयोग होना चाहिए। वर्ग्यों (क आदि) का पाँच बार से अधिक प्रयोग नहीं करना चाहिए ॥ २१ ॥

तत्रेति। तत्र तेषु वर्णेषु मध्ये रणौ यथाशक्ति यावतो प्रयोगकरणे सामर्थ्यमस्ति तावत्प्रमाणौ प्रयोक्तव्यौ। माधुर्यलाभात्। युक्तितः संयोगाल्लकारं द्विस्त्रिर्वा प्रयुञ्जीत। वर्ग्यास्तु पञ्चभ्य ऊर्ध्वमधिकं न कदाचनापि प्रयुञ्जीत। माधुर्यभङ्गप्रसङ्गादित्यर्थः ॥

तत्रेति। ऊपर (की कारिका में) गिनाये गये वर्णों में रेफ और णकार का प्रयोग जहाँ तक सामर्थ्य हो वहाँ तक करना चाहिए। (इससे काव्य में) माधुर्य आता है। संयोगवश लकार का दो या तीन ही बार प्रयोग करना चाहिए। (क आदि) *वर्ग्यों का पाँच बार से अधिक प्रयोग कभी नहीं करना* चाहिए। (क्योंकि पाँच बार से अधिक प्रयोग करने पर) माधुर्य नष्ट हो जाता है ॥

एतदुदाहरणमाह—

भण तरुणि रमणमन्दिरमानन्दस्यन्दिसुन्दरेन्दुमुखि ।
यदि सल्लीलोल्लापिनि गच्छसि तत्किं त्वदीयं मे ॥ २२ ॥
अनणुरणन्मणिमेखलमविरतशिञ्जानमञ्जुमञ्जीरम् ।
परिसरणमरुणचरणे रणरणकमकारणं कुरुते ॥ २३ ॥ (युग्मम्)

इसके उदाहरण देते हैं—

हे लोहित चरणोंवाली ! विलासपूर्वक भाषण करनेवाली !! सुन्दर चन्द्रमुखी युवती !!! यदि तुम प्रिय के भवन जाती हो तो जोर से रणन करने वाली मणिखचित मेखलावाला, निरन्तर रणन करते हुये सुन्दर *मञ्जीरोंवाला* तुम्हारा गमन अकारण मुझे क्यों उत्कण्ठा उत्पन्न करता है ॥ २२ २३ ॥

भणेति। अनणिवति। कश्चित्परमहिलां निजदयितगृहं व्रजन्तीं वीक्ष्याह—भण वद त्वमेव हे तरुणि, यदि त्वं निजदयितमन्दिरं व्रजसि तत्किम्? त्वदीयं परिसरणं मे निष्प्रयोजनमेव रणरणकः हृदयाकुलत्वं कुरुते। आनन्दस्यन्दि हर्षकारि सुन्दरं रम्यमिन्दुवन्मुखं यस्याः साम-

न्त्यते । तथा सल्लीलया सुविलासेनोल्लपितुं वक्तुं शीलं यस्याः सा चामन्त्यते। तथारुणचरणे लोहितक्रमे। कीदृशं परिसरणम्। अनणु तारं रणन्ती शब्दायमाना मणिमेखला रत्नरशना यत्र तत्। तथाविरत शिञ्जानानि रणन्ति मञ्जूनि मधुराणि मञ्जीराणि चरणाभरणानि यत्र तत्। लक्षणं तु स्वधिया सर्वमायोज्यम् ॥

भणेति। अनण्विति। कोई अपने प्रिय के स्थान को जाती हुयी दूसरे की रमणी को देखकर कहता है—बताओ, तुम्हीं हे युवती! जब तुम अपने प्रिय के स्थान को जाती हो तब क्यों—। तुम्हारा गमन बिना कारण के ही मुझे उत्कण्ठा उत्पन्न करता है। आनन्द बरसाने वाला, हर्ष उत्पन्न करने वाला, सुन्दर रमणीक चन्द्रवदन है जिसका वह संबोधित की जा रही है। तथा विलासपूर्वक भाषण करने का स्वभाव है जिसका वह संबोधित की जा रही है। तथा जिसके चरण लोहित है। गमन का वर्णन करते हैं—तार स्वर से रणन कर रही है मणिखचित रत्नमेखला जिसमें ऐसा (गमन)। तथा जिसमें निरन्तर पायल की झंकार हो रही है ऐसा (गमन अकारण उत्कण्ठा उत्पन्न कर रहा है)। पूरे लक्षण को अपनी बुद्धि से घटित कर लेना चाहिए ॥

अथ प्रौढामाह—

अन्त्यटवर्गान्मुक्त्वा वर्ग्यययणा उपरि रेफसंयुक्ताः।
कपयुक्तश्च तकारः प्रौढायां कस्तयुक्तश्च ॥ २४ ॥

अब प्रौढा (वृत्ति) का वर्णन करते हैं—

अन्त्य (ङ आदि) और ट, ठ, ड, ढ तथा ण को छोड़कर ऊपर से रेफ से संयुक्त वर्ग्य (क आदि) यकार, णकार, ककार और पकार से युक्त तकार और तकार से युक्त ककार प्रौढा वृत्ति में होते हैं ॥ २४ ॥

अन्त्यटवर्गानिति। प्रौढायां वृत्तौ वर्ग्या कादयो यकारणकारौ चोपरिभागे रेफेण सयुक्ता भवन्ति। किं कृत्वा। अन्त्यान् ङञणनमान् टवर्गं च मुक्त्वा विहाय। तथा ककारपकाराभ्यामुपरिभागे तकारश्च युक्तो भवति। चः समुच्चये। तथा ककारस्तकारेणोपरिभागे सयुक्त इत्यर्थः ॥

अन्त्यटवर्गानिति। प्रौढा वृत्ति में (ककार आदि) वर्ग्य, यकार और णकार ऊपर से रेफ से संयुक्त होते हैं। क्या करके? अन्त्य ङ, ञ, ण, न, म और टवर्ग को छोड़ कर। तथा ऊर्ध्व भाग में तकार ककार और पकार से युक्त होता है। 'च' समुच्चय अर्थ में आया है। इसी प्रकार ककार भी ऊर्ध्व भाग में तकार से युक्त होता है ॥

तत्रेदमुदाहरणम्—

कार्याकार्यमनार्यैरुन्मार्गनिरर्गलैर्गलन्मतिभिः ।
नाकर्ण्यते विकर्णैर्युक्तोक्तिभिरुक्तमुक्तमपि ॥ २५ ॥

उसका यहाँ उदाहरण देते हैं—

दुष्ट, कुमार्ग में अप्रतिहत, नष्ट बुद्धि वाले मूर्ख आप्त पुरुषों के द्वारा बार-बार बताये जाने पर भी हिताहित का विचार नहीं करते हैं ॥ २५ ॥

कार्याकार्यमिति। येऽनार्या अशिष्टा उन्मार्गे कुमार्गे निरर्गला निरङ्कुशाः। स्वच्छन्दा इत्यर्थः । तथा गलन्मतयो नश्यद्बुद्धयः । विकर्णा जडास्तैरेवभूतैः कार्याकार्यं हिताहितमुक्तमुक्तमपि पुनः पुनर्भणितमपि नाकर्ण्यते न श्रूयते । कैरुक्तमित्याह—युक्ता संगता उक्तिर्वचनं येषां तैः । पयुक्तकारस्य तयुक्तककारस्य च स्वयमुदाहरणं द्रष्टव्यमिति । एषा वृत्तिरन्यैरोज इत्युक्ता ॥

कार्याकार्यमिति । जो अशिष्ट जन कुमार्ग में अप्रतिहत हैं—अर्थात् स्वच्छन्द हैं, जिनकी बुद्धि नष्ट हो चुकी है। जो विकर्ण (अर्थात्) जड हैं वे बार बार उपदेश पाने पर भी हिताहित नहीं सुनते हैं। उपदेशा को बताते हैं—जिनकी वाणी सगत (अर्थानुसधान में तत्पर) है। प से युक्त तकार (सुप्त आदि) और त से युक्त ककार (उत्कण्ठित आदि) के उदाहरण स्वयं ढूढना चाहिए। इसी को दूसरे लोगों ने ओज वृत्ति कहा है ॥

अथ परुषामाह—

सर्वैरुपरि सकारः सर्वे रेफेणोभयत्र संयुक्ताः ।
एकत्रापि हकारः परुषायां सर्वथा च शषौ ॥ २६ ॥

अब परुषा का वर्णन करते हैं—

ऊपर से सभी वर्णों से युक्त सकार, ऊपर तथा नीचे से रेफ से युक्त सभी वर्ण, रेफ से ऊपर अथवा नीचे से युक्त ह, सब प्रकार से परुषा में शकार और षकार होते हैं ॥ २६ ॥

सर्वैरिति । परुषायां वृत्तौ सर्वैरुक्तैरनुक्तैश्च वर्णैरुपरिभागे सकारो युक्तो भवति । तथा सर्वे वर्णा उक्ता अनुक्ता रेफेणोभयत्रोपर्यधोभागयोः पर्यायेण युगपद्वा युक्ता भवन्ति । तथा हकारो रेफेणैकत्रोपर्यधो वा युक्तो भवति । अपिशब्दो नियमार्थः । एकत्रैवेत्यर्थः । शकारषकारौ च सर्वथा सर्वेण प्रकारेण । रेफेणान्यैर्वा युक्तावसयुक्तौ वेति सर्वथाशब्दार्थः ॥

सर्वैरिति। परुषा वृत्ति में गिनाये गये और न गिनाये गये सभी वर्णों से ऊर्ध्व भाग मे सकार युक्त होता है। तथा सभी वर्ण गिनाये गये और न गिनाये गये ऊपर और नीचे दोनों भागों मे रेफ से क्रमशः अथवा एक साथ युक्त होते हैं। इसी प्रकार हकार एक स्थान पर ऊपर अथवा नीचे रेफ से युक्त होता है। अपि शब्द यहाँ नियम अर्थ में आया है—'एक ही स्थान पर'—यह उसका अर्थ है। शकार और षकार सब प्रकार से—तात्पर्य है कि रेफ से अथवा अन्य वर्ण से युक्त भी हो सकता है और अयुक्त भी॥

उदाहरणम्—

लिप्सून्सर्वान्स्तोऽन्तर्ब्रह्मोर्वैर्ब्राह्मणैर्वृतः पश्यन्।
जिहेत्यगर्ह्यबर्हिःशेषशयः कोपशून्यः सन्॥ २७॥

उदाहरण—

वेदपारगत ब्राह्मणों से घिरा हुआ, बचे हुये पवित्र कुश पर सोने वाला, तन्मात्रधन वह सभी याचकों को देखकर हृदय से लज्जित होता है॥ २७॥

लिप्सूनिति। कश्चिन्महासत्त्वो दत्तसर्वस्वोऽत्र वर्ण्यते। स महासत्त्वोऽन्तर्मध्ये जिहेति लज्जते। किं कुर्वन्। पश्यन्। कान्। लिप्सूंल्लब्धुकामान्। सर्वान्याचकानित्यर्थः। कीदृशः। वृतः परिगत। कैः ब्रह्मोर्वैर्वेदपारगैर्ब्राह्मणैः। पुनः कीदृक्। अगर्ह्यः प्रशस्तो यो बर्हिर्दर्भः स एव शेषमुर्वरितं तत्र शेते यः। तन्मात्रधन इत्यर्थः। लक्षणयोजना स्वयं कार्या॥

लिप्सूनिति। सर्वस्व त्याग कर देने वाले किसी महातेजस्वी का यहाँ वर्णन किया जा रहा है। वह महातेजस्वी हृदय से लजाता है। क्या करता हुआ? देखकर। किसे? लेने की इच्छा रखने वालों को अर्थात् सभी याचकों को। किस प्रकार होकर? घिरा हुआ। किनसे? वेद में पारगत ब्राह्मणों से। फिर किस प्रकार (वह तेजस्वी) होता है? अगर्ह्य अर्थात् अनिन्दनीय जो अवशेष कुश है उस पर जो सोता है (ऐसा तेजस्वी)। (वह) शय्या ही एक मात्र जिसका धन है—यह भाव है। लक्षण को स्वयं घटा लेना चाहिए॥

अथास्याः सर्वत्र प्रयोगनिवारणार्थमाह—

परुषाभिधायिवचनादनुकरणाच्चापरत्र नो परुषाम्।
रचयेद्यथागतिः स्यात्तत्रापि ह्रादयो हेयाः॥ २८॥

अब इसके सर्वत्र प्रयोग का निवारण करने के लिये कहते हैं—

कटु अर्थ वाली और अनुकरण से अतिरिक्त स्थलों में परुषा वृत्ति में

रचना नहीं करनी चाहिए। अगर कोई दूसरा मार्ग न हो तथापि ढ आदि (प्रयोगों) को (अवश्य) त्याग देना चाहिए ॥ २८ ॥

परुषेति। परुषाभिधायिवचनाभिप्रत्वप्रतिपादनपरगिरोऽनुकरणाचान्यत्र परुषां वृत्तिं न रचयेत्। अथागतिर्गत्यन्तराभावः स्यात्, तत्रापि ढाद्यो हेयास्त्याज्या। अत्यन्तपरुषत्वात्। केवल शषादिप्रयोगः कार्य॥

कठोर बात के प्रतिपादन और अनुकरण को छोड़कर परुषा वृत्ति में रचना नहीं करनी चाहिए। यदि परुषा का त्याग असम्भव हो तब भी वहाँ पर अत्यन्त कटु होने के कारण ढ आदि का त्याग तो अवश्य कर देना चाहिए। केवल श,ष आदि (वर्णों) का प्रयोग करना चाहिए॥

ललिताभद्रयोर्लक्षणमाह—

ललितायां घधभरसा लघवो लश्चापरैरसंयुक्तः।
परिशिष्टाभद्रायां पृथगथवा श्रव्यसंयुक्ताः॥ २९॥

अब ललिता और भद्रा का लक्षण बताते हैं—

लघु ध, घ, भ, रेफ, सकार, अन्य वर्णों से असंयुक्त ल (तथा) शेष (चारों वृत्तियों में न गिनाये गये) वर्ण भद्रा (वृत्ति) में होते हैं। वे चाहे संयुक्त हों या असंयुक्त (पर सदैव) कानों को सुख देते हैं॥ २९॥

ललितायामिति। ललितायां वृत्तौ घकारधकारभकाररेफसकारा भवन्ति। ते च लघवो न गुरवः। तथा लकारश्चापरैर्वर्णैरसंयुक्तः। आत्मना तु भवेदिति। भद्रायां तु वृत्तौ परिशिष्टा वृत्तिचतुष्टयोपयुक्तवर्णशेषाः। ते च पृथगसंयुक्ताः सन्ति। युक्ताश्चेद्भवन्ति तदा श्रव्यैः श्रुतिसुखैर्योज्या इति॥

ललितायामिति। ललिता वृत्ति में घकार, धकार, भकार, रेफ और सकार होते हैं। ये लघु होते हैं गुरु नहीं। इसके अतिरिक्त लकार अन्य वर्णों से संयुक्त नहीं होता है—अपने से संयुक्त हो सकता है। भद्रा वृत्ति में (पूर्वोक्त) चार वृत्तियों में गिनाये वर्णों के अतिरिक्त (वर्ण प्रयुक्त होते हैं)। और वे (वर्ण) अलग संयुक्त नहीं होते हैं। यदि वे संयुक्त होते हैं तो बड़े ही श्रुति मधुर होते हैं॥

ललितोदाहरणमाह—

मलयानिलललनोल्ललमदकलकलकण्ठकलकलललामः।
मधुरमधुविधुरमधुपो मधुरयमधुना धिनोति धराम्॥ ३०॥

ललिता का उदाहरण देते हैं—

मलयपवन के वेग से उत्कण्ठित मतवाली कोयलों की कूक से रमणीक, मधुर पराग से मत्त भ्रमरों वाला, यह वसन्त इस समय धरती को प्रसन्न कर रहा है॥ ३०॥

मलयेति। अयं मधुर्वसन्तोऽधुना धरा पृथ्वीं धिनोति प्रीणयति। किंभूतः। मलयानिलस्य मलयवायोर्वल्लनं गमनं तेनोल्ललाः सोत्कण्ठा मदकला मदमधुरा ये कलकण्ठाः कोकिलास्तेषां यः कलकलः कोलाहलस्तेन ललामः श्रेष्ठः। अथवा स एव ललामो ध्वजो यस्य स तथा। अन्यच्च मधुरेण मधुना मकरन्देन विधुरा मत्ता भ्रमरा यस्य स तथा। अत्रान्ये उदाहृता। घभसानां स्वयमुदाहरणं द्रष्टव्यम् ॥

मलयेति। यह मधु वसन्त इस समय पृथ्वी को प्रसन्न कर रहा है। कैसा है (वसन्त)? मलय पवन की जो गति है उससे उत्कण्ठित, मद के कारण मधुर स्वरवाले जो कोकिल हैं उनका जो मधुर स्वर है उसके कारण श्रेष्ठ। अथवा वह (कलकल) ही ध्वज है जिसका इस प्रकार का वह (वसन्त)। और भी—मधुर पराग से भौंरे जिसमें मतवाले हो रहे हैं इस प्रकार का वह (वसन्त)। यहाँ अन्य (वर्णों) का उदाहरण दिया गया। घ, भ और स का उदाहरण स्वयं खोज लेना चाहिए ॥

भद्रोदाहरणमाह—

उत्कटकरिकरटतटस्फुटपाटनसुपटुकोटिभिः कुटिलैः।
खेलेऽपि न खलु नखरैरुल्लिखति हरिः खरैराखुम् ॥ ३१ ॥

भद्रा (वृत्ति) का उदाहरण बताते हैं—

'हाथी के कठोर गण्डस्थल को सर्वथा फाड डालने में अत्यन्त दक्ष, अग्रभाग वाले टेढे तीक्ष्ण नखों से सिंह खेल में भी चूहे को कदापि नहीं कुरेदता है'॥३१॥

उत्कटेति। हरिः सिंहो न खलु नैव खेलेऽपि क्रीडायामप्याखुं मूषकमुल्लिखति विदारयति नखैः। कीदृशैः। उत्कटा दृढा ये करिकरटतटा द्विपगण्डस्थलानि तेषां यत्स्फुटं प्रकटं पाटनं दारणं तत्र सुष्ठु पटुर्दक्षा कोटिरग्रं येषां तैः। तथा कुटिलैरनृजुभिः खरैस्तीक्ष्णैः। अत्र कटखाः केवलाः केवलाः पूर्वत्र न प्रयुक्ता इति परिशिष्टत्वम् ॥

उत्कटेति। सिंह खेल में भी नखों से चूहे को नहीं कुरेदता है। कैसे (नखों से)? कठोर हैं हाथी के जो गण्डस्थल उनके चीर डालने में स्पष्ट ही जिनके अग्रभाग अत्यन्त दक्ष हैं, तथा जो टेढे हैं (और) तीक्ष्ण हैं। यहाँ बताये शुद्ध शुद्ध क, ट और ख पूर्वोक्त (चार वृत्तियों में) नहीं प्रयुक्त हुये हैं इसलिये (कारिका २९) में परिशिष्ट बताया गया ॥

अथाध्यायमुपसंहरन्नेता वृत्तयो रचिता रमणीया भवन्ति तथाह—

एताः प्रयत्नादधिगम्य सम्यगौचित्यमालोच्य तथार्थसंस्थम्।
मिश्राः कवीन्द्रैरघनाल्पदीर्घाः कार्या मुहुश्चैव गृहीतमुक्ताः ३२

आगे प्रस्तुत का उपसंहार करते हैं, किस प्रकार से रचना करने पर ये वृत्तियाँ रमणीय होती हैं उसे बताते हैं—

इन (वृत्तियों) को परिश्रम से रचना करे तथा अर्थगत औचित्य का भली-भाँति परामर्श करके महाकवि इनके पुनः पुनः परित्याग और ग्रहणपूर्वक, किसी एक के ही पीछे न पड़कर, स्वल्प या अधिक अक्षरों से इनका उपनिबन्ध करें ॥ ३२ ॥

एता इति । एता पूर्वोक्ता वृत्तयः कवीन्द्रैः सुकविभिर्मिश्राः परस्परान्तरिताः कार्याः । किं कृत्वा । अधिगम्य ज्ञात्वा प्रयत्नात्तात्पर्येण । कथम् । सम्यगविपरीतम् । तथा औचित्यमर्थगतस्थं पात्रगतमभिधेयगतं चालोच्य विमृश्य । कीदृश्यः सत्यो मिश्राः कार्या इत्याह—अघनाल्पदीर्घा । अघना असंहता । वृत्तौ वृत्तिर्निरन्तरलग्ना न कार्या । यदि वा अघना असंयोगाक्षरा । एवंविधा अल्पदीर्घा कर्तव्या । एकैव वृत्तिरत्यन्तायता न कार्या यदि वा अल्पानि दीर्घाणि दीर्घाक्षराणि यास्विति योज्यम् । एवंविधा अप्यन्तरान्तररहिता उद्वेगकारिण्यः श्रोतृणां स्युरित्याह—कार्या मुहुः पुनर्गृहीतमुक्ताः । मुहुर्मोक्षग्रहः कर्तव्यश्चानुक्रम इति ॥

एता इति । महाकवियों को एक दूसरे से अन्तरित करके पहले बतायी गयी इन वृत्तियों की रचना करनी चाहिए । क्या करके ? तात्पर्य (प्रयोजन) को भली भाँति जान कर । कैसे ? सम्यक् अर्थात् (अविरुद्ध रूप में समझ कर) । तथा (उत्तम आदि) पात्रों और प्रतिपाद्य के औचित्य का भली भाँति परामर्श करके । किस प्रकार से अन्तरित (मिश्रित) करके रचना करनी चाहिए—कहते हैं—अघनाल्पदीर्घ रूप में । अघन अर्थात् असहत रूप से । वृत्ति में एक ही वृत्ति की अविराम रचना नहीं करनी चाहिए । अथवा जिसमें संयुक्त अक्षर न हों—यह अघन का अर्थ है । इस प्रकार की भी वृत्तियों को थोड़ी ही दूर तक रचना चाहिए । एक ही वृत्ति का अत्यधिक विस्तार नहीं करना चाहिए । अथवा थोड़े ही हैं दीर्घ (अक्षर) जिन (वृत्तियों) में—इस प्रकार विच्छेद करना चाहिए । (वृत्तियाँ) इस प्रकार की भी होने पर श्रोताओं के लिये उद्वेगकारी हो जायेगी—इस शंका का निराकरण करते हैं—पुन. पुन. वृत्तियों को, परित्याग और ग्रहणपूर्वक रचना करनी चाहिए ॥

इति श्रीरुद्रटकृते काव्यालङ्कारे नमिसाधुविरचितटिप्पणसमेतो
द्वितीयोऽध्यायः समाप्तः ।

तृतीयोऽध्यायः

अथेदानीं यमकलक्षणमाह—

तुल्यश्रुतिक्रमाणामन्यार्थानां मिथस्तु वर्णानाम् ।
पुनरावृत्तिर्यमकं प्रायश्छन्दांसि विषयोऽस्य ॥ १ ॥

अब यमक का लक्षण बताते हैं—समान उच्चारण और क्रमवाले परस्पर भिन्नार्थक वर्णों की दुबारा आवृत्ति को यमक कहते हैं। प्रायः छन्द ही इस (यमक) के विषय हैं ॥ १ ॥

तुल्येति । पुनरावृत्तिः पुनरुच्चारणं वर्णानां तद्यमकम् । कीदृशानाम् । समाना श्रुतिः श्रोत्रेन्द्रियोपलब्धिः क्रमश्च परिपाटी येषाम् । श्रुतिग्रहणादत्र वर्णविकारेण पत्वरत्वादिना वपुष्टा वपुस्ता इत्यादौ तथा पुनर्गवा पुना रौतीत्यादौ च सत्यपि क्रमे तुल्यश्रुतित्वाभावरत्र यमकत्वनिरासः । क्रमग्रहणात्प्रतिलोमानुलोमसर्वतोभद्रानुप्रासादीनां यमकत्वनिरासः । नहि तेषु तुल्यश्रुतिसद्भावेऽपि तुल्यक्रमो विद्यते । मिथोऽन्यार्थानां परस्परं भिन्नार्थानाम् । इत्यनेन तु पुनरुक्तस्य यमकत्वव्युदासः । यथा 'अहो रूपमहो रूपमहो मुखमहो मुखम् । अहो कान्तिरहो कान्तिस्सारयाः सारङ्गचक्षुषः ॥' इत्यादिषु । अन्यार्थानामित्यत्रार्थशब्दः प्रयोजनवाच्यपि । तेनेहापि यमकत्वं सिद्धं भवति । 'विजृम्भितोद्दामरसेन चेतसा निरूप्यमाणं किमपि प्रियावपुः । सदैव वैराग्यवता विभागशो निरूप्यमाणं किमपि प्रियावपुः ॥' अत्र हि वर्णानामेकाभिधेयत्वेऽपि प्रयोजनं भिद्यते । अस्य च यमकस्य प्रायो बाहुल्येन चच्छन्दांसि पद्यं विषयः । प्रायोग्रहणाद्गद्यमपि क्वापीति ॥

तुल्येति । वर्णों का पुनः उच्चारण—वह यमक है । कैसे (वर्णों का)! जिनकी श्रुति और परिपाटी समान है । जहाँ वर्ण के विकार के कारण पत्व, रत्व आदि के द्वारा 'वपुष्टा' 'वपुस्ता' आदि में और 'पुनर्गवा पुनारौति' आदि में क्रम के होने पर भी श्रुति की समानता नहीं होती है वहाँ यमक नहीं होता है—श्रुति का (कारिका में) इसी प्रयोजन से उपादान किया गया है। क्रम के ग्रहण करने से, प्रतिलोम, अनुलोम, सर्वतोभद्र, अनुप्रास आदि से यमक का क्षेत्र बिल्कुल पृथक् हो गया । उनमें श्रुति की समानता होने पर भी क्रम की समानता नहीं होती है । (फिर किस प्रकार के वर्णों का!) परस्पर जिनके अर्थ

भिन्न हैं। इससे पुनरुक्त का यमक होना खण्डित हो गया—जैसे उस मृगनयना का कैसा रूप है, कैसा मुख है, क्या ही कान्ति है, क्या ही कान्ति है। आदि उदाहरण में। 'अन्यार्थानाम्' में अर्थ शब्द प्रयोजन का भी वाचक है। अतएव प्रयोजन भिन्न होने पर भी यमक सिद्ध हो जाता है। 'निरधित अर्थवाचक रस से निर्भर चित्त से निरूपण करने पर प्रेयसी की काया क्या ही सुन्दर होती है (तथा) उसी क्षण विरक्त के अङ्ग-अङ्ग को अलग अलग निरूपण करने पर प्रेयसी की काया क्या हो जाती है' यहाँ वर्णों के प्रतिपाद्य के एक होने पर भी प्रयोजन भिन्न हैं। इस यमक के प्रायः छन्द ही विषय हैं। कहीं कहीं गद्य में भी यमक होते हैं (कारिका में) प्रायः पद के उपादान का यही प्रयोजन है।

अथ परोक्तयमकभेदान्निरस्यन्स्वाभिमतयमकभेदाल्लक्षणाभिधानायाह—

पूर्वं द्विभेदमेतत्समस्तपादैकदेशजत्वेन ।
पादार्धश्लोकानामावृत्त्या सर्वजं त्रेधा ॥ २ ॥

अब (भामह आदि) अन्य आलंकारिकों के द्वारा गिनाये गये यमक के भेदों का निराकरण करते हुए अपने अभिमत भेदों के लक्षण बताने के लिये कहते हैं—सर्वप्रथम इस (यमक) के दो भेद होते हैं—समस्त पादगत और एकदेशगत। उसमें समस्तपादगत के पादावृत्त, अर्धावृत्त और श्लोकावृत्त—ये तीन भेद होते हैं ॥ २ ॥

पूर्वमिति। पूर्वं मूलभेदापेक्षया एतद्यमकं द्विभेदम्। केन भेदेनेत्याह—समस्तेत्यादि। तत्र समस्तपादश्च समस्तपादौ च समस्तपादाश्चेत्येकशेषः। तथा एकदेशश्च एकदेशौ च एकदेशाश्चेति। समस्तपादजमेकदेशजं चेति भेदद्वयम्। अत्र च वक्ष्यमाणभेदाः सर्वेऽप्यन्तर्भवन्तीति पञ्चधा चतुर्दशधा चेति परोक्तवचनव्युदास इति। तत्र समस्तपादजप्रभेदानाह—पादार्धेत्यादि। पादावृत्त्या अर्धावृत्त्या श्लोकावृत्त्या च समस्तपादजं त्रेधा भवति ॥

पूर्वमिति। सर्वप्रथम मूलभेद को अपेक्षित करके यह यमक दो प्रकार का होता है। किस भेद से (दो प्रकार का होता है) इसे बताते हैं—समस्त आदि। एक समस्तपाद, दो समस्तपाद और अनेक समस्तपाद—इस प्रकार एकशेष (द्वन्द्व समास) हुआ। इसी प्रकार एक एकदेश, दो एकदेश और अनेक एकदेश (एक शेष द्वन्द्व-समास) हुआ। समस्तपादगत और एकदेशगत—ये दो भेद हुये। आगे बताये जाने वाले सभी भेदों का अन्तर्भाव इसी में हो जायगा। अतएव अन्य लोगों द्वारा बताये पाँच भेद या चौदह दभे

आदि का खण्डन हो जाता है। इनमें समलपादगत के भेद बताते हैं—पादार्धेत्यादि। पाद की आवृत्ति, आधे (छन्द) की आवृत्ति और श्लोक की आवृत्ति होने से समलपादगत तीन प्रकार का होता है॥

तत्रापि पादावृत्तेस्तावद्भेदानाह—

पर्यायेणान्येषामावृत्तानां सहादिपादेन।
मुखसंदंशावृतयः क्रमेण यमकानि जायन्ते॥ ३॥

अब उनमें पादावृत्त के भेदों को बताते हैं—

प्रथम पाद के साथ द्वितीय आदि पादों के आवृत्त होने पर क्रमशः मुख, सदंश और आवृति (नामक) यमक-भेद होते हैं॥ ३॥

पर्यायेणेति। पर्यायेण क्रमेणान्येषां द्वितीयादीनां त्रयाणां पादानामादिपादेन सहावृत्तानां यमकिनानां मुखसदंशावृतिसंज्ञितानि क्रमेण यथासंख्यं यमकानि त्रीणि जायन्ते भवन्तीति॥

पर्यायेणेति। क्रमशः द्वितीय आदि (द्वितीय, तृतीय और चतुर्थ) तीन पादों के प्रथम पाद के साथ आवृत्त होने पर क्रमशः मुख, सदंश और आवृत्ति नामक तीन प्रकार के यमक होते हैं॥

तदुदाहरणानि क्रमेणाह—

चक्रं दहतारं चक्रन्द हतारम्।
खड्गेन तवाजौ राजन्नरिनारी॥ ४॥

(अब) इनके उदाहरण देते हैं—

रण में शत्रुसमूह को नष्ट करती हुयी तुम्हारी तलवार से मारी गयी रिपु-रमणी विलाप करने लगी॥ ४॥

चक्रमिति। कश्चिन्नृपमाह—हे राजन्, तव संबन्धिना खड्गेनाजौ रणे आरं रिपुसक्तं चक्रं समूहमरं शीघ्रं दहता नता अरिनारी रिपुस्त्री भर्तृवधेन हता पाडिता सती चक्रन्द। क्रन्दितवतीत्यर्थः। इति प्रथमद्वितीयपादयमकं मुखसंज्ञम्॥

चक्रमिति। कोई राजा से कह रहा है—हे राजन्! शत्रुओं के समुदाय को वेगपूर्वक नष्ट करती हुई तुम्हारी तलवार से पति की हत्या हो जाने के कारण (स्वयं) हत हुई शत्रुरमणी रोने लगी अर्थात् चिल्ला पड़ी। यहाँ द्वितीय पाद के प्रथम पाद के साथ आवृत्त होने पर मुख नामक यमक हुआ।

अथ संदंशः—

सभारिभरणोमायमाराध्य विधुशेखरम्।
सभारिभरणोऽमायस्ततस्त्वं पृथिवीं जय॥ ५॥

अब सदश का उदाहरण देते हैं—

साध्वी स्त्रियों का भरण तथा उमा के साथ रमण करने वाले शिव की आराधना करके, रण में शत्रु के हाथियों को मारने वाले सात्विक (सदाचारी) तुम पृथिवी को जीतो ॥ ५ ॥

सन्नारीति। कश्चिन्नृपस्याशिषमाह—त्वं विधुशेखरं हरमाराध्य तत. पृथिवीं जय। कीदृशं हरम्। सत्यश्च ता नार्यश्च सन्नार्यः साध्व्यः स्त्रियस्ता बिभर्ति पोषयतीति सन्नारीभरण' स चासावुमायश्च। उमा पार्वती ता याति गच्छति तया सह संयुज्यते यस्तं तथाविधम्। त्वं कीदृशः। सन्ना खिन्ना अरीभा रिपुद्विपा यत्र स तथाविधो रण संग्रामो यस्य स तथा। पुन. कीदृश'। अमायो मायारहितः। सात्त्विक इत्यर्थः। अत्र प्रथमतृतीयपादयो संदष्टनामकं यमकम् ॥

सन्नारीति। कोई राजा को आशीर्वाद दे रहा है—तुम शिव की आराधना करके पृथ्वी को जीतो। शिव कैसे? सती हैं और नारी हैं जो वे हुयीं सन्नारी-साध्वी स्त्रियाँ उनका जो धारण पोषण करता है वह है सन्नारीभरण—वह और उमाय। उमा पार्वती—उसे प्राप्त होता है—उसके साथ रमण करता है जो—ऐसे शिव को। तुम (राजा) किस प्रकार के। सन्न अर्थात् व्याकुल कर दिये गये हैं शत्रुओं के हाथी जिसमें ऐसा जिसका सङ्ग्राम होता है (वह तुम)। और कैसे—अमाय माया से शून्य अर्थात् सात्त्विक। यहाँ तृतीय पाद के प्रथम पाद के साथ आवृत्त होने के कारण सदष्ट (नामक) यमक है ॥

अथावृत्ति'—

मुदारताडी समराजिराजितः प्रवृद्धतेजाः प्रथमो धनुष्मताम्।
भवान्बिभर्तीह नगश्च मेदिनीमुदारताडीसमराजिराजितः ॥६॥

अब आवृत्ति (का उदाहरण देते हैं)—

हर्षपूर्वक शत्रुसमूह को मारने में कुशल, रणाङ्गण में अपराजेय, अत्यधिक तेजस्वी, धनुर्धरों में मुख्य आप और ऊँची ताड वृक्षों की पंक्तियों से सुशोभित पर्वत इस लोक में पृथ्वी को धारण करते हैं ॥ ६ ॥

मुदेति। कश्चिच्चाटुकृन्नृपमाह—इह भवांश्च नगश्चाद्रिश्च मेदिनीं भुवं बिभर्ति पोषयति धारयते च। कीदृशस्त्वम्। मुदा हर्षेण, न भयेन, आरताडी रिपुसमूहताडनशील। तथा समराजिरे रणाङ्गणेऽजितोऽपराभूतः। तथा प्रवृद्धतेजाः प्रथितप्रताप.। धनुष्मतां धानुष्काणां प्रथमो मुख्य। नग. कीदृश। उदारा उन्नता यास्ताड्यस्तालवृक्षास्तासां समा अविषमा या राजयः पङ्क्तयस्ताभी राजितः शोभितः। इह चतुर्थपादयमकमावृत्तिर्नाम ॥

मुदेति—कोई चापन्द्रस राजा से कह रहा है—इस लोक में आप और पर्वत पृथ्वी का धारण और पोषण करते हैं। तुम कैसे ? प्रसन्नतापूर्वक, भय से नहीं, शत्रु मण्डल का वध करना जिसका स्वभाव है। फिर कैसे—जो रणाङ्गण में अपराजेय है तथा जिसका तेज अत्यधिक बढ़ गया है जो धनुर्धरों में अग्रगण्य है—ऐसा तुम (राजा)। पर्वत कैसा—ऊँची ऊँची हैं जो सम ताड़-पंक्तियाँ उनसे जो शोभित है। यहाँ चतुर्थपाद के प्रथम पाद के साथ आवृत्त होने के कारण आवृति नामक यमक हैं।

भेदान्तरमाह—

प्रत्येकं पश्चिमयोरावृत्त्या पादयोर्द्वितीयेन ।
यमके संज्ञायेते गर्भः संदष्टकं चेति ॥ ७ ॥

और भी भेद गिनाते हैं—

तृतीय और चतुर्थ पाद के द्वितीय पाद के साथ आवृत्त होने पर गर्भ और संदष्टक नामक यमक के पृथक् भेद होते हैं ॥ ७ ॥

प्रत्येकमिति। पश्चिमयोस्तृतीयचतुर्थपादयोर्द्वितीयेन पादेन सहावृत्त्या प्रत्येकं पृथग्यमके संज्ञायेते भवतो गर्भसंदष्टकसंज्ञिते ॥

प्रत्येकमिति। पश्चिम अर्थात् तृतीय और चतुर्थ पाद के द्वितीय पाद के साथ आवृत्त होने पर गर्भ और संदष्टक नामक यमक के भिन्न भेद होते हैं ॥

तत्र गर्भोदाहरणम्—

यो राज्यमासाद्य भवत्यचिन्तः समुद्रतारम्भरतः सदैव ।
समुद्रतारं भरतः स दैवप्रमाणमारभ्य पयस्युदास्ते ॥ ८ ॥

उनमें गर्भ का उदाहरण दे रहे हैं—

जो राज्य को पाकर निश्चिन्त हो जाता है और हर्षपूर्वक सदैव विलास में रत रहता है वह पूर्वसञ्चित को प्रमाण मानकर बलपूर्वक समुद्रपार करने का उद्यम करके जल के बीच में निष्क्रिय हो जाता है ॥ ८ ॥

य इति। यः पुरुषो राज्यं प्राप्य तस्य रक्षणादौ निश्चिन्तो भवति। तथा प्राप्तं राज्यमिति समुत्सहर्षः। यो रतारम्भरतः सदैव निधुवनप्रारम्भासक्तः। सततं स तथाविधनृपो भरतो भरेण समुद्रतारं जलनिधितरणं बाहुभ्यामारभ्य पयसि जलमध्य उदास्ते निष्क्रियो भवति। कथम्। दैवं पुराकृतं कर्म प्रमाणं यत्र तत्तथेति क्रियाविशेषणम्। यः प्राप्तराज्यो निरुद्यमः स बाहुतरणप्रवृत्तजलधिमध्यस्थितनिष्क्रियनरतुल्य इत्यर्थः। इति मध्यमपादयोर्गर्भो नाम यमकम् ॥

य इति। जो पुरुष राज्य पाकर उसकी रक्षा आदि के विषय में निश्चिन्त हो जाता है। तथा राज्य तो मिला ही है यह समझकर प्रसन्न रहता है—जो सदैव भोग-विलास में आसक्त रहता है। वह पुरुष मदैव कष्टपूर्वक भुजाओं से समुद्र पार करने का उद्यम कर के जल-धार में पड़कर निश्चेष्ट हो जाता है। दैव (अर्थात्) पूर्व जन्म में किये गये कर्म ही जिसमें प्रमाण हैं इस प्रकार यह-यह क्रियाविशेषण है। राज्य पाकर जो मनुष्य उद्यमहीन हो जाता है वह भुजाओं से ही सागर पार कर जाने के लिये प्रयास करनेवाले यह मध्य में पड़े हुये निश्चेष्ट मनुष्य के समान होता है—यह तात्पर्य है। यहाँ मध्यम पादों में आवृत्ति होने के कारण गर्भनामक यमक है।

अथ सदष्टकम्—

इदं च येन स्वयमात्मभोग्यतां समस्तकाञ्चीकमनीयताकुलम्।
नितम्बबिम्बं कथमस्तु नो नृणां स मस्तकाञ्ची कमनीयताकुलम् ॥९॥

'यह संदष्टक के उदाहरण का अनुवाद है'—

भली प्रकार निश्चित मेखला वाले, रमणीयता के स्थान, चञ्चल श्रोणीतट को जिसने अपने भोग का विषय बनाया वह मनुष्यों में मूर्धाभिषिक्त क्यों न हो ॥९॥

इदमिति। कश्चिद्रागी परस्त्रियं दृष्ट्वा कञ्चिदाह—इदं नितम्बबिम्बं श्रोणीतटं येन स्वयमसहायेनात्मभोग्यतां स्वोपकारितामनीयत नीतं स तथाविधो नृणां पुंसां मस्तकाञ्ची शिरोवर्ती कथं नो अस्तु कथं मा भूत्। सौभाग्यातिशयवानित्यर्थः। कीदृशं कटितटम्। आकुलं प्रयोगवशाच्चटुलमत एव समस्ता सम्यक्क्षिप्ता काञ्ची मेखला यत्रास्तत्समस्तकाञ्चीकम्। तथा च कमनीयतायाः रामणीयकस्य कुलं स्थानम्। अत्र द्वितीयचतुर्थ पादयोः सदष्टयमकम् ॥

इदमिति। कोई परायी स्त्री को देखकर किसी से कह रहा है—इस श्रोणीतट को अकेले ही जिसने अपने भोग के लिये उपलब्ध कर लिया ऐसा वह मनुष्य पुरुषों में शिरोवर्ती (अग्रगण्य) क्यों न होगा? अर्थात् अत्यधिक सौभाग्यशाली होगा। कैसे श्रोणीतट को—आकुल (अर्थात्) पकड़ने आदि के कारण जिससे कटिसूत्री दूर हट गयी है। और भी, जो (श्रोणीतट) सुन्दरता का निदान है। यहाँ चतुर्थ पाद के द्वितीय पाद के साथ आवृत्त होने के कारण सदष्टक यमक है॥

पुनराह—

अन्योन्यं पश्चिमयोगवृत्त्या पादयोर्भवेत्पुच्छः।
सर्वैः सार्धं युगपत्प्रथमस्य तु जायते पङ्क्तिः ॥ १० ॥

आगे कहते हैं—

तृतीय चतुर्थ पादों में परस्पर आवृत्ति होने पर दूसरा पुच्छ नामक यमक होता है। प्रथम पाद की एक साथ अन्य पादों से आवृत्ति होने पर पङ्क्ति नामक यमक होता है॥ १०॥

अन्योन्यमिति। पश्चिमयोस्तृतीयचतुर्थपादयो. परस्परावृत्त्या पुच्छो नाम यमकं भवेत्। तथा प्रथमपादस्य सर्वैस्त्रिभिरन्यैः सार्धं युगपत्सम-कालमावृत्त्या पङ्क्तिर्नाम यमकं जायते॥

अन्योन्यमिति। पश्चिम तृतीय, चतुर्थ पादों में परस्पर आवृत्ति होने पर पुच्छ नामक यमक होता है। तथा प्रथम पाद की शेष तीनों पादों के साथ सम काल में हो आवृत्ति होने पर पङ्क्ति नामक यमक होता है॥

तत्र पुच्छः—

उत्तुङ्गमातङ्गकुलाकुले यो व्यजेष्ट शत्रून्समरे सदैव।
स सारमानीय महारि चक्रं ससार मानी यमहारिचक्रम्॥११॥

आगे पुच्छ का उदाहरण देते हैं—

बड़े बड़े हाथियों से खचाखच भरे हुए रण में जिसने शत्रुओं को सदैव हत्या का है वह मानी यमराज को भी मार डालने वाला, उत्कृष्ट बड़े बड़े अरों वाले चक्र को लेकर शत्रु की सीमा में प्रवेश कर गया॥ ११॥

उत्तुङ्गेति। कश्चिद्वीरो वर्ण्यते—स मानी मानवानरोऽरिचक्रं रिपुराष्ट्रं ससार जगाम। कीदृश.। य. समरे रणे। कीदृशे। उत्तुङ्गमातङ्गकुलाकुले उन्नतद्विपसमूहसंकुले सदैव सर्वदैव व्यजेष्टाभ्यभूत्, शत्रून्रिपून्। कथम्। सारमुत्कृष्टं महारि महद्भिररैर्युक्तं चक्रमायुधविशेषमानीयादाय। कीदृशो मानी। यमं दुर्गमं कृतान्तमपि वा हन्तीति यमहा॥

उत्तुङ्गेति। किसी वीर का वर्णन किया जा रहा है—वह मानी शत्रु के राज्य में प्रवेश कर गया। कैसा (मानी)। जो लड़ाई में—कैसी (लड़ाई में)—जो बड़े बड़े हाथियों से खचाखच भरी थी। सदैव शत्रुओं को मारता था। किस प्रकार—सुन्दर बड़े बड़े अरों वाले चक्र को लेकर। (फिर) कैसा मानी—जो यम अथवा काल को भी मार डालने वाला है॥

अथ पङ्क्त्युदाहरणम्—

सभाजनेनोपरि पूरितासौ सभाजने नोपरिपूरितासौ।
सभा जनेनोऽपरिपूरितासौ सभाजने नोऽपरिपूरितासौ॥१२॥

आगे पङ्क्ति का उदाहरण दे रहे हैं—

शत्रु के समीप में तलवार को न उठाये हुये, पुरवासियों के प्राणों के अनाप्यायित होने पर (तथा) पूजा के न पाने पर सभा में आये हुये पुरवासियों के पीछे से मन्त्रिगण आ पहुँचे जिससे राजा तेजस्वी हो गया और हम लोगों के पूजक पुरवासियों का रक्षक हो गया ॥ १२ ॥

सभाजनेनेति। 'कस्यचिद्राज्ञो मन्त्रिणः पौरैस्तिरस्कृताः। ततस्तस्य स्वसभ्याधिक्षेपजातकोपस्यापरागभयात्पौराननिगृह्णतः कान्तिभ्रंशो बभूव। तत कस्मिंश्चिदवसरे ते सभ्या लब्धावसराः सन्तः पौराणामुपरि कटकयात्रामदुः। ततस्ते पौरा निरायुधाः सन्तः पराजिग्यिरे। ततो राजा परितुष्टः पुनरात्मीयां कान्तिमाप' इति समुदायार्थः। पादानां त्वेवं योजना। कश्चित्सभ्य परस्य कथयति—सभाजनेन सभ्यलोकेन। मन्त्रिजनेनेत्यर्थः। उपरि पृष्ठतः, पुः पौरजनता। इता प्राप्ता, असौ। एषा पौराणां पृष्ठतः सभ्या आगता इत्यर्थः। कदा। सभां सभालोकमजति क्षिपतीति सभाजनस्तस्मिन्पौरजने। न उपरिपु शत्रुसमीपे सभ्यसन्निधाने ऊरिता असयः खड्गा येन स ऊरितासिस्तस्मिन्नेवंविधे। अनुद्यतखड्ग इत्यर्थः। अत एव जनानामिन स्वामी जनेनो राजा, सह भासा वर्तते इति सभाः सदीप्तिक संवृत्तः। अन्यच्च कीदृशे पौरलोके। अपरिपूरिता अनाप्यायिता असवः प्राणा यस्यासौ तथोक्तस्तस्मिन्। मृततुल्य इत्यर्थः। तथा सभाजने। 'सभाज प्रीतिदर्शने' इत्यस्मात्कर्तरि ल्युट्। नोऽस्माकं प्रीतिकरे। पूजक इत्यर्थः। कथम्। अपगता रिपवो यत्रावने तत्तथेति क्रियाविशेषणम्। किंभूते पौरलोके। इतासौ इता प्राप्ता असुः अपूजा येन तस्मिन्। अधिगतमानभ्रंश इत्यर्थः। 'परिप्रतिगतार्थौ तु सु पूजायां यदा भवेत्। अतिरतिक्रमणे चैव नोपसर्गा इमे तदा ॥' इति सर्वपादजं पङ्क्तियमकम् ॥

सभाजनेनेति। पुरवासियों ने किसी राजा के मन्त्रियों का तिरस्कार कर दिया। तब (वह) अपने सभ्यजनों के अपमान के कारण उत्पन्न क्रोध के न छिपने के भय के कारण पुरवासियों का दमन न करने के कारण कान्ति भ्रष्ट हो गया। तब किसी अवसर पर उन मन्त्रियों ने अवसर पाकर पुरवासियों पर चढ़ाई कर दिया। तब वे पुरवासी आयुध-विहीन होने के कारण पराजित हो गये। तब उससे सन्तुष्ट होकर राजा ने अपना तेज प्राप्त किया—यह छन्द का अर्थ है। (छन्द के) पादों का योजना इस प्रकार करनी चाहिए—कोई मन्त्री दूसरे से कहता है—सभाजनेन सभ्यलोकेन। (अर्थात्) मन्त्रियों के द्वारा पीछे से यह पुरवासी गण। प्रवेश किया। इन पुरवासियों के पीछे से मन्त्रिगण आये—

यह अर्थ है। कब? सभा को जाने के लिये पुरवासियों के तैयार होने पर। शत्रु के समीप में (अर्थात्) मन्त्रियों के समीप में जिन्होंने तलवार नहीं उठायी वे हुये—नोपरि पूरितासि। अर्थात् तलवार को नीचे किये हुये। अतएव प्रजा—पालक स्वामी, राजा तेजस्वी हो गया। फिर कैसे पुरवासियों में—जिनके प्रण परिपूरित आप्यायित नहीं है ऐसे अर्थात् मृततुल्य। तथा सभाजने। 'सभाज प्रीतिदर्शने' से कर्ता में ल्युट् प्रत्यय हुआ। हमारे प्रीतिकर अर्थात् पूजक (पुरवासियों में)। अतएव हमारा प्रकरण में (वर्णित राजा) रक्षक हो गया। कैसे? जिस रक्षण में शत्रु अब हैं ही नहीं। (फिर) कैसे पुरवासियों में—जिन्हें अपमान मिल चुका है। अर्थात् जिनका मान भ्रष्ट हो गया है। इस प्रकार सभी पादों में आवृत्त होने के कारण यह पङ्क्ति यमक हुआ।

भूयोऽपि भेदान्तरमाह—

परिवृत्तिर्नाम भवेद्यमकं गर्भावृतिप्रयोगेण।
मुखपुच्छयोश्च योगाद्युग्मकमिति पादजं नवमम्॥ १३॥

आगे और भी भेद बताते हैं—गर्भ और आवृति नाम के यमकों के प्रयोग से परिवृत्ति नामक यमक होता है। मुख और पुच्छ के योग से समस्त पादगत युग्मक नामक यमक का नवाँ भेद होता है॥ १३॥

परिवृत्तिरिति। पूर्वोक्तगर्भावृतियमकयोर्युगपद्योगे वृत्तिर्नाम यमकं भवति। तथा पूर्वोक्तमुखपुच्छयोर्युगपद्योगाद्युग्मकं नाम समस्तपाद-संभवं नवमं यमकं भवति॥

परिवृत्तिरिति। पहले बताये गये गर्भ और आवृति नामक यमकों का एकत्र योग होने पर परिवृत्ति नामक यमक होता है। पूर्वोक्त मुख और पुच्छ का एकत्र योग होने पर समस्त पादगत नवाँ यमक भेद होता है॥

तत्र परिवृत्त्युदाहरणम्—

मुदा रतासौ रमणी यता यां स्मरस्यदोऽलं कुरुतेन वोढा।
स्मरस्यदोऽलंकुरुतेऽनवोढामुदारतासौ रमणीयतायाम्॥१४॥

उनमें परिवृत्ति का उदाहरण देते हैं—

निश्चय ही जिसको तुम विवाह करने वाले कुत्सित स्वर से स्मरण कर रहे हो वह रमणी प्रेमवश आसक्त है क्योंकि तुम्हारे लिये छटपटा रही है। रमणीयता में यही औचित्य है कि कामावेश प्रगल्भा को भूषित करता है॥ १४॥

मुदेति। एतन्मानिन्याः सखी अनुनयप्रत्याख्यानभयादपसृतं नायक-माह—असौ रमणी स्त्री त्वयि रता। मुदा प्रीत्या। न तु धनलोभादिना।

यता त्वदागमनार्थं प्रयत्नपरा। या त्व योढा परिणेता। अहोऽलं निःसन्देहं स्मरसि ध्यायसि। कीदृशस्त्वम्। कुरुतेनोपलक्षितः। कुत्सितं रुतं कुरुत तेन। यत्पुरुषस्य धैर्यच्युतिप्रकाशकमत एव तत्स्मरणपरिज्ञानम्। ननु यदि सा मानिनी तत्किमनुनयार्थं त्व प्रेषितेत्याह—यस्मादुदारतासौ औचित्यमिदम्। रमणीयतायां रमणीयत्वे। यत्स्मरस्यद. कामोद्रेकोऽलङ्कुरुते भूषयति। अवोढा प्रगल्भा नायिकाम्॥

मुदेति। किसी मानिनी की सखी विनय के तिरस्कार के भय से दूर हट गये नायक से इसे कह रही है—यह स्त्री तुममें आसक्त है। प्रेम के कारण न कि सम्पत्ति के लोभ आदि के कारण। (वह) तुम्हारे आगमन के लिये प्रयत्न रही है। जिससे तुम विवाह करोगे (वह) निश्चय ही तुम्हारा ही ध्यान कर रही है। तुम कैसे हो—कुरुत से उपलक्षित—कुत्सित रुत (शब्द) हुआ कुरुत उससे, जो (कुरुत) पुरुष के धैर्य भङ्ग होने का प्रकाशक है अतएव उसका स्मरण ही (नायिका का तुम्हारे प्रति आसक्त) होना बता देता है। यदि वह मानिनी ही है तो अनुनय करने के लिये तुम क्यों भेजी गयी—इसे कहते हैं—यही औचित्य है रमणीयता में कि कामावेश अविवाहिता प्रगल्भा नायिका को अलङ्कृत करता है॥

अथ युग्मकम्—

विनायमेनो नयताऽसुखादिना विना यमेनोनयता सुखादिना।
महाजनोऽदीयत मानसादरं महाजनोदी यतमानसादरम्॥१५॥

अब युग्मक (का उदाहरण देते हैं)—

सुखादि से रहित करनेवाले प्राण—भक्षणशील यम शुभ कर्म करनेवाले पक्षीरूप इस हंस (आत्मा) और अशुभ कर्म करनेवाले दुष्टों को नष्ट करता है। हृदय से (प्राण-रक्षण के लिये) प्रयत्न करने पर भी (आत्मा) को शरीर से शीघ्र अलग कर देता है॥ १५॥

विनेति। कश्चित्कञ्चिदाह—अयं महाजनः सत्पुरुषलोकः। एनोऽपराधं विना। अनपराध इत्यर्थः। अदीयत खण्ड्यते स्म। केन। यमेन। किं कुर्वता यमेन। नयतात्मसमीपं प्रापयता। तथाऽसुखादिना प्राणभक्षणशीलेन। ऊनयता महाजनमनीकुर्वता। सुखादिना सौख्यभक्षकेण। अथवा सुखादिनार्थेन न्यूनयता। कीदृशो महाजनः। विना विगता नरो यस्मात्। यम प्रति पुरुषकारविकलत्वाद्विपुरुष इत्यर्थः। बहुलत्वात्को न भवति। यद्वा विनष्टो ना पुरुषो विना। पुनः महाजनः कीदृशः। मानसान्मानमहंकारं साद्यतीति मानसाद्रिपूणाम्। यदि वा

मानसाच्चित्तात्सकाशात्सुखादिना। तथा महाजनोदी महमुत्सवमजन्ति क्षिपन्ति महाजा दुर्जनास्तान्नुदति प्रेरयतीति महाजनोदी। कथमदो-यत। अरं शीघ्रम्। तथा यतमानसादरं यतमानाना मरणप्रतिक्रियाव्या-पृतानां सादं खेदं राति ददातीति च क्रियाविशेषणम्॥

विनेति। इस सत्पुरुष लोक की अपराध के बिना ही कटाई की जाती है। किससे। यम से। क्या करते हुये? अपने पास में ले जाते हुए तथा प्राणों को खाते हुये तथा सत्पुरुषों को यम करते हुये। (फिर कैसे यम से)? सुख आदि को नष्ट कर देनेवाले अथवा सुख आदि को कम करनेवाले। महाजन कैसा? मनुष्यों से शून्य! यम के प्रति पौरुष के विफल हो जाने के कारण बिना (पौरुषहीन) कहा गया। बहुल होने के कारण क (प्रत्यय) नहीं होता है। अथवा नष्ट हो गये हैं मनुष्य जिसके (ऐसा समास मानना चाहिए)। फिर कैसा महाजन? शत्रुओं का मानसाद् अर्थात् अहंकार को नष्ट करनेवाला। अथवा मन से। तथा उत्सव को नष्ट करनेवाले दुष्टों का दमन करनेवाला। कैसे कटाई की गयी—शीघ्र एवं यम की शय्या पर पौढे हुये लोगों को कष्ट पहुँचा कर—इस प्रकार क्रियाविशेषण (पद समझना) चाहिए।

एतानि नव यमकानि समस्तपादयोक्तानि। अधुना समस्तपादयोः समस्तपादाना चाह—

अर्धं पुनरावृत्तं जनयति यमकं समुद्गकं नाम।
श्लोकस्तु महायमकं तदेवमेकादशैतानि॥ १६॥

समस्तपाद यमक के ये नव भेद बताये गये। अब दो समस्तपाद और अनेक समस्तपाद यमकों के भेद बताते हैं—

पूर्वार्ध के दुबारा आवृत्त होने पर समुद्गक नामक यमक होता है। श्लोक (के आवृत्त होने पर) महायमक (होता है)। इस प्रकार ये ग्यारह प्रकार के समस्तपादगत यमक होते हैं॥ १६॥

अर्धमिति। प्रथममर्धं पुनरावृत्तं भूय उच्चरितं समुद्गकाख्यं यमकं जनयति करोति। नामशब्दः संस्थाननिषेधसूचनार्थः। तेन चित्रमध्ये-ऽस्य नान्तर्भावः। अर्धद्वयसारूप्येण च समुद्गकसादृश्यम्। श्लोक' श्लोका-न्तरे यमकितो महायमकं जनयति। तु' पुनरर्थे। श्लोक इत्येकवचनं द्वयोस्त्र्यादीनां च यमकत्वनिवृत्त्यर्थम्। यथालक्ष्येष्वदर्शनात्। एवं मुखादारभ्य महायमकान्तान्येकादशैतानि समस्तपादयमकानि भवन्ति॥

अर्धमिति। पूर्वार्ध के पुनः आवृत्त होने पर—दुबारा उच्चरित होने पर—समुद्गक नामक यमक होता है। (कारिका) में नाम शब्द संस्थान के निषेध के

लिये आया है। अतएव चित्र (अलङ्कार) में इसका अन्तर्भाव नहीं होगा। दोनों अर्धांशों के सारूप्य से समुद्गक का सादृश्य होता है। एक श्लोक दूसरे श्लोक में आवृत्त होकर महायमक उत्पन्न करता है। तु पद 'पुनः' अर्थ में आया है। श्लोक में एक वचन का प्रयोग दो तीन आदि श्लोकों की आवृत्ति को यमक के क्षेत्र से अलग करता है। उदाहरणों में उपलब्ध न होने के कारण। इस प्रकार मुख से लेकर महायमक तक समस्तपाद यमक के ग्यारह भेद हुए॥

तत्र समुद्गकम्—

नमाम लोको विदमानवेन मही न चारित्रमुदारधीरम्।
न नामलोऽकोविदमानवेनमहीनचारित्रमुदारधीरम्॥ १७॥

उनमें समुद्गक (का उदाहरण देते हैं)—

लोक जिसके कर्म पवित्र हैं, जिसका हर्ष शत्रुओं की रक्षा नहीं करता है, जो निर्मल है वह स्तुतिपूर्वक उदार और धीर, उच्च चरित्रवाले, मूर्खों के 'अहम्' को नष्ट करनेवाले, शत्रुओं की बुद्धि को प्रेरित करनेवाले पण्डित को स्तुतिपूर्वक प्रणाम करता है॥ १७॥

ननामेति। लोको जनो विदं पण्डितं ननाम प्रणत। केन। आनवेन स्तुत्या। कीदृश। मह्य उत्सवा सन्त्यस्येति मही तथारीन्निपूनाय-तेऽरित्रा मुत्प्रमोदो यस्य स तथाभूतो न च नेव। विदं कीदृशम्। अरीणा समूह आर तस्य धीर्बुद्धिस्तामीरयतीति त तथाविधम्। लोकस्तु न नामल, अपि त्वमलो निर्मल एव। विद पुन कीदृशम्। अकोविदा मूर्खास्तेषा मानमहङ्कारं वान्ति गन्धयन्ति नाशयन्तीत्यकोविदमानवास्ते-षामिन स्वामी तम्। तथाहीनचारित्रमखण्डशीलम्। उदारो विपुला-शयो धीरो धैर्योपेतः। उदार च धीर चेति॥

ननामेति। लोक पण्डित को प्रणाम करता है—कैसे—स्तुतिपूर्वक। कैसा (लोक) मही अर्थात् बड़े बड़े उत्सवोंवाला। तथा शत्रुओं की रक्षा करनेवाला अरित्रा हर्ष जिसका नहीं है। कैसे पण्डित को (नमस्कार करता है)—जो शत्रु मण्डल की बुद्धि को प्रेरित करता है। लोक भी अमल नहीं है ऐसा नहीं—अर्थात् निर्मल ही। फिर कैसे पण्डित को। अकोविद अर्थात् मूर्ख उनके मान एव अहकार को जो नष्ट करते हैं वे हुये अकोविद मानव—उनका स्वामी—ऐसे (पण्डित) को। तथा अखण्ड चरित्रवाले (पण्डित को)। उदार अर्थात् विशाल हृदयवाला धीर अर्थात् धैर्य से युक्त। उदार और धीर (पण्डित) को (लोक नमस्कार करता है)॥

अथ महायमकं श्लोकद्वयेनाह—

स त्वारं भरतोऽवश्यमबलं विततारवम् ।
सर्वदा रणमानैषीदवानलसमस्थितः ॥ १८ ॥
सत्त्वारम्भरतो वश्यमवलम्बिततारवम् ।
सर्वदारणमानैषी दवानलसमस्थितः ॥ १९ ॥

आगे दो श्लोकों में महायमक का उदाहरण देते हैं—

वह (पण्डित) निष्क्रिय से दूर हटकर (शत्रुओं के) अस्थिपञ्जर को नष्ट करता हुआ, भयभीत, शक्तिहीन, शत्रुसमुदाय को सदैव रण में जुझाता है। बलपूर्वक अपनी क्रियाओं को शुरू करनेवाला, वृक्षों (वनों) की शरण लेनेवाले वशंगत शत्रुमण्डल को (समर में जुझाता हुआ) सब को नष्ट करने के कारण मान का इच्छुक, दावाग्नि के तुल्य स्थितिवाला (पण्डित समर करता है) ॥ १८–१९ ॥

स इति । सत्त्वेति । स पूर्वप्रक्रान्तो वित् । तुशब्दः क्रियान्तरोपन्यासार्थः । आरमरिसमूहम्, भरतो भरेण, अवश्यं निश्चितम्, अबलं बलरहितम्, विततारवं कृतभयातिविस्तीर्णनिस्वनम्, सर्वदा सदा, रणं समरम्, आनैषीदानीतवान् । कीदृशोऽसौ । अवानगच्छन् । कम् । अलसं निष्क्रियं जनम् । तथास्थितोऽस्थीनि शत्रूणां तस्यति क्षयं नयतीत्यस्थित इति । तथा सत्त्वेनावष्टम्भेनारम्भा ये तेषु रतः सक्तः । कीदृशमारम् । वश्यं वशगमथवावश्यमनायत्तम्, अवलम्बिततारवं समाश्रितवृक्षसमूहम् । किंकीदृशः । सर्वदारणमानैषी सर्वेषां यद्दारणं विनाशनं तेन मानमिच्छतीति कृत्वा, अत एव दवानलेन दवाग्निना समं तुल्यं स्थितं स्थितिर्यस्येति । शब्दश्लेषस्यास्य च महायमकस्यायं विशेषः । तत्रैकेनैव प्रयत्नेन वाक्यद्वयमुच्चार्यते, इह तु द्वाभ्याम् ॥

स इति । सत्त्वेति । वह पूर्व से प्रकरणगत पण्डित । तु शब्द दूसरी क्रिया के उपादान के लिये (आया है) । (उस पण्डित ने) रिपुमण्डल को बलात्—(जो) निश्चय ही शक्तिहीन था और भय के कारण जिसका रोदन बढ़ गया था—सदैव समर में जुझाया । कैसा था वह (वित्)—जो चलता नहीं था । किसे ? निश्चेष्ट को । (फिर कैसा था वह वित्) जो शत्रुओं की हड्डियों को तोड़ देता था । तथा पराक्रमपूर्वक प्रारंभ किये गये कार्यों में जो व्यापृत रहता था । कैसे रिपुमण्डल को ? शरण में आये हुये अथवा निश्चय ही अधीन हुये एवं वृक्षों की शरण लेने वाले । (फिर) कैसा वित् (पण्डित) । सब को जो

नष्ट करता या उसके कारण किसे मान पाने की इच्छा हो गयी थी अतएव दावाग्नि के समान जिसकी स्थिति थी। शब्दश्लेष और महायमक में यह भेद है—उस (शब्द श्लेष) मे एक ही प्रयत्न से दोनों वाक्यों का उच्चारण होता है यहाँ (महायमक में) दो प्रयत्नों से ॥

एवं समस्तपादजं यमकमाख्यायेदानीमेकदेशजमाह—

पादं द्विधा त्रिधा वा विभज्य तत्रैकदेशजं कुर्यात् ।
आवर्तयेत्तमंशं तत्रान्यत्रापि वा भूयः ॥ २० ॥

इस प्रकार समस्तपादगत यमक (भेदों) को बताकर अब एकदेशगत का वर्णन करते हैं—

पाद को दो या तीन अंशों में विभक्त कर उन (विभक्त अंशों) में आवृत्ति करके एकदेशगत यमक (के भेदों) की रचना करे। उस विभक्त अंश को उसी के स्थानीय अथवा अन्यस्थानीय भागों में अनेक आवृत्त करे ॥२०॥

पादमिति। यच्छन्दोऽर्धादिभागं ददाति तस्य पादं द्विधा त्रिधा वा विभज्य द्विखण्डं त्रिखण्डं वा कृत्वा तत्र विभक्तेऽंशे एकदेशजं यमकं कुर्यात्। कथमित्याह—आवर्तयेद्यमकयेत्तमंशं विभक्तं भागम्। तत्रैवांशे प्रथमार्धानि प्रथमार्धेषु द्वितीयार्धानि द्वितीयार्धेष्वित्यादिक्रमेण। अन्यत्र वाप्यंशान्तरैर्भूयः प्रभूतमावर्तयेत्। अशान्तरावृत्तौ बहवो भेदा भवन्तीत्यर्थः। अपिशब्दः समुच्चये॥

पादमिति। जिस छन्द में अर्ध आदि खण्ड होते हैं उसके (एक) चरण को दो या तीन खण्डों में विभक्त करके उस विभक्त अंश में एकदेशगत यमक की रचना करे। किस प्रकार (रचना करे)—इसे बताते हैं—उस विभक्त खण्ड को (पुनः) आवृत्त कर के। उसी विभक्त अंश में प्रथम-अर्ध प्रथम-अर्धों में, द्वितीय-अर्ध द्वितीय अंशो में—इस क्रम से रचना करे। और स्थलों पर भी, अथवा, अन्य विभक्त अंशों की पुन पुन आवृत्ति करे। अन्य विभक्त अंशों में (प्रथम अर्ध का द्वितीय अर्ध में आदि) आवृत्ति करने पर यमक के अनन्त भेद होते है। (कारिका में) अपि शब्द समुच्चय के अर्थ में आया है।

तत्रैवावृत्त्या ये भेदाः संभवन्ति तानाह—

आद्यर्धान्यन्योन्यं पादावृत्तिक्रमेण जनयन्ति ।
दश यमकान्यपरस्मिन्परिवृत्त्या तद्वदन्यानि ॥ २१ ॥

उसी (निश्चित) स्थल में आवृत्ति होने पर जो भेद हो सकते है उन्हें बताते हैं—

आद्यर्ध परस्पर पादावृत्ति के ही क्रम से दश यमक उत्पन्न करते हैं; उसी प्रकार परिवृत्ति होने पर अन्त्यार्ध भी अन्य दश यमक (उत्पन्न करते हैं) ॥२१॥

आद्यर्धानीति । श्लोकपादचतुष्टयस्य प्रथमार्धान्यपरस्मिन्पादेऽन्योन्यं परस्परं पादावृत्तिक्रमेण समस्तपादद्वययमकवद्दश यमकानि जनयन्ति । तद्वत्तथैव चान्यान्यपि दश जनयन्ति । तानि च मुखसंदंशावृत्तिगर्भसंदष्टकपुच्छपङ्क्तिपरिवृत्तियुग्मकसमुद्गकसंज्ञानि ॥

आद्यर्धानीति । श्लोक के चारों पादों के प्रथम अर्ध दूसरे पाद में दूसरे पादों में परस्पर आवृत्त होकर पादावृत्ति के ही क्रम से समस्तपादगत यमक की ही तरह दश यमक उत्पन्न करते हैं । उसी प्रकार अन्त्य (अर्ध) भी दश यमक उत्पन्न करते हैं । उनके नाम हैं—मुख, संदेश, आवृत्ति, गर्भ, संदष्टक, पुच्छ, पङ्क्ति, परिवृत्ति, युग्मक और समुद्गक ॥

किं पुनरेषामुदाहरणानि नोक्तानीत्याह—

एतदुदाहरणानां पादावृत्त्यैव दर्शितो मार्गः ।
इह विंशतिभेदमिदं यमकं नोदाहृतं तेन ॥ २२ ॥

फिर इनके उदाहरण क्यों नहीं दिये—इसे बताते हैं—

पादावृत्ति के ही क्रम से इन उदाहरणों का मार्ग दिखा दिया गया । अत एव (पादार्धावृत्त) इस यमक के २० भेदों का उदाहरण नहीं दिया गया ॥ २२ ॥

एतदिति । समस्तपादावृत्तियमकोदाहरणैरेव पूर्वोक्तैरेतदुदाहरणानां दिक्प्रदर्शनं कृतमितीह विंशतिभेदं यमकं नोदाहृतमिति । यद्यपि चोभयत्राप्यत्रैकादशोऽपि भेदः संभवति । यथा यादृशानि प्रथमश्लोक आद्यन्तानि चार्धानि कृतानि तादृशान्येव तानि श्लोकान्तरे क्रियन्त इति कृत्वा तथापि महाकवीनां न क्वचिदेवंविधं लक्ष्यं दृश्यत इति दशैव भेदा उक्ताः ॥

एतदिति । पहले बताये गये समस्तपादावृत्ति के यमक के उदाहरणों से ही इन के उदाहरणों का दिगुन्मीलन कर दिया गया इसलिये २० भेदवाले यमक का उदाहरण नहीं दिया गया । यद्यपि दोनों ही (प्रथमार्ध और अन्त्यार्ध स्थलों में ग्यारहवाँ भी प्रकार (भेद) संभव है । जैसे जिस प्रकार प्रथम श्लोक में आद्य और अन्त्य अर्ध किये गये उसी प्रकार के दूसरे श्लोक में भी बनाये जाँय—इस प्रकार (ग्यारहवाँ भेद होगा) तथापि महाकवियों में इस प्रकार कहीं कोई उदाहरण नहीं मिलता—इस लिए दश ही भेद बनाये गये ॥

इदानीमन्यत्र देश आवृत्त्या तानाह—

प्रथमतृतीयान्त्यार्धे तदनन्तरभागयोः परावृत्ते ।
अन्तादिकमिति यमकं व्यस्तसमस्तं त्रिधा कुरुतः ॥ २३ ॥

अब भिन्न स्थल में आवृत्ति होने पर उन (भेदों की) चर्चा करते हैं—

प्रथम और तृतीय पादों के अन्त्यार्ध के बाद वाले आद्यर्ध में एक एक करके अथवा एक साथ आवृत्त होने पर तीन प्रकार का अन्तादिक नामक यमक होता है ॥ २३ ॥

प्रथमेति । प्रथमपादान्त्यार्धं द्वितीयपादाद्यर्धे तृतीयपादान्त्यार्धं च चतुर्थपादाद्यर्धे परावृत्तं प्रत्येकं युगपच्चेत्यन्तादिकं नाम त्रिविधं यमकमन्ताद्योर्यमकनाद्भवतीति ॥

प्रथमेति । प्रथम पाद के अन्त्यार्ध के द्वितीयपाद के आद्यर्ध में और तृतीय पाद के अन्त्यार्ध के चतुर्थपाद के आद्यर्ध में आवृत्त होने पर पृथक् पृथक् और एक साथ—अन्त और आदि में यमक होने पर अन्तादिक नामक तीन प्रकार का यमक होता है ॥

तत्रोदाहरणानि—

नारीणामलसं नाभि लसन्नाभि कदम्बकम् ।
परमास्त्रमनङ्गस्य कस्य नो रमयेन्मनः ॥ २४ ॥

उनके उदाहरण देते हैं—

कामदेव का परमास्त्र मन्थरगति वाला एवं मनोहर नाभिवाला रमणीसमुदाय जिसके चित्त को नहीं आकर्षित कर लेता ॥ २४ ॥

नारीणामिति । नारीणां कदम्बकं स्वर्णं कस्य मनश्चित्तं नो रमयेत्प्रीणयेत् । कीदृशम् ! अलसं मन्थरगमनम् । तथा नाभि अबलात्वान्सभयम् । तथा लसन्ती मनोज्ञा नाभिर्यस्य तत्तथा । तथा परमास्त्रं प्रकृष्टायुधमनङ्गस्य ॥

नारीणामिति । स्त्रियों का समुदाय किसके चित्त को नहीं प्रसन्न कर देता । कैसा (समुदाय) ? अलस अर्थात् मन्थरगतिवाला तथा नाभि-अबला होने के कारण भयभीत तथा मनोहर नाभिवाला तथा कामदेव का परम अस्त्र (ऐसा स्त्रियों का समुदाय) ॥

द्वितीयोदाहरणमाह—

पश्यन्ति पथिकाः कामशिखिधूमशिखामिव ।
इमां पद्मालयालीनां लयालीनां महावलीम् ॥ २५ ॥

द्वितीय (अन्तादिक) का उदाहरण देते हैं—

भ्रमरों की परस्पर संवलित इस दीर्घ श्रेणी को राही कामाग्नि की धूमराजि मानते हैं ॥ २५ ॥

पश्यन्तीति। पद्मान्यालयो येषां ते च तेऽलयश्च भ्रमराश्च तेषां महावलीं दीर्घश्रेणीमिमां पथिका पान्था पश्यन्ति। कीदृशीम्। लयेनान्योन्यश्लेषेणालीनां संवद्धाम्। कामशिखिधूमशिखामिव स्मरानलधूमलेखामिव। इति व्यस्तोदाहरणे॥

पश्यन्तीति। कमल में निवास करनेवाले उन भ्रमरों की विशाल पङ्क्ति को ये राही देखा करते हैं। कैसी (पङ्क्ति)—परस्पर संयुक्त होने के कारण संवलित। (पथिक-पङ्क्ति) कामाग्नि की धूमराजि सी (मानते हैं)—यह पृथक् पृथक् का उदाहरण हुआ॥

समस्तोदाहरणमाह—

पुष्यन्विलासं नारीणां सन्नारीणां कुलक्षयम्।
आ कल्पं वसुधासार सुधासार जगज्जय॥ २६ ॥

(अत्र) एक साथ (आवृत्त होने पर) उदाहरण देते हैं—

हे पृथ्वी के रत्न, अमृत वर्षण करनेवाले, कामिनियों का विलास बढ़ाकर, दुःख में पड़े शत्रुओं का कुलनाश करके (आप) कल्पान्त तक जगद्विजयी हों॥ २६ ॥

पुष्यन्निति। हे वसुधासार भूप्रधान नृप, आ कल्पं युगान्त यावज्जगद्भुवनं जय। कीदृश। सुधासार अमृतवेगवर्ष। किं कुर्वन्। पुष्यन्पुष्टिं नयन्। कम्। विलासम्। कासाम्। नारीणाम्। तथा सन्नानामवसादं गतानामरीणां रिपूणां कुलक्षयमन्वायान्तं पुष्यन्। अन्तर्भावितकारितार्थोऽत्र पुषिः सकर्मकः॥

पुष्यन्निति। हे पृथिवी के सार-धरती पर अग्रगण्य राजन् कल्पान्त तक जगद्विजयी हों। कैसे—अमृत-धार का वर्षण करनेवाले। क्या करते हुये—बढ़ाते हुये—क्या—विलास, किसका—कामिनियों का। (फिर) क्या करते हुये—दुःख में पड़े हुये शत्रुओं के कुलक्षय का पोषण करते हुये (कुलक्षय करते हुये)। यहाँ सकर्मक (क्रिया) पुषि में कारितार्थ अन्तर्भावित है॥

भेदान्तराण्याह—

द्वितीयमन्यमर्धं परिघ्नत्नमनन्तरे भवेन्मध्यम्।
मध्यसमस्तान्तादिकयोगादपि जायते वंशः॥ २७ ॥

अन्य भेद बताते हैं—

द्वितीय पाद के अन्त्यार्ध के बाद में (तृतीय पाद के आद्यर्ध में) आवृत्त होने पर मध्य नामक यमक होता है। मध्य और समस्तान्तादिक के योग से वश नामक यमक होता है ॥ २७ ॥

द्वैतीयमिति। द्वितीयपादस्यान्त्यार्धे तृतीयपादाद्यर्धे परिवृत्त मध्याख्यं यमकं जनयति। एतस्य मध्यस्य पूर्वोक्तसमस्तान्तादिकस्य योगे वशो नाम यमकम्। *समस्तग्रहणं व्यस्तान्तादिकनिवृत्त्यर्थम्। तन्निवृत्तिस्तु लक्ष्यादर्शनात्, न त्वसम्भवात्। एवमन्यत्रापि द्रष्टव्यम्। अपि समुच्चये॥*

द्वैतीयमिति। द्वितीय पाद के अन्त्यार्ध के तृतीय पाद के आद्यर्ध में आवृत्त होने पर मध्याख्य नामक यमक होता है। इस मध्य के पहले बताये गये समस्तान्तादिक के साथ प्रयोग होने पर वश नामक यमक होता है। समस्त का ग्रहण व्यस्त अन्तादिक के योग में निषेध करने के लिये है। उसका निषेध असंभव होने के कारण नहीं अपितु उदाहरण न मिलने के कारण किया गया है। 'अपि' (कारिका में) समुच्चय अर्थ में आया है॥

तत्रोदाहरणमाह—

समस्तभुवनव्यापियशसस्तरसेहते।
रसेहते प्रियं कर्तुं प्राणैरपि महीपते ॥ २८ ॥

उनमें उदाहरण देते हैं—

हे राजन्! समस्त भुवन में प्रथित यशवाले आपके हित को यहाँ पृथ्वी शीघ्र ही प्राणों से भी (धन आदि का कहना ही क्या) करना चाहती है ॥२८॥

समस्तेति। हे महीपते भूपते, तवेहात्र रसा पृथ्वी प्राणैरपि। आस्तां धनादिभिः। प्रियं हितं कर्तुमीहते चेष्टते,। तरसा झटिति। कीदृशस्य ते। समस्तभुवनव्यापियशसः सकलजगद्व्यापिकीर्तेः। इति मध्यः॥

समस्तेति। हे राजन्! तुम्हारी इस लोक में पृथ्वी प्राणों से भी धन आदि का तो कहना ही क्या—हित करना चाहती है। तरसा अर्थात् शीघ्र ही। कैसे तुम्हारी? निखिल भुवनों में व्याप्त यशवाले। यह मध्य (का उदाहरण हुआ)।

अथ वश —

ग्रीष्मेण महिमानीतो हिमानीतोयशोभितः।
यशोऽभित पर्वतस्य पर्व तस्य हि तन्महत् ॥ २९ ॥

अब वश (का उदाहरण देते हैं)—

गर्मी ने हिमजल से शोभित महिमा छे आ दिया; चारो ओर पर्वत का यश (फैला है) जो उसका महापर्व (उत्सव) है ॥ २९ ॥

ग्रीष्मेणेति। ग्रीष्मेण निदाघेन पर्वतस्य शैलस्य महिमा माहात्म्यमानीत.। कीदृश। महद्भिर्हिमाचो तत स्रुतेन तोयेनाम्बुना शोभितो राजित। हि यस्मात्तस्य पर्वतस्य तद्धिमानीतोयमभित. समन्ताद्यशो वर्तते। तथा पर्व महोत्सवश्च महन्महाप्रमाणम्॥

ग्रीष्मेणेति। ग्रीष्म ने पर्वत की महिमा ले आ दी—कैसा महिमा—हिमसयात से टपके हुये जल से शोभित, क्योंकि उस पर्वत का उस हिम जल के चारों ओर यश फैला है। तथा पर्व महोत्सव (उसका) महान् है॥

पुनर्भेदमाह—

आवृत्तं प्रथमादौ द्वितीयमर्धं चतुर्थपादस्य।
वंशश्च चक्रकाख्यं षष्ठं चान्तादिकं यमकम्॥ ३०॥

आगे और भेद बताते हैं—

प्रथम पाद के आद्यर्ध चतुर्थ पाद के अन्त्यार्ध में आवृत्त होने पर और वंश नामक यमक का प्रयोग होने पर अन्तादिक यमक का चक्रक नामक छठा भेद होता है॥ ३०॥

आवृत्तमिति। चतुर्थपादद्वितीयार्धं प्रथमपादाद्यर्धेन सहावृत्तं पूर्वोक्तवंशश्चेति यमकयोगे चक्रकं नाम यमकम्। षष्ठोऽन्तादिकभेदः। एकश्चकारो वंशकसमुच्चये द्वितीयश्च चक्रस्यान्तादिकमध्ये समुच्चयार्थः॥

आवृत्तमिति। चतुर्थपाद के द्वितीयार्ध के प्रथम पाद के आद्यर्ध के साथ आवृत्त होने पर और पूर्ववर्णित वंश नामक यमक का योग होने पर चक्रक नामक यमक होता है। अन्तादिक का (यह) छठाँ भेद है। एक चकार वंशक के समुच्चय के लिये और दूसरा चक्र के अन्तादिक के मध्य में समुच्चय के लिये आया है॥

सभाजनं समानीय स मानी यः स्फुटन्नपि।
स्फुटं न पिहितं चक्रे हितं चक्रे सभाजनम्॥ ३१॥

वही मनस्वी होता है जो शुभ दर्शनवाले सभाजनों को अपने समीप पाकर राष्ट्र में, बिना ढोंग हाँके गुप्तरूप से अनुकूल आचरण करता है॥ ३१॥

सभाजनमिति। स एव मानी मनस्वी चक्रे राष्ट्रे हितं चक्रेऽनुकूलं चकार। किं कृत्वा। सभाजनं सभालोकं समानीय सम्यगात्मसमीपं प्रापय्य। सभ्यानां विदितं कृत्वेत्यर्थः। कथं हितं चक्रे। पिहितं गुप्तम्, न स्फुटं प्रकटम्। अविकत्थनात्। किं कुर्वन्नपि स्फुटन्नपि पीडितोऽपि। कीदृशं सभाजनम्। सभाजनं प्रीतिदर्शनम्। लक्षणं सर्वत्र स्वधिया योज्यम्।

अत्र च सप्तमोऽप्येष भेदः संभवति। यत्र केवलमेव प्रथमाद्यर्धं चतुर्थान्त्यार्धमावर्त्यते स तु पूर्वकविलक्ष्येषु दृश्यमानोऽपि कथमपि नोक्तः॥

समाजनमिति। वही मनस्वी है जिसने राष्ट्र में हित कार्य किया। क्या करके? सभालोक को अपने समीप में भली भाँति मिलाकर—अर्थात् शिष्टों को बुलाकर। किस प्रकार हित किया? गुप्त रूप से—स्पष्ट रूप से नहीं, डींग न हाँकने के कारण। और क्या करके? (स्वयं) पंडित होकर भी। कैसे सभालोक को (बुलाकर)? जिसका दर्शन सुखकर है। लक्षण की योजना सर्वत्र अपनी बुद्धि से करनी चाहिए। यहाँ सातवाँ यह भेद भी हो सकता है—जहाँ केवल प्रथम (पाद) का आद्यर्ध चतुर्थ के अन्त्यार्ध में आवृत्त होता है—उसका उदाहरण पूर्व कवियों में मिलने पर भी किसी प्रकार नहीं कहा गया॥

अथाद्यन्तकभेदानाह—

प्रथमादिप्रथमार्धैः परिवृत्तान्यत्र सार्धमर्धानि।

अन्त्यान्यनन्तराणां जनयन्त्याद्यन्तकं नाम॥ ३२॥

आगे आद्यन्तक के भेदों का वर्णन करते हैं—

प्रथम आदि पादों के आद्यर्ध के द्वितीय आदि पादों के अन्त्यार्ध में आवृत्त होने पर आद्यन्तक यमक होता है॥ ३२॥

प्रथमादीति। प्रथमद्वितीयतृतीयपादप्रथमार्धैः सार्धमनन्तराणां द्वितीयतृतीयचतुर्थपादानामन्त्यार्धानि परिवृत्तानि यमकितानि सन्त्याद्यन्तकसंज्ञकं यमकं जनयन्ति॥

प्रथमादीति। प्रथम, द्वितीय और तृतीय पादों के आद्यर्ध के साथ बाद के द्वितीय, तृतीय और चतुर्थ पादों के अन्त्यार्ध के आवृत्त होने पर आद्यन्तक नामक यमक होते हैं॥

किमेकभेदमेवेदम्। नेत्याह—

इदमप्यन्तादिकवत्क्रमेण षोढैव भिद्यते भूयः।

अस्योदाहरणानां तेनैव च दर्शितो मार्गः॥ ३३॥

क्या इसका एक ही भेद होता है—कहते हैं नहीं—

यह भी—अन्तादिक के समान क्रमशः पुनः छः ही भेदों वाला होता है। इसके उदाहरणों का मार्ग उसी क्रम से दिखला दिया गया है॥ ३३॥

इदमिति। न केवलमन्तादिकमिदमप्याद्यन्तकं तेनैव क्रमेण षोढा षड्भिर्भेदैर्भिद्यते। भूयः पुनः। यथा प्रथमाद्यर्धं द्वितीयपादान्त्यार्धेन सह यमकिते तृतीयाद्यर्धं चतुर्थान्त्यार्धेन सह व्यस्तमाद्यन्तकं द्विधा तदुभययोगे समस्तमिति तृतीयो भेदः। द्वितीयाद्यार्धं तृतीयान्त्यार्धेन

सह मध्यनामा चतुर्थः। मध्यमसमस्ताद्यन्तकयोगे वंशः पञ्चमभेदः। प्रथमान्त्यार्धचतुर्थाद्यर्धसारूप्ये वंशे च युगपत्कृते चक्रकं नाम षष्ठः। पूर्ववच्च सप्तमो भेदः सम्भवतीति यत्र प्रथमाद्यर्धचतुर्थान्त्यभागयोः सारूप्यम्। अस्य च निदर्शनाना तेनैवान्तादिकेन मार्गो दर्शितो दिक्प्रदर्शनं कृतमिति नोदाहरणं दत्तम् ॥

इदमिति। केवल अन्तादिक ही नहीं आद्यन्तक भी उसी क्रम से छह भेदों में विभक्त किया जाता है। पुनः, जैसे, प्रथम (पाद) के आद्यर्ध के द्वितीय (पाद) के अन्त्यार्ध के साथ आवृत्त होने पर, तृतीय (पाद) के आद्यर्ध के चतुर्थ (पाद) के अन्त्यार्ध में आवृत्त होने पर आद्यन्तक पृथक् पृथक् दो प्रकार का होता है। दोनों का एक साथ योग होने पर तीसरा भेद होता है। द्वितीय (पाद) के आद्यर्ध के तृतीय (पाद) के अन्त्यार्ध के साथ आवृत्त होने पर मध्य नामक चौथा (आद्यन्तक) यमक होता है। मध्य और समस्त आद्यन्तक का प्रयोग होने पर वंश नामक पाचवाँ भेद होता। प्रथम (पाद) के अन्त्यार्ध के चतुर्थ (पाद) के आद्यर्ध में आवृत्त होने पर और वंश का प्रयोग होने पर चक्रक नामक छठवाँ यमक होता है। पहले बतायी गयी रीति से ही सातवाँ भेद भी हो सकता है—जहाँ प्रथम (पाद) के आद्यर्ध और चतुर्थ (पाद) के अन्त्यार्ध में सरूपता हो। इसके उदाहरणों का भी उसी अन्तादिक से दिगुन्मीलन कर दिया गया। अतएव उदाहरण अपेक्षित नहीं ॥

भूयो भेदमाह—

प्रथमतृतीयाद्यर्धे तदनन्तरचरमयोः परावृत्ते।
भवति समस्तान्तादिकयोगादप्यर्धपरिवृत्तिः ॥ ३४ ॥

और भी भेद बताते हैं—

प्रथम और तृतीय पादके आद्यर्ध भाग के द्वितीय और चतुर्थ पादके अन्त्यार्ध में क्रमशः आवृत्त होने पर और समस्तान्तादिक के योग होने पर अर्धपरिवृत्ति नामक यमक होता है ॥ ३४ ॥

प्रथमेति। प्रथमाद्यर्धं द्वितीयपादान्त्यार्धेन तृतीयाद्यर्धं चतुर्थान्त्यार्धेन यमकितं समस्तान्तादिकं चेदुभययोगेऽर्धपरिवृत्तिर्नाम भवति ॥

प्रथमेति। प्रथम (पाद) के आद्यर्ध के द्वितीय (पाद) के अन्त्यार्ध के साथ, तृतीय (पाद) के आद्यर्ध के चतुर्थ (पाद) के अन्त्यार्ध के साथ आवृत्त होने पर और समस्तान्तादिक—इन दोनों के योग में अर्धपरिवृत्ति नामक (यमक) होता है ॥

यथा—

ससार सार्कं दर्पेण कन्दर्पेण ससारसा ।
शरन्नवाना बिभ्राणा नाविभ्राणा शरं नवा ॥ ३५ ॥

जैसे—

कामदेव के साथ सारसों से युक्त, नवीन गाडियों वाली तथा पक्षियों के कलरव से युक्त, नवीन शरद्तु शीघ्र ही व्याप्त हो गयी ॥ ३५ ॥

ससारेति । कन्दर्पेण कामेन सार्कं सार्धं दर्पेण वेगेन शरत्ससार प्रसृता कीदृशी सा । ससारसा सह सारसैः पक्षिविशेषैर्वर्तते या सा । तथा नवानि नूतनान्यनांसि शकटानि यस्या सा नवानाः । तथा शरं काण्डतृणविशेषं बिभ्राणा धारयमाणा । तथा भ्राणनं भ्राणः शब्दः । वीनां पक्षिणां भ्राणो विभ्राणो न विद्यते विभ्राणो यस्या साऽविभ्राणा नैवंविधा । सपक्षिरुतेत्यर्थः । तथा नवा प्रत्यग्रा तत्कालप्रवृत्तत्वात् ॥

ससारेति । कामदेव के साथ शीघ्र ही शरद् ऋतु व्याप्त हो गयी । कैसी है वह (शरद्) ? ससारसा अर्थात् सारस नामक विशेष पक्षियों वाली, तथा नवीन नवीन गाडियों वाली एवं शरकण्डों से भरी हुयी । फिर भ्राणन है भ्राण अर्थात् शब्द—पक्षियों का भ्राण जिसमें नहीं है वह हुयी अविभ्राणा । ऐसी जो नहीं है—अर्थात् पक्षियों के कलरव से युक्त । तथा शीघ्र ही फैली होने के कारण जो नवीन है ॥

पुनर्भेदान्तराण्याह—

पादसमुद्गकमन्यं तत्रावृत्तानि कुर्वते तच्च ।
अन्तरितानन्तरितव्यस्तसमस्तेषु पादेषु ॥ ३६ ॥

आगे और भी भेद बताते हैं—

एक या दो पादका अन्त देकर अथवा बिना अन्तर दिये एक एक करके अथवा एक साथ ही सभी पादों में उसी पाद के आवृत्त होने पर पाद समुद्गक नामक यमक होता है ॥ ३६ ॥

पादेति । चतुर्णामपि पादानां यान्यर्धानि तानि तत्रैव पादे परिवृत्तानि सन्ति पादे पादे समुद्गकसादृश्यात्पादसमुद्गकं नाम यमकं कुर्वन्ति । तच्च पादेष्वन्तरितेषु व्यवहितेष्वनन्तरितेषु च तथा व्यस्तेषु केवलेषु समस्तेषु च पादेषु बहुधा भवति । ते च बहवः प्रकाराः पञ्चदश । प्रथममन्तरितं तावत्पञ्चधा । प्रथमतृतीययोर्द्वितीयेन, द्वितीयचतुर्थयोस्तृतीयेन, प्रथमतृतीयचतुर्थानां द्वितीयेन, प्रथमद्वितीयचतुर्थानां तृतीयेनान्तरणम् । इत्येकान्तरितं चतुर्भेदम् । प्रथमचतुर्थयोस्तु द्वितीयतृतीयाभ्यामिति द्व्यन्तरि-

त्तमेकमेव । इत्यन्तरितं पञ्चभेदम् । अनन्तरितमपि प्रथमद्वितीययोगयुप-द्द्वितीयतृतीययोर्वा तृतीयचतुर्थयोर्वेति द्वियोगे त्रिभेदम् । त्रियोगेन तु प्रथमद्वितीयतृतीयानां द्वितीयतृतीयचतुर्थानां चेति द्विभेदम् । एवमेकत्रा-नन्तरित तत्पञ्चधा। तथा व्यस्तेपु चतुर्पु पादेपु चत्वारो भेदाः, समस्तेपु त्वेक एव भेदः । इत्येवं सर्वे पञ्चदश ॥

पादेति । चारों पादों के जो अर्द्ध (अंश) होते हैं वे उसी पाद में आवृत्त होते हैं। प्रत्येक पाद में समुद्गक की सरूपता धारण करने वाले समुद्गक नामक यमक बनाते हैं। वे पादों में अन्तर देकर पृथक् पृथक् और एक साथ पादों में आवृत्त होकर (अनेक) प्रकार के होते हैं। वे अनेक प्रकार पन्द्रह हैं। जैसे—अन्तर देकर पाँच प्रकार का होता है। प्रथम और तृतीय में द्वितीय से, द्वितीय और चतुर्थ में तृतीय से, प्रथम, तृतीय और चतुर्थ में द्वितीय से, प्रथम, द्वितीय और चतुर्थ में तृतीय से अन्तर होने पर एकान्तरित चार प्रकार का होता है। प्रथम और चतुर्थ में द्वितीय और तृतीय से अन्तर होने पर—दो के अन्तर में एक ही प्रकार का अन्तरित होता है। इस प्रकार अन्त-रित के पाँच भेद हुये। अन्तर न होने पर भी प्रथम और द्वितीय में एक साथ, द्वितीय और तृतीय में, तृतीय और चतुर्थ में—इस प्रकार दो के योग में तीन प्रकार का होता है। तीन के योग में, प्रथम, द्वितीय और तृतीय और द्वितीय, तृतीय और चतुर्थ में—यह दो प्रकार का होता है। इस प्रकार एक साथ बिना अन्तर के (समुद्गक) पाँच प्रकार का हुआ। तथा पृथक् पृथक् चारों पादों में चार प्रकारका होता है—एक साथ प्रयोग होने पर एक प्रकार का। इस प्रकार (समुद्गक के) सब पन्द्रह भेद हुये ॥

तत्राद्येऽन्तरितभेदद्वये तथा पञ्चदशे समस्तजभेदे च दिक्प्रदर्शनायो-दाहरणत्रयमाह । यथा—

मुदा सेनामुदासेनादसौ तामसमञ्जसम् ।
महीनाथमहीनाथ जयश्रीरालिलिङ्ग तम् ॥ ३७ ॥

उनमें प्रथम अन्तरित के दोनों प्रकार और पन्द्रहवें प्रकार के समस्तगत भेद का मार्ग दिखाने के लिये तीन उदाहरण देते हैं—जैसे:—

इस राजा ने हर्ष पूर्वक—उस सेना को सेनापति के स्नेह से इधर-उधर बिखेर दिया। तदनन्तर सम्पूर्ण विजयश्री ने उसका आलिङ्गन किया ॥ ३७ ॥

मुदेति । असौ महीनाथो राजा तां सेनां मुदा हर्षेण इनात्स्वामिनः सेनाभर्तुः सकाशादुदास चिक्षेप । वियोजितवानित्यर्थः । कथम् ? अस-

मञ्जसमितस्तव । अथानन्तरं महीनाथम्–अहीना सम्पूर्णा जयलक्ष्मीरालिलिङ्ग परिषस्वजे ॥

मुदेति । पृथ्वी—पालकं इस राजाने प्रसन्नता से ही उस सेना को सेनापति के पास से छिन्न भिन्न कर दिया । अर्थात् अलग कर दिया । किस प्रकार ? तितर-बितर के । इसके पश्चात् सम्पूर्ण विजय श्री ने राजा का आलिङ्गन किया ।

द्वितीयोदाहरणमाह—

यत्त्वया शात्रवं जन्ये मदायतमदायत ।

तेन त्वामनुरक्तेयं रमायत रसायत ॥ ३८ ॥

दूसरा उदाहरण देते हैं—

मद के कारण रण में जो तुमने विस्तीर्ण शत्रुमण्डल को काट डाला इससे अधिक राग वाली अनुरक्त हुयी यह धरती तुम्हें प्राप्त हुयी ॥ ३८ ॥

यदिति । कश्चिद्राजानमाह—यद्यस्मात्त्वया शात्रवं शत्रुगणो जन्ये रणेऽदायताळूयन तेन हेतुनेयं रसा पृथ्व्यनुरक्ता सती त्वामयतागता । 'अय गतौ' इत्यस्य रूपम् । कीदृशम् । शात्रव मथ्नातीति मत् रिपुमथनसमर्थम् । आयत विस्तीर्णम् । यद्वा मदेनायतम् । कीदृशी रसा । आयतरसा त्वा प्रति दीर्घाभिलाषा ॥

यदिति । कोई राजा से कह रहा है—चूँकि तुमने सङ्ग्राम में शत्रु मण्डल को काट डाला अत एव (तुममें) आसक्त हुयी यह धरती तुम्हें प्राप्त हुयी । (अयता) रूप गमनार्थक अय धातु से निष्पन्न हुआ है । कैसे (तुम्हें प्राप्त हुयी) ? शत्रु-मण्डल को मथता है—मत् अर्थात् शत्रुओं को मथ डालने में सक्षम । विशाल (शत्रु मण्डल को) अथवा मद के कारण आयत (फूले हुये) । कैसी पृथ्वी ? आयतरसा अर्थात् तुम्हारे प्रति गाढ आसक्ति वाली ॥

तृतीयोदाहरणमाह—

रसासार रसासार विदा रणविदारण ।

भवतारम्भवतारं महीयतमहीयत ॥ ३९ ॥

तीसरा उदाहरण देते हैं—

हे भू-श्रेष्ठ ! (शृङ्गार आदि) रसों के धारासम्पात ! समरभेदक उद्योगी विद्वान् आपने शत्रु-समूह को भूमि (राज्य, निवास) आदि से शून्य कर दिया ॥ ३९ ॥

रसासारेति । हे रसासार भूश्रेष्ठ, तथा रसानां शृङ्गारादीनामासार वेगवर्षतुल्य, तथा रणविदारण समरभेदक, भवता त्वया, विदा पण्डितेन, आरम्भवता सोद्योगेन, आरं शात्रवमहीयत हानिं नीतम् । जित-

मित्यर्थः। कीदृशम्। मह्या पृथिव्यां यतं सम्वद्धम्। हर्म्यादिवियोजितत्वादिति। अन्यदेशावृत्तौ मनोहारित्वमाश्रित्यैते त्रिशद्भेदा जाता। यथान्तादिके षट्कमाद्यन्तकेषट्कमिति द्वादश सम्भवन्ति। सप्तमभेदाभ्यां सह चतुर्दश। पञ्चदशार्धपरिवृत्ति तथामी पादसमुद्गकभेदाश्च पञ्चदशेति। यथेष्टं चावृत्तावसंख्याता भेदा सम्भवन्ति। ते तु नोक्ता। कविलक्ष्येष्वदर्शनादरम्यात्वाच्चेति॥

रससारेति। हे पृथ्वी के सार भू-श्रेष्ठ, शृङ्गारादि रसों के वेग-वर्ष (धारा-सम्पात) समर-भेदक, कुशल एवं उद्योगी आप ने शत्रु—समूह को क्षुद्र बना डाला, अर्थात् जीत लिया। कैसे (शत्रु समूह को)? पृथ्वी में राज भवन आदि से निकाल दिये जाने के कारण लिपटे हुये। भिन्न देश में आवृत्ति होने पर सौंदर्य को आश्रय करके ये (अर्धावृत्त) तीस प्रकार के हो गये, जैसे अन्तादिक में छह प्रकार के आद्यन्तक में छह प्रकार—ये बारह भेद सम्भव हैं। सातवाँ भेद लेने पर चौदह होंगे। पन्द्रहवीं हुयी अर्धपरिवृत्ति तथा पादसमुद्गक के ये पन्द्रह भेद (ये तीस भेद हुये)। स्वेच्छा से आवृत्त होने पर तो अनन्त भेद संभव हैं। उनका यहाँ उल्लेख नहीं किया गया क्यों कि कवियोंने उनका उदाहरण नहीं दिया तथा वे रमणीयक भी नहीं होते॥

अधुना प्रकारान्तरमाह—

आवृत्तानि तु तस्मिन्नाद्यर्धान्यर्धशो विभक्तानि।
वक्त्रं तथा शिखान्त्यान्युभयानि च जायते माला॥ ४०॥

अब अन्य भेद बताते हैं—

आदि अर्ध के आधे में विभक्त होकर उसी विभक्त अंश में आवृत्त होने पर वक्त्र तथा अन्त्यार्ध के आधे में विभक्त होने पर उसी विभक्त अंश में आवृत्त होने पर शिखा (तथा) दोनों के योग में माला यमक होता है॥४०॥

आवृत्तानीति। पादानामाद्यान्यर्धान्यर्धशः खण्डितानि तस्मिन्नेव खण्डितेऽर्धे यमकितानि वक्त्रं नाम यमकं जनयन्ति। तथान्त्यार्धान्यर्धीकृतानि तस्मिन्नेव यमकितानि शिखां जनयन्ति। वक्त्रशिखयोश्च युगपद्योगे माला भवति॥

आवृत्तानीति। पादों के आदि के आधे अंश के पुनः आधे में खण्डित होने पर उसी खण्डित अंश में आवृत्त होने पर वक्त्र नामक यमक उत्पन्न होते हैं। इसी प्रकार अन्त्य के अर्धांश के आधे में खण्डित होकर उसी खण्डित अंश में आवृत्त होने पर शिखा नामक (यमक) उत्पन्न करते हैं। एक ही छन्द में वक्त्र और शिखा का प्रयोग होने पर माला नामक यमक होता है॥

क्रमेणैषामुदाहरणत्रयमाह—

घनाघनाभिनीलानामास्थामास्थाय शाश्वतीम् ।
चलाचलापि कमले लोनालीनामिहावली ॥ ४१ ॥

क्रमश: इनके तीन उदाहरण देते हैं—

बरसने वाले मेघों के समान श्यामल, चञ्चल होकर भी स्थिर वृत्ति का आश्रय ग्रहण करने वाली भ्रमरावली यहाँ कमल में लिपटी हुयी है ॥ ४१ ॥

घनेति । इह कमले पद्मेऽलीनां भ्रमराणामावली पङ्क्तिर्लीना श्लिष्टा। कीदृक् । चलाचलापि चञ्चलापि । कीदृशामलीनाम् । घनाघना वार्षुक· मेघास्तद्वदभिनीलाना श्यामानाम् । किं कृत्वा । लीना शाश्वती स्थिरा-मास्था वृत्तिमास्थाय कृत्वा । चक्रमिदम् ।

घनेति । यहाँ कमल में भौंरों की पङ्क्ति लिपटी हुयी है । कैसी (है वह पङ्क्ति)? चञ्चल होकर भी कैसे भ्रमरों की? बरसने वाले मेघों के समान श्यामल (वर्ण वाले)? क्या करके? लीन वृत्ति—स्थिर व्यापार वाली होकर यह चक्र यमक है ॥

यासां चित्ते मानोऽमानो नारीर्भूयोऽरं ता रन्ता ।
सारप्रेमा सन्नामन्ना जायेतैवानन्ता नन्ता ॥ ४२ ॥

जिनके चित्त में असीमित मान है ऐसी रमणियाँ अधिक है और समीप हैं । उनसे रमण करने सतत प्रेम वाला विनम्र सत्पुरुष शीघ्र ही पैदा होगा ॥४२॥

यासामिति । सन्ना सत्पुरुषो भूय पुनररं शीघ्रं जायेतैव भवेदेव । कीदृश । रन्ता रमणशील । रमेरन्तर्भूतकारितार्थाद्रमयितेत्यर्थ । कास्ता: नारी । कीदृशी. । अनन्ताः प्रचुरास्तथा आसन्ना अभ्यर्णा: । यासां नारीणां चित्ते मनसि मानोऽहंकारोऽमानोऽतिबहु. । कीदृश । सन्ना नन्ता नम्र· । सारप्रेमा स्थिरप्रीति. । इति शिखा ॥

यासामिति । सज्जन पुरुष शीघ्र ही पुन उत्पन्न ही होगा । कैसा? रमण करने वाला । 'रमु' धातु के कारितार्थ (णिजर्थ) के अन्तर्भावित होने के कारण 'रमयिता' यह अर्थ लेना चाहिये । कौन हैं वे ? स्त्रियाँ । किस प्रकार की? असख्य और समीपस्थ । जिन नारियों के मन में मान अहंकार अत्यधिक है । (फिर) कैसा (सज्जन) सदाचारी नम्र । 'सारप्रेमा' अर्थात् अविचल प्रेम वाला । यह शिखा (का उदाहरण है) ।

भीताभीता मन्नामन्ना सेना सेनागत्यागत्या ।
धीरधीराह त्वा हत्वा संतामं त्रायस्त्रायस्वा ॥ ४३ ॥

'हे अभीत (शत्रुओं को) मानसिक कष्ट देने वाले (तुम्हारे पास) आगमन ही जिसका सर्वस्व है, वह विषाद-युक्त, स्वामी के साथ त्रस्त, शत्रु-सेना समक्ष आकर लाचार होकर आप से इस प्रकार कह रही है-अभय देकर (मेरी) रक्षा करो ॥ ४३ ॥

भीतेति। कश्चिद्दूतो राजानमाह—हे धीर निर्भय, आधीर मनोदु:खप्रेरक, सा परकीया सेना चमू सेना सस्वामिका त्वा भवन्तमाह ब्रूते। कीदृशी। भीता त्रस्ता, अभीता सम्मुखमागता, सन्ना सखेदा, आसन्ना निकटवर्तिनी, आगत्य समेत्य, अगत्या गत्यन्तराभावेन। किं तदाह—हत्वा विनाश्य, सन्त्रासं भयम्, त्रायस्व पालय। पुन कीदृशी। आयस्वा आयस्त्वत्सकाशादागमनमेव स्वं धनं यस्या.। इति माला ॥

भीतेति। कोई दूत राजा से कह रहा है-हे अभीत, मनोवेदना (शत्रुओं) को देने वाले, वह परायी सेना स्वमी के साथ आप से निवेदन कर रही है। कैसी? डरी हुयी, समक्ष आकर, दु:खित होकर, पास में उपस्थित होकर—आकर, और कोई उपाय न होने के कारण। वह क्या कह रही है? भय को नष्ट करके (हमें) बचाओ। रक्षा करो। फिर कैसी? आयस्वा अर्थात् आप की शरण में पहुँच जाना ही जिसका सर्वस्व है। वह माला (का उदाहरण है)।

भूयोऽप्याह—

मध्यान्यर्धार्धानि तु मध्यं कुर्वन्ति तत्र परिवृत्त्या।
आद्यन्तान्याद्यन्तं काञ्चीयमकं तथैकत्र ॥ ४४ ॥

और भी बताते है—

मध्य में अर्धार्ध के उसी स्थल मे आवृत्त होने पर मध्य नामक यमक होता है। इसी प्रकार आद्यन्त आवृत्त होकर आद्यन्त नामक यमक उत्पन्न करते हैं। दोनों को एक साथ प्रयोग होने पर काञ्ची यमक होता है ॥ ४४ ॥

मध्यानीति। तु. पुनरर्थे। मध्यान्यर्धार्धानि पुनस्तत्रैव मध्ये परिवृत्त्या मध्यं नाम यमकं जनयन्ति। एवमाद्यन्तान्यर्धार्धानि परिवृत्त्याद्यन्तं नाम कुर्वन्ति। तदुभययोगे समकालं काञ्चीयमकं जनयन्ति। तथाशब्द: समुच्चये ॥

मध्यानीति। 'तु' पद का ग्रहण 'पुन:' के अर्थ में किया गया है। मध्य के अर्धार्ध उसी स्थल में आवृत्त मध्य नामक यमक उत्पन्न करते हैं। इसी प्रकार आद्यन्त के अर्धार्ध आवृत्त होकर आद्यन्त नामक (यमक) बनाते हैं। उन दोनों का एक साथ प्रयोग होने पर काञ्ची यमक होता है। तथा शब्द समुच्चय के अर्थ में आया है ॥

तत्रोदाहरणत्रय क्रमेणाह—

मन्तोऽवत वत प्राणानिमानिह निहन्ति नः ।
मदाजनो जनोऽयं हि वोद्धुं सदसदक्षमः ॥ ४५ ॥

उनके तीन उदाहरण क्रमश देते है.—

उचित अनुचित का विचार करने में असमर्थ, सज्जनों पर आक्षेप करने वाले, ये लोग हमारे प्राणों को यहाँ नष्ट कर रहे हैं। हे सन्तों रक्षा करो ॥ ४५ ॥

सन्त इति । कश्चिदाह—हे सन्त शिष्टा., नोऽस्माकं प्राणानवत रक्षत । हि यस्मादयं जनो लोक इहात्रेमान्प्राणान्निहन्ति हिनस्ति । वतेति खेदे । कीदृशो जन. । सदाजनः सतां क्षेप्ता । तथा सदासद युक्तायुक्त वोद्धुं ज्ञातुमक्षमोऽसमर्थः । इति मध्यम् ॥

सन्त इति । कोई कह रहा है—हे सज्जनों हमारे प्राणों की रक्षा करो क्योंकि ये (दुष्ट) लोग यहाँ (हमारे) प्राणों को हत्या कर रहे हैं। वत—खेद के अर्थ में आया है। कैसा (जन) समुदाय? सदाजन—सज्जनों का तिरस्कार करने वाला तथा—युक्त अयुक्त को जानने में असमर्थ। यह मध्य (यमक का उदाहरण है) ॥

दीना दूनविषादीना शरापादितभीशरा ।
सेना तेन परासे ना रणे पुञ्जीवितेरणे ॥ ४६ ॥

"हे मनुष्य! पुरुष के जीवन के विध्वंसक, रण में बाणों के द्वारा उत्पन्न किये गये भय और हिंसा वाली तथा परितप्त विषाद युक्त नेता वाली विक्षुब्ध सेना किसी वीर के द्वारा पिछाड़ दी गयी ॥ ४६ ॥

दीना इति । कश्चित्कस्यापि कथयति—हे न पुरुष, तेन केनापि वीरेण रणे समरे सेना चमूः परासे क्षिप्ता । कीदृशे रणे पुंजीवितेरणे क्षेप्तरि । सेना कीदृशी । दीना निष्पौरुषा । तथा दूनः परितप्तो विषादी विषण्ण इनः स्वामी यस्याः सा तथाभूता । तथा शरैर्बाणैरापादिता भीर्भयं शरो हिंसा च यस्या सा तथा इत्याद्यन्तम् ॥

दीना इति । कोई किसी से कह रहा है—हे नर! उस किसी अलौकिक वीर ने समर में सेना को छिन्न-भिन्न कर दिया। कैसे समर में? पुरुष के जीवित (जीवन) के विनाशक। सेना कैसी? पौरुष जिसका समाप्त हो चुका है तथा खिन्न है—दुःखी है नायक जिसका ऐसी। और भी, बाणों की बौछार से जिसमें भय समा गया है और जिसके सैनिक मारे जा रहे हैं ऐसी। यह आद्यन्त (का उदाहरण) है ॥

या मानीतानीतायामा लोकाधीरा धीरालोका ।
सेनासन्नासन्ना सेना मारं हत्वाह त्वा सारम् ॥ ४७ ॥

"जो मनस्वियों के द्वारा अधिष्ठित है, (शत्रु सेना को पराजित करने के कारण) जिसकी सीमा विस्तृत हो गयी है, जो शत्रु लोक को मानसिक पीडा देती है जो निडर होकर देखती है, सेनापति के साथ उत्साह वाली वह सेना रिपुसमुदाय को मार कर आप से सही बात ही कह रही है ॥ ४७ ॥

येति । कश्चिद्दूत स्वसेनासन्देशं राज्ञ कथयति—सा त्वदीया सेना पृतना, आरं रिपुसमूहम् , हत्वा विनाश्य, आह ब्रवीति । त्वा भवन्तम् । किं ब्रवीति । सारं प्रधानं वस्तु । शत्रवो जिता इति निवेदयतीत्यर्थ । तस्यैव सारत्वादिति । कीदृशी । या मानिभिर्मनस्विभिरिताधिष्ठिता । तथा आनीतः संपादितः परबलस्वीकारेणायामो विस्तारो यस्या सा तथाभूता । लोकानामाधीर्मनःपीडा ईरयति सा लोकाधीरा । तथा धीरो निर्भय आलोकः प्रेक्षणं यस्या सा तथाभूता । सेना सदण्डनायका, असन्ना सोत्साहा, आसन्ना निकटा । इति काञ्चीयमकम् । पादसमुद्गकभेदवदन्तादिकादियमकभेदवच्चेहापि सर्व एव भेदा द्रष्टव्या इति ॥

येति । कोई दूत राजा से अपनी सेना का सदेश कह रहा है—वह तुम्हारी सेना शत्रु मण्डल को मारकर कह रही है । तुम से कि क्या कह रही है ? मुख्य बात । अर्थात् शत्रु जीत लिया गया—यह कह रही है । क्यों वही तो मुख्य बात है । कैसी (तुम्हारी सेना) । जो मनस्वियों से अधिष्ठित है, फिर जिसकी शत्रुसेना को दृष्टि में रखकर संख्या बढ़ा दी गयी है ऐसी । (शत्रु) लोक की मनोवेदना का प्रेरणा करने वाली लोकाधीरा, (फिर) जो (शत्रुओं को) बिना किसी भय के देखती है ऐसी । (फिर जो) दण्डनायक के साथ है, उत्साह वाली है और (यहाँ से) निकट स्थल पर है । यह काञ्चीयमक का (उदाहरण है ।) पाद समुद्गक के भेदों के समान और अन्तादिक के भेदों के समान यहाँ (मध्य आदि में) भी सभी भेद समझना चाहिये ॥

'पादं द्विधा त्रिधा वा विभज्य' (३।२०) इत्युक्तम् , तत्र द्विधा विभक्ते यमकान्याख्यायेदानीं त्रिधा विभक्तस्याह—

पादस्त्रिधा विभक्तः सकलस्तस्यादिमध्यपर्यन्ताः ।
तेष्वपरत्रावृत्त्या दश दश यमकानि जनयन्ति ॥ ४८ ॥

पाद को दो या तीन अंशों में विभक्त कर (३।२०) ऐसा जा चुका है, उनमें दो अंशों में विभक्त करके यमक का व्याख्यान कर के अब (पाद को) तीन अंशों में विभक्त कर के (भेद) बताते हैं—

"समूचे पाद के तीन अंशों में विभक्त होने पर उसके आदि मध्य और अन्त अंशों के अन्य पाद के उन्हीं स्थानों में यथाक्रम आवृत्त होने पर दश दश यमक होते हैं ॥ ४८ ॥

पाद इति। यस्य पादस्य त्रिधा भाग संभवति स त्रिधा खण्डितस्ततश्च तस्यादिमध्यान्तभागा अपरत्र पादान्तरे तेष्वेव प्रथमद्वितीयतृतीयभागेषु यथाक्रमं यमिता दश दश यमकानि पूर्ववज्जनयन्ति। एवं त्रिंशद्यमकानि भवन्ति ॥

पाद इति। जिस पाद के तीन भाग हो सकते हैं वह तीन भागों में बँटकर उसके आदि, मध्य और अन्त भागों के अन्य पादों के प्रथम द्वितीय और तृतीय भागों में क्रमशः आवृत्त होने पर पहले की ही तरह दश दश यमक होते हैं। इस प्रकार तीस यमक होते हैं ॥

एतदाह—

सुमतिरिमानि त्रीण्यपि पादावृत्तिक्रमेण दशकानि।
यमकानां जानीयात्तदुदाहरणानि तद्वच्च ॥ ४९ ॥

इसे बताते हैं—

विद्वान् यमक के इन तीन दशकों (तीस प्रकारों) को पादावृत्ति के ही क्रम से ही जान ले। तथा उनके उदाहरणों को भी उसी क्रम से जान ले ॥ ४९ ॥

सुमतिरिति। एतानि यमकानां त्रीणि दशकानि प्राज्ञ पादावृत्तिक्रमेण मुखसन्दंशादिसंज्ञाभिर्जानीयात्। तदुदाहरणान्यपि तद्वदेव तेनैव प्रकारेण। सर्वं चैतद्द्विधा विभक्तपाद इव यमकजातं ज्ञेयम्। केवलं तृतीयभागकृतो विशेषः ॥

सुमतिरिति। विद्वान् को इन यमकों के तीनं दशक पादावृत्ति के ही क्रम से मुख, सदंश आदि नामों से जानना चाहिये। उनके उदाहरणों को भी उसी प्रकार से (जानना चाहिये)। इस पूरे प्रपञ्च दो अंशों में बँटे हुये पाद वाले यमक-भेदों की तरह जानना चाहिए। भेद केवल तीसरे भाग के कारण है ॥

तदेवाह—

अन्तादिकमिव पोढा विभिन्नमेतत्करोति तावन्ति।
यमकान्याद्यन्तकवत्तथापरामर्धपरिवृत्तिम् ॥ ५० ॥

उसी को बताते हैं—

अन्तादिक और आद्यन्तक के समान ही छह प्रकार को यमक और, पाद के दो अंशों में विभक्त होने पर बताये गये अर्धपरिवृत्ति नामक यमक को यह भी उत्पन्न करता है ॥ ५० ॥

अन्तादिकमिति । यथान्तादिकमाद्यन्तकं च पूर्वत्र षोढा भिन्नं सन्प्रत्येकं षड्यमकानि जनितवत्तथेदमपि । तथापरमन्यामर्धपरिवृत्तिं द्वेधाविभक्तपादवज्जनयति । तथाशब्दस्योभयत्र योगः । इति त्रयोदश यमकानि ॥

अन्तादिकमिति । जिस प्रकार अन्तादिक और आद्यन्तक पृथक् पृथक् छ छ यमक उत्पन्न करते हैं उसी प्रकार यह भी (छ प्रकार का यमक उत्पन्न करता है ।) तथा दो भागों में बटे हुये पाद की तरह दूसरा अर्धपरिवृत्ति को भी उत्पन्न करता है । तथा शब्द का दोनो स्थानों पर उपयोग होगा । इस प्रकार तेरह यमक हुये ॥

एषामुदाहरणानि कानीत्याह—

तद्वदुदाहरणान्यपि मन्तव्यानि त्रयोदशैतेषाम् ।
कृत्वार्धशश्च भागानिहापि सर्वं तथा रचयेत् ॥ ५१ ॥

इनके उदाहरण कौन हैं—इसे बताते हैं—

इसी प्रकार इनके १३ उदाहरणों को भी समझ लेना चाहिये । (विभक्त अंश को) पुनः आधे आधे में बाँट कर इसमें भी उसी प्रकार का प्रपञ्च रचना चाहिए ॥ ५१ ॥

तद्वदिति । उदाहरणान्यपि तद्वदेव त्रयोदश ज्ञेयानि । उपलक्षणं चैतत् । पादसमुद्गकवदिहापि पञ्चदशानां भेदाना सम्भवात्केवलमिह भागत्रयस्य सादृश्यम् । तत्र तु द्वयस्य पुनरपि भेदानाह—कृत्वार्धशश्चे-त्यादि । यथा पूर्वत्रार्धार्धानि कृत्वा वक्त्रशिखामालामध्याद्यन्तकाञ्चीय-मकानि कृतान्येवमिहापि कर्तव्यान्युदाहरणानि च देयानीति ॥

तद्वदिति । उदाहरणों को भी उसी प्रकार १३ जानना चाहिए । यह उप-लक्षण है । पाद समुद्गक की भाँति ही पन्द्रह भेदों के यहाँ भी सम्भव होने के कारण तीन भागों का सादृश्य ही केवल यहाँ भी है । वह (केवल) दो का ही (सादृश्य था) । और भी भेद बताते हैं—कृत्वार्धशश्चेत्यादि । जिस प्रकार पहले आधे आधे में बाँटकर वक्त्र, शिखा, माला, मध्य, आद्यन्तक, काञ्ची यमक बनाये गये उसी प्रकार यहाँ भी बनाना चाहिए और उनके उदाहरण देना चाहिये ॥

भूयो भेदान्तराण्याह—

स्थानाभिधानभाञ्जि त्रीण्यन्यानीति सन्ति यमकानि ।
आदिर्मध्येऽन्ते वा मध्योऽन्ते तत्र परिवृत्तः ॥ ५२ ॥

और भी भेद बताते हैं—

स्थानकृत नाम वाले तीन प्रकार के यमक और होते हैं—आदि भाग के मध्य और अन्त में तथा मध्य भाग के अन्त में आवृत्त होने पर (आदि मध्य, आद्यन्त और मध्यान्त) यमक होते हैं ॥ ५२ ॥

स्थानेति। त्रिधा विभक्ते पादेऽन्यानि त्रीणि वक्ष्यमाणानि यमकानि सन्ति। किंनामधेयानीत्याह—स्थानाभिधानभाञ्जीति। स्थानकृतमभिधानं भजन्ते यानि। कथमित्याह—आदिभागे मध्यभागेन यमकिते आदिमध्ययमकम्। आदिभागेऽन्त्येन चेत्तदाद्यन्तयमकम्। मध्यभागेऽन्त्येन यदि तदा मध्यान्तयमकम् ॥

स्थानेति। पाद को तीन खण्डों में करने पर आगे बताये जाने वाले तीन अन्य यमक होते हैं। उनके नाम क्या हैं—इसे बताते हैं—स्थानाभिधानभाञ्जीति। जो स्थान के नाम पर (अपनी) संज्ञा पाते हैं। कैसे—इसे बताते हैं—आदि भाग के मध्य भाग में आवृत्त होने पर आदि मध्ययमक होता है। आदि भाग के अन्त्यभाग में आवृत्त होने पर आद्यन्त यमक होता है। (इसी प्रकार) मध्यभाग अन्त्य के साथ जब आवृत्त होता है तब मध्यान्त यमक होता है ॥

तदुदाहरणत्रयं क्रमादाह—

स रणे सरणेन नृपो वलितावलितारिजनः।
पदमाप दमात्स्वमतेरुचितं रुचितं च निजम् ॥ ५३ ॥

उनके क्रमशः तीन उदाहरण देते हैं—

(अपने) पराक्रम से शत्रुओं को घेर लेने वाले उस राजा ने समर में (अपनी) सवारियों से (शत्रुओं को) पराजित कर देने के कारण अपनी बुद्धि के अनुरूप और अभीष्ट, अपने स्थान को प्राप्त किया ॥ ५३ ॥

स इति। स कश्चिन्नृपो रणे समरे सरणेन यानेन तथा दमादुपशमाच्च हेतोः स्वमतेर्निजबुद्धेरुचितं योग्यं रुचितमिष्टं च निजं स्वकीयं पदं स्थानमाप लेभे। कीदृशोऽसौ। वलिता वलिरयं तया वेष्टितोऽरिजनः शत्रुलोको येन स तथाविधः। इत्यादिमध्यम् ॥

स इति। ऐसे किसी राजा ने (अपनी) सवारियों और इन्द्रियों पर विजय पाने के कारण समर में अपनी बुद्धि के अनुरूप और अभीष्ट अपने स्थान को प्राप्त किया। कैसा है वह (राजा)? शक्ति के कारण जिसने शत्रु मण्डल को घेर लिया है—ऐसा। यह मध्ययमक का उदाहरण है ॥

घनाघ नायं न नभा घनाघनानुदारयन्नेति मनोऽनु दारयन् ।
सखेऽदयं तामविलास खेदयन्नहीयसे गोरथवा न हीयसे ॥५४॥

हे बहुपाप, सजल मेघों को फैलाता हुआ, तदनन्तर हृदय को वेधता हुआ, यह श्रावण मास नहीं है ऐसा नहीं। हे निश्चेष्ट मित्र! निर्दयता पूर्वक उस (नायिका) को दुःखी बनाकर सर्प सा आचरण कर रहे हो अथवा बैल से कम नहीं हो (अर्थात् बैल ही हो) ॥ ५४ ॥

घनेति। एतत्प्रावृपि पथिकस्य सुहृदोच्यते—हे घनाघ गृहाननुसरणाद्बहुपाप, अयमसौ नभाः श्रावणो मासो न नैति। अपि त्वायात्येव। नभ शब्दो मासवाचकः पुलिङ्गः। कीदृशो नभा घनाघनान्सजलजलदानुदारयन्विस्तारयन। अनु पश्चाच्च मनश्चित्तं दारयन्विपाटयन्। तथा हे सखे अविलास निर्लील, तां कान्तामदयं निर्दयं खेदयन्नुद्वेजयन्नहीयसे सर्पायसे। अथवा गोर्बलीवर्दान्न हीयसे बलीवर्द एवासीत्यर्थः। इत्याद्यन्तयमकम् ॥

घनेति। वर्षा काल में पथिक का मित्र (उससे) इसे कह रहा है— घर पर न जाने के कारण हे बहुपाप! यह सावन महीना नहीं आ रहा है ऐसा नहीं (अर्थात् सावन ही है)। 'नभ' शब्द मास के अर्थ में पुल्लिंग में प्रयुक्त होता है। कैसा नभस् (महीना)? जल भरे बादलों को फैलाने वाला तदनन्तर (वियोगियों का) हृदय वेधन करने वाला। और हे मित्र! उस प्रिया को निर्दयता से पीड़ित करते हुये तुम सर्प हो रहे हो। अथवा बली बैल से कम नहीं हो अर्थात् बली बैल ही हो। यह आद्यन्त यमक है ॥

असतामहितो युधि सारतया रतया।
स तयोरुरुचे रुरुचे परमेभवते भवते ॥ ५५ ॥

"दुष्टों का द्रोहकारी अत एव रण में पूजित किसी ने उस उत्कृष्ट आसक्ति से विशाल हाथियों वाले, विस्तीर्ण कान्ति वाले आप के लिये प्रीति उत्पन्न किया ॥ ५५ ॥

असतामिति। हे उरुरुचे विस्तीर्णकान्ते। अथवा उर्वी रुग्यस्य स तस्मै विस्तीर्णकान्तये। स कश्चिद्वीरो भवते तुभ्य रुरुचे प्रीतिमुत्पादितवान्। तया जगत्प्रसिद्धया युधि रणे सारतयोत्कृष्टतया हेतुभूतया। कीदृश्या। रतया सक्तया। संवद्धयेत्यर्थः। कीदृशोऽसौ। असतां दुर्जनानामहितो द्रोहकारी। अत एव महितः पूजितः। भवते कीदृशाय। परमा उत्कृष्टा इभा हस्तिनो विद्यन्ते यस्य स तथा तस्मै ॥

असतामिति। हे विस्तीर्ण कान्ति वाले! अथवा विस्तृत है कान्ति जिसकी उस विस्तीर्ण कान्ति वाले के लिये (इस प्रकार समास विच्छेद करना चाहिये)। उस किसी वीर ने तुम्हारे प्रति प्रीति उत्पन्न की। उस समार प्रसिद्ध—लड़ाई में—अत्यन्त उत्कृष्ट कारण से। किस प्रकार से। सत्ता से अर्थात् सबद्ध से। कैसा है वह (वीर) दुष्टों से द्रोह करने वाला अत एव पूजित। किस प्रकार के आप के लिये? उत्कृष्ट हैं हाथी जिसके ऐसे (आपके लिये)।

अथोपसंहारं कुर्वन्ननियतदेशावयवयमकानामानन्त्यमाह—

यमकानां गतिरेषा देशावयवानपेक्षमाणानाम् ।
अनियतदेशावयवं तपरमसंख्यं सदैवास्ति ॥ ५६ ॥

अब उपसंहार करते हुये अनिश्चित देश और अवयव वाले यमकों की असख्यता बताते हैं—

स्थान और अवयव (अंश) की अपेक्षा करने वाले यमकों की यही गति है। देश (स्थान) और अवयव की अपेक्षा के बिना होने वाले यमकों की सख्या तो अपरिमित है ॥ ५६ ॥

यमकानामिति। देश आदिमध्यान्तलक्षण। अवयवोऽर्धत्रिभागादि। तौ देशावयवावपेक्षमाणानामत्यजतां यमकाना गतिरेषा परिपाटीयं पूर्वोक्ता। यत्तु यमक देशावयवौ नापेक्षते तदपरमसख्यमसंख्यातम्। तच्च महाकविलक्ष्येपु सदैव साध्वेवास्ति विद्यते। एतदुक्तं भवति—स्वेच्छाकृतत्वेनानन्तत्वात्तस्य लक्षण कर्तुं न शक्यते। केवलं महाकविलक्ष्यदर्शनाज्ज्ञेयम् ॥

यमकानामिति। देश अर्थात् आदि मध्य स्थान। अवयव अर्थात् आधा तिहाई आदि भाग। उन देश और अवयव की अपेक्षा करने वाले यमकों की रीति यह पहले बता दी गयी। जो यमक स्थान और अंश की अपेक्षा नहीं करता वह असख्य है। उसका उदाहरण भी महाकवियों में मिलता ही है। तात्पर्य यह है—स्वेच्छापूर्वक रचे जाने के कारण और असख्येय होने के कारण (उसका) स्वरूप बताना संभव नहीं है। केवल (उसे) महाकवियों के उदाहरणों से जानना चाहिये ॥

अत्र तु दिङ्मात्रप्रदर्शनार्थमाह—

कमलिनीमलिनी दयितं विना न सहते सह तेन निषेवितम् ।
तमधुना मधुना निहितं हृदि स्मरति सा रतिसारमहर्निशम् ॥५७॥

उसका मार्ग मात्र दिखाने के लिये कहते हैं—

उस (प्रिय) के साथ साथ सेवन की गयी कमलिनी को भ्रमरी प्रिय के अभाव में बर्दाश्त नहीं कर पाती। उस प्रियको इस समय हृदय में रखकर वह दिन रात रति सर्वस्व को स्मरण करती है ॥ ५७ ॥

कमलिनीति। सालिनी भ्रमरी दयितं प्रियं विना कमलिनीं पद्मिनीं न सहते न क्षमते तां दृष्ट्वा तप्यत इत्यर्थः। कीदृशीं कमलिनीम्। तेन दयितेन सह समं निषेवितम्। किं तर्हीदानीं करोतीत्याह—तं प्रियमधुनेदानीं मधुना वसन्तेन हृदि मनसि निहितमर्पितं रतिसारं रसप्रधान सा स्मरति ध्यायति। अहर्निशं दिवानिशम्। अत्र न देशविभागेनावृत्तिर्नाप्यवयवविभागेन। यतो द्रुतविलम्बिताख्यं द्वादशाक्षरमेतद्वृत्तम्। अस्यार्धे षडक्षराणि। अत्र च प्रथममक्षरं मुक्त्वा त्रीणि यमकितानि॥

कमलिनीति। वह भ्रमरी प्रिय की अनुपस्थिति में कमलिनी को नहीं सह सकती है। अर्थात् उसे देखकर कष्ट पाती है। कैसी कमलिनी को? उस प्रिय के साथ जिसका सेवन कर चुका है। फिर इस समय क्या करती है,—इसे बताते हैं—वसन्त के द्वारा हृदय में भर दिये गये कामावेश को—प्रिय को ध्यान करती है। रात दिन यहाँ न तो स्थान के नियम से आवृत्ति हुयी है न तो अंश के नियम से। यह बारह अक्षरों वाला द्रुतविलम्बित नामक छन्द है। इसके आधे में छ अक्षर हैं। यहाँ प्रथम अक्षर को छोडकर तीन अक्षरों की आवृत्ति हुई है॥

तथा—

कमलिनी मरसा सरसामियं विकसितानवमं नवमण्डनम्।
किमिति नाधिगता विगतादर्शं मधुकरेणु यताणवता कृतम्॥५८॥

और भी—

जलाशयों का श्रेष्ठ अलंकरण रूप यह प्रफुल्ल कमलिनी भ्रमर को क्यों नहीं मिली। हा कष्ट है—गुञ्जार करते हुये उसने क्या ही दुराचार किया॥ ५८॥

कमलिनीति। इयं कमलिनी पद्मिनी किमिति तस्मान्मधुकरेण भृङ्गेन नाधिगता न संप्राप्ता। धिक्कष्टम्। तेनाणवता शब्दवता तादृशमयुक्तं कृतम्। धिग्वतशब्दावत्र खेदाधिक्यं सूचयतः। कीदृशी। सरसा नूतना। विकसिता प्रफुल्ला। अत एव सरसां जलाशयानामनवम श्रेष्ठं नवमन्डनं प्रत्यग्रालङ्करणम्। अत्रापि देशावयवानपेक्षयावृत्तिः॥

कमलिनीति। उस भौंरे ने इस कमलिनी का भोग क्यों नहीं किया। खेद है! गुञ्जार करते हुये और ऐसा आचरण किया। 'धिग्' और 'बत' शब्द यहाँ कष्ट का आधिक्य सूचित करते हैं। कैसी (कमलिनी) नवीन—खिली हुयी—अतएव जलाशयों का श्रेष्ठ नूतन अलङ्करण। यहाँ भी आवृत्ति स्थान और अंश की अपेक्षा के बिना हुयी है॥

अध्यायमुपसंहरन्यमकस्वरूपं विषयं चाह—

इति यमकमशेषं सम्यगालोचयद्भिः
सुकविभिरभियुक्तैर्वस्तु चौचित्यविद्भिः ।
सुविहितपदभङ्गं सुप्रसिद्धाभिधानं
तदनु विरचनीयं सर्गबन्धेषु भूम्ना ॥ ५९ ॥

अध्याय का उपसंहार करते हुये यमक के स्वरूप और विषय को बताते हैं—

इस प्रकार सभी प्रकार के यमक का भली भाँति विचार करके, औचित्य को जानने वाले, सावधान सुकवि सुन्दर पद-भङ्गों और सुप्रसिद्ध वस्तु वाचक शब्दों को महाकाव्यों में यथाशक्ति रचे ॥ ५९ ॥

इतीति । इति पूर्वोक्त यमकमशेषं सर्वं समस्तपादैकदेशजं सम्यग्यथान्यायमालोचयद्भिः सत्कविभिरभियुक्तैः सावधानैः । तथा वस्तु च विषयविभागमालोचयद्भिः । यथा कस्मिन्रसे कर्तव्यम्, क वा न कर्तव्यम् । यमकश्लेषचित्राणि हि सरसे काव्ये क्रियमाणानि रसखण्डना कुर्युः । विशेषतस्तु शृङ्गारकरुणयोः । कवेः किलैनानि शक्तिमात्र पोषयन्ति, न तु रसवत्ताम् । यदुक्तम्—'यमकानुलोमतदितरचक्रादिभिदो हि रसविरोधिन्यः । अभिधानमात्रमेतद्गड्डरिकादिप्रवाहो वा ॥' प्रयोगस्तु तेषां खण्डकाव्येषु देवतास्तुतिषु रणवर्णनेषु च । तदेवाह—औचित्यविद्भिरिति । औचित्यं यमकादिविधानास्थानस्थानादिकं विदन्ति ये ते । कीदृश यमकम् । सुष्ठु विहिता हृदयंगमा पदभङ्गा यत्र तत्तथाभूतम् । तथा सुप्रसिद्धान्यभिधानानि वस्तुवाचकशब्दा यत्र तत्तथाभूत यमकम् । तदनु चौचित्यादिज्ञानानन्तरं विरचनीयम् । भूम्ना बाहुल्येन सर्गबन्धेषु महाकाव्येषु । नाटककथाख्यायिकादिषु पुनः स्वल्पमेवेत्यर्थः ॥

इति श्रीरुद्रटकृते काव्यालङ्कारे नमिसाधुविरचित-
टिप्पण-समेतः तृतीयोऽध्यायः समाप्तः ।

इतीति । इस प्रकार पहले बताये गये समस्त पादगत और एकदेशगत निखिल यमक को सावहितचेता महाकवियों को भली भाँति विचार कर विषय विभाग की आलोचना करके (रचना करनी चाहिये)। जैसे—किस रस में यमक की रचना करनी चाहिये किसमें नहीं करनी चाहिए । सरसकाव्य मे यमक श्लेष और चित्र की रचना होने पर रस भङ्ग हो जाता है । विशेषकर शृङ्गार और करुण (रस वाले काव्यों) में । ये केवल कवि की शक्ति को बढ़ाते हैं रसवत्ता को नहीं । जैसा कि कहा गया है—यमक, अनुलोम और उससे भिन्न चक्र आदि भेद रस के विरोधी होते हैं ये नाम मात्र हैं अथवा गड्डरिका-प्रवाह

(से इन्हें लोग रचते हैं)। उसका प्रयोग दण्ड काव्य, देवता की स्तुति और युद्ध के वर्णन में करना चाहिए। उसे ही बताते हैं—औचित्यविद्भिरिति। औचित्य—यमक रचने के स्थल—अस्थल को जो पहचानते हैं। कैसे यमक को—? जहाँ हृदयस्पर्शी पदभङ्ग हों जहाँ प्रसिद्ध वस्तुवाचक शब्द हो, ऐसे (यमक को)। इतनी क्षमता होने पर औचित्य आदि की पहिचान के बाद (यमक की) रचना करनी चाहिए। प्रायः महाकाव्यों में। अर्थात् नाटक, *कथा और आख्यायिका में (यमक के लिये) बहुत ही कम अवसर है ॥*

इस प्रकार नमि साधु रचित टिप्पण से युक्त श्री रुद्रट रचित
काव्यालंकार का तृतीय अध्याय समाप्त हुआ।

०

चतुर्थोऽध्यायः

यमकं व्याख्याय श्लेषं व्याचिख्यासुराह—

वक्तुं समर्थमर्थं सुश्लिष्टाक्लिष्टविविधपदसंधि ।
युगपदनेकं वाक्यं यत्र विधीयेत स श्लेषः ॥ १ ॥

यमक का व्याख्यान करके अब श्लेष का व्याख्यान करने की इच्छा से कहते हैं—

अर्थ बताने में समर्थ, सुप्रयोजित कष्ट कल्पना-रहित, नाना प्रकार के सुबन्त-तिङन्त पदों की सन्धिवाले, एक ही प्रयत्न से उच्चारणीय अनेक वाक्यों की जहाँ रचना की जाती है उसे श्लेष नामक (शब्दालंकार) कहते हैं ॥ १ ॥

वक्तुमिति। यत्रालंकारे युगपत् तुल्यकालमेकप्रयत्नेनैवानेकं द्व्यादिकं वाक्यं विधीयेत स श्लेषः। युगपत्पदग्रहणान्महायमकादीनां श्लेषत्वनिवृत्तिः। कीदृशम्। वाक्यमर्थमभिधेयं वक्तुं भणितुं समर्थं शक्तम्। अनेकमितीहापि द्रष्टव्यम्। तथा सुष्ठु श्लिष्टः सुयोजितोऽक्लिष्टः कष्टकल्पनारहितो विविधो नानाविधः पदानां सुप्तिङन्तानां सन्धिरेकीभावो यत्र तत्सुश्लिष्टाक्लिष्टविविधपदसन्धीति ॥

वक्तुमिति। जिस अलंकार में एक ही काल में एक ही प्रयत्न से उच्चारणीय अनेक-दो आदि वाक्यों की रचना की जाती है उसे श्लेष नामक (अलंकार) कहते हैं। (कारिका में) 'युगपत्' का उपादान महायमक आदि को श्लेष से भिन्न बताने के लिये किया गया है। कैसे वाक्य की ? अभिधेय (प्रतिपाद्य अर्थ) को बताने में समर्थ वाक्य की। अनेक (अर्थात् अनेक अर्थ) को यहाँ भी समझना चाहिये। फिर (कैसे वाक्य की) ? भली भाँति जहाँ सुबन्त—तिङन्त पदों की श्लिष्ट और सुप्रयोजित सन्धि की गयी हो तथा कष्ट कल्पना से रहित हो।

सामान्यलक्षणमभिधाय विशेषाभिधानाय श्लेषप्रकारानाह—

वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानाम् ।
अत्रायं मतिमद्भिर्विधीयमानोऽष्टधा भवति ॥ २ ॥

श्लेष के सामान्य स्वरूप को बताकर उसका विशेष प्रपञ्च बताने की इच्छा से श्लेष के भेदों को बताते हैं—

शब्दालंकार में वर्ण, पद, लिङ्ग, भाषा, प्रकृति प्रत्यय विभक्ति और वचन के भेद से रचा जाता हुआ यह (श्लेष) आठ प्रकार का होता है ॥ २ ॥

वर्णपदेति। अत्र शब्दालंकारेष्वयं श्लेपो मतिमद्भिर्विधीयमानो धीमद्भिः क्रियमाणोऽष्टधाप्रकारो भवति। केषा विधीयमान इत्याह—वर्णेत्यादि। वर्णश्च पदं च लिङ्गं च भाषा च प्रकृतिश्च प्रत्ययश्च विभक्तिश्च वचन च वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानि तेषाम्। वर्णपदादिविषयभेदात्तन्नामाष्टधा श्लेष इत्यर्थः। अत्रेति परमतनिरासार्थम्। अन्यैर्ह्यविशेषेण शब्दार्थयो' श्लेपोऽभ्यधायि। वर्णादिनिर्देशादेवाष्टविधत्वे लब्धेऽष्टधेति नियमार्थम्। भेदे सत्यष्टधैव नान्यथेत्यर्थः। केचिद्धि पदेपु लिङ्गमन्तर्भावयन्ति। प्रत्यये च विभक्तिवचने। विभक्तौ च वचनम्। तदेतन्न चारु। भेददर्शनात्। तथाहि हार इति भूषण मुक्ताकलाप, हरणं हारो मोष., हरस्याय हार. कोऽप्यर्थः इत्यत्र पदश्लेपेऽपि लिङ्गश्लेपो न विद्यते। सर्वत्र पुंलिङ्गत्वात्। तथा पद्मो निधिः, पद्मं कमलम्, पद्मा श्रीरिति लिङ्गश्लेपेऽपि पदमभिन्नम्। तथा तपनस्यायं तापयतीति वा तापनः। इत्यादिपु प्रत्ययभेदेऽपि विभक्तिवचनभेदो न विद्यते। तथा सता मुख्यः पुरःसर. सन्मुख्य' सच्छोभनं मुखं यासां ताः सन्मुख्यः इत्यत्र वचनभेदेऽपि विभक्तिभेदो न विद्यते इति भेदप्रतीतेर्न शोभनोऽन्तर्भाव इति ॥

वर्णपदेति। यहाँ शब्दालङ्कारों में यह श्लेष विद्वानों के द्वारा रचा गया आठ प्रकार का होता है।

किनका रचा जाता हुआ इसे बताते हैं—वर्णेत्यादि। वर्ण, पद, लिङ्ग, भाषा, प्रकृति, प्रत्यय, विभक्ति और वचन का। वर्ण, पद आदि विषयों के भेद से उन्हीं के नाम से संज्ञा पाने वाला श्लेष आठ प्रकार का होता है। 'अत्र' का (कारिका में उपादान) दूसरों के मत को खण्डित करने के लिये किया गया है। अन्य (आलङ्कारिकों) ने शब्द और अर्थ श्लेष को बिना किसी भेद के व्याख्यान किया है। वर्ण आदि की गणना कर देने से ही आठ प्रकार का होना सिद्ध हो जाने से 'अष्टधा' नियमार्थ में प्रयुक्त है। भेद होने पर आठ ही प्रकार का होगा अन्य (सात या नव) प्रकार का नहीं यह तात्पर्य है। कुछ लोग लिङ्ग को पदों में ही अन्तर्भावित करते हैं। इसी प्रकार विभक्ति और वचन को प्रत्यय में, विभक्ति में वचन को। यह सङ्गत नहीं है। भेद तो स्पष्ट है—जैसे (एक ही) हार पद आभूषण-मोती की माला; चोरी और शिव जी की वस्तु—इन भिन्न अर्थों में (प्रत्यय की भिन्नता के कारण) आता है। यहाँ पद के श्लिष्ट होने पर भी लिङ्ग श्लिष्ट नहीं है। सभी अर्थों में पुल्लिङ्ग में ही प्रयुक्त होता है। इसी प्रकार पद्म (निधि) कमल के अर्थ में (पद्मम्) और लक्ष्मी के अर्थ में पद्मा में लिङ्ग के श्लिष्ट होने पर भी पद वही है। इसी प्रकार 'तापन' में

'तवनत्यायम्' 'तापयतीति वा' से प्रत्यय के भिन्न होने पर भी विभक्ति और वचन भेद भिन्न नहीं है। इसी प्रकार 'सन्मुख्य:' में—सज्जनों में प्रमुख। और सुन्दर मुखों वाली में वचन में भेद होने पर भी विभक्ति में भेद नहीं हैं। अतएव विभक्ति में वचन का भेद प्रतीत होने पर अन्तर्भाव असङ्गत नहीं है।

यथोद्देशस्तथा निर्देश इत्यादौ वर्णश्लेषलक्षणमाह—

यत्र विभक्तिप्रत्ययवर्णवशादैकरूप्यमापतति ।
वर्णानां विविधानां वर्णश्लेषः स विज्ञेयः ॥ ३ ॥

उद्देश के अनुसार निर्देश होना चाहिये इस नियम के अनुसार सर्वप्रथम वर्णश्लेष का लक्षण बताते हैं। 'जहाँ विभक्ति, प्रत्यय अथवा वर्ण के बल से पृथक् वर्णों का ऐकरूप हो जाता है उसे वर्णश्लेष जानना चाहिए ॥ ३ ॥

यत्रेति। यत्र विविधानां नानारूपाणां वर्णानामैकरूप्यं साम्यमागच्छति स वर्णश्लेषः। विरूपाणां कथं सादृश्यमित्याह—विभक्तिबलात्प्रत्ययबलाद्वर्णबलाच्चेति ॥

यत्रेति। जहाँ नाना प्रकार के वर्णों का ऐकरूप्य—साम्य हो जाता है उसे वर्णश्लेष कहते हैं। विविध रूपों का होने पर भी कैसे साम्य होता है—इसे बताते हैं—विभक्ति के कारण—प्रत्यय के कारण और वर्ण के कारण—॥

उदाहरणमिदम्—

साधौ विधावपर्तावपराहावास्थितं विपादमितः ।
आयामि दानवत्त्वं तद्रम्यं परमकुर्वाणः ॥ ४ ॥

यह उदाहरण है—(१) उस श्रेष्ठ धर्म दान देने के आचरण को त्याग देने के कारण निरन्तर मानसिक पीडा देने वाले, दूसरे सर्प के समान स्थित भाग्य में स्थित कष्टदायी विपाद को (वह दानवीर) प्राप्त हुआ ॥ ४ ॥

(२) हे दानव बाण ! तुम इस प्रदेश से सुन्दर राहु से रहित, सदा स्थित चन्द्र में, उत्तम आस्था वाले, शिव को प्राप्त हुए हो क्योंकि उनका निवास उच्च-भूमि (निर्वाण पद) है ॥ ४ ॥

साधाविति। अत्र महासत्त्वो दरिद्रो वर्ण्यते—कश्चिन्नरो दानवतो भावो दानवत्त्वं दातृत्वं तत्पुराकृतमकुर्वाणोऽसम्पादयन्विपादं खेदमितः प्राप्तः। कीदृशं दातृत्वम्। विधिर्दैवं तस्मिन्नाश्रितमायत्तम्। दैवाधीनमित्यर्थः। दैवेऽनुकूले भवतीति भावः। कीदृशे विधौ। सहाधिभिर्वर्तत इति साधिस्तस्मिन्। नित्यमेव मनःपीडावह इत्यर्थः। तथापर्तौ सदा सन्निधानादपगत ऋतुः कालविशेषो यस्य सोऽपर्तुस्तस्मिन्। तथापराहावविद्यमानः परः प्रतिपक्षो यस्यासावपरः स चासावहिश्च सर्पश्च पीडा-

कारित्वादपराहितस्मिन्। अपरस्याहेर्नकुलादिर्हिंसको भवति, अस्य तु नैव। अन्यच्च कीदृशं दानवत्त्वम्। आयास्यघटनादभीक्ष्ण खेददायि। तथा धर्म्यं स्वभावतो धर्मादनपेतम्, अत एव परं श्रेष्ठम्। एष एकस्य वाक्यस्यार्थः॥ अपरस्य तु—साधावित्यादि कश्चिद्बाणासुरमाह—हे दानव दनुसुत, त्वं बाणो बाणाख्य इतोऽस्मात्प्रदेशाद्विपाद कालकूटभक्षक शिवमायास्यागच्छसि। कीदृश शिवम्। विधौ चन्द्रमस्याश्रितमास्या सजातास्येति तम्। कीदृशे विधौ। साधौ सुन्दरे। तथापगता ऋतिर्गमन यस्यासावपर्तिस्तस्मिन् सदावस्थिते। तथापगतो राहुर्विधुन्तुदो यस्मादसौ तथाविधस्तस्मिन्। किमिति तत्सकाशमायासीत्याह—तस्य हर्म्यं स्थानं तद्धर्म्यं यत परमोत्कृष्टा कुर्भूमि। निर्वाणपदमित्यर्थ.। साधावित्याद्याविकारौकारयो. सप्तमीविभक्तिवशादेकरूपम्। आश्रितमित:प्रभृतिषु प्रत्ययवशात्। तद्धर्म्यमित्यत्र धकारहकारवशादिति। परमसुर्वाण इत्यत्रैकत्रौष्ठ्योऽन्यत्र दन्त्यौष्ठ्यो वकारस्तत्कथमेकरूपता वर्णानाम्। सत्यम्। यमकश्लेशचित्रेषु बवकारयोरोष्ठ्यदन्त्यौष्ठ्ययोरभेदो दृश्यते। यथा—'तस्यारिजातं नृपतेरपश्यद्वलं वनम्। ययौ निर्भरसभोगैरपश्यद्वलम्बनम्॥' तथा नकारणकारयोश्च न भेद। यथा—'वेग हे तुरगाणां जयन्नसावेति मङ्गहेतुरगानाम्' इति शिवभद्रस्य। विसर्जनीयभावाभावयोश्च न विशेषः। यथा—'द्विषतां मूलमुच्छेत्तुं राजवशादजःयथाः। द्विषद्भयमस्यसि कथं वृकयूथादजा यथा॥' अत्र ह्येकत्राजायथा इति विसर्गान्तं क्रियापदम्, अपरत्र यथाशब्दोऽव्ययम्। तथान्त्योर्मकारनकारयोश्च न भेदः। यथा—'प्राप्यामुरथं वीर समीरसमरहसम्। द्विषतां जहि निशेषपृतना' समरं हसन्॥' अत्र हि समरहसमिति मान्तम्, हसन्निति नान्तं पदम्। तथा व्यञ्जनात्परस्यैकस्य व्यञ्जनस्य द्वयोर्वा न विशेषः। यथा—'शुक्ले शुक्लेशनाशं दिशति' इत्यादौ शुक्ले शुक्ले यमकः। तस्मिश्चैत्र शुक्लगुणयुक्ते, अन्यत्र शुच' क्लेशस्य च नाशं दिशतीत्यर्थः। अत्र ह्येकत्र ककाराल्लकार एवैकं व्यञ्जनम्। अन्य ककारो लकारश्च द्वयमिति॥

साधाविति। यहाँ तेजस्वी दरिद्र का वर्णन किया जा रहा है--दान देने के कार्य को न करता हुआ। जिसे वह पहले कर चुका है, कष्ट को प्राप्त हुआ। कैसे दान—कर्म को १—जिसमें भाग्य आश्रित होता है—अर्थात् दैवाधीन--एव दैव के अनुकूल होने पर ही जो होता है। कैसे दैव के ? साधि अर्थात् मनो वेदना देन वाले—यह तात्पर्य है।

तथा अपर्तु में--समीप से सदैव जिसके काल विशेष बीत गया है—ऐसे। तथा अपराहि में--जिसका कोई प्रतिवादी नहीं वह हुआ अपर—तथा सर्प

पीडा देने के कारण अपरादि (दैव के)। दूसरे सर्प के तो नेवले आदि हिंसक होते हैं—इस (भाग्य रूप सर्प) के नहीं। फिर कैसे दान कर्म को (न करने के कारण)! न किये जाने के कारण जो निरन्तर मनो-वेदना उत्पन्न करता है तथा जो धर्म रूप—स्वभाव से ही धर्म के समीप होने के कारण—वरीय है। यह एक वाक्य का अर्थ है॥ दूसरे वाक्य का भी—साधाविलादि। कोई बाणासुर से कहता है—दनु के पुत्र हे दानव! बाण नामधारी तुम इस प्रदेश से विष खाने वाले शिव को प्राप्त हुये हो। (फिर) कैसे शिव को! चन्द्रमा में जिनकी आस्था उत्पन्न हो गयी है। कैसे चन्द्रमा में। सुन्दर और जिसमें (घटना बढ़ना रूप) क्रिया व्यय नहीं है। अर्थात् जो सदा अवस्थित है, इसके अतिरिक्त (जो) राहु के प्रकोप से मुक्त है। क्यों उसके पास आये हो—इसे बताते हैं—क्यों कि उस (शिव) का निवास स्थान अत्यन्त उत्कृष्ट भूमि है। अर्थात् निर्वाण पद है। 'साधौ' में सप्तमी विभक्ति के कारण इकार और उकार में समरूपता है। 'आस्थितम्' 'स्त.' में प्रत्यय के कारण ऐकरूप्य है। (इसी प्रकार) *'तद्धर्म्यम्' में (एकरूपता) धकार और दकार वर्ण के कारण है।*

परमकुर्वाण' में एक जगह ओष्ठ्य और दूसरी जगह दन्त्योष्ठ्य वकार है। फिर एकरूपता कैसे हुयी। सत्य है। यमक, श्लेष और चित्र के स्थलों में ओष्ठ्य और दन्त्योष्ठ्य ब और व में भेद नहीं किया जाता है। जैसे—उस राजा का निर्बल शत्रु समुदाय अवलम्बन को न देखकर निर्भर समोगों के अभाव में वन में चला गया।

तथा नकार और णकार में भेद नहीं होता है। जैसे—घोड़ों के वेग को *जीतता हुआ पर्वतों के भङ्ग होने का कारण भूत यह जा रहा है। यह शिव* भद्र (कवि) का है। विसर्ग की सत्ता और असत्ता में भेद नहीं किया जाता है। जैसे—शत्रुओं की जड़ काटने के लिये राजकुल में उत्पन्न हुये हो; भेड़ियों के समुदाय से बकरी के समान क्यों डर रहे हो॥' इस उदाहरण में एक स्थान पर "अजायथाः' विसर्गान्त क्रियापद है और दूसरे स्थान पर यथा शब्द अव्यय है। इसी प्रकार अन्त में आने वाले मकार और नकार में भेद नहीं किया जाता है। जैसे—हे वीर पवन के समान वेग वाले प्राण रथ को पहुँचाओ, शत्रुओं की निखिल सेना को हँसते हुये लड़ाई में मार डालो। यहाँ 'समरहसम्' मान्त पद है और 'हसन्' नान्त पद। तथा व्यञ्जन से परे एक या दो वर्णों में भेद नहीं किया जाता है। जैसे शुक्र में क्ष्ट का अभाव बताता है। इत्यादि में शुक्र शुक्र में यमक है। यहाँ एक स्थल पर अर्थ है शुक्र गुण युक्त और अन्यत्र 'शुक्र', 'क्लेश' के नाश को बताता है। यहाँ एक स्थल

पर ककार के बाद लकार एकमात्र व्यञ्जन है और दूसरे स्थल पर ककार और लकार दो व्यञ्जन है।

पदश्लेष—

यस्मिन्विभक्तियोगः समासयोगश्च जायते विविधः।
पदभङ्गेषु विविक्तो विज्ञेयोऽसौ पदश्लेषः ॥ ५ ॥ ॥

अब पद श्लेष (का लक्षण कहते हैं)—जहाँ पद भङ्गों में नाना प्रकार का विभक्ति योग और समास योग होता है वहाँ स्पष्ट ही पदश्लेष होता है ॥ ५ ॥

यस्मिन्निति। यत्र वाक्ये विभक्तियोगो विविधो नानासमासयोगश्च जायते। केषु। पदभङ्गेषु सत्सु। विविक्त स्फुटः स पदश्लेषः ॥

यस्मिन्निति। जिस वाक्य में नाना प्रकार के विभक्तियों के योग और समासों के योग होते हैं। क्या होने पर ? पद भङ्गों के होने पर (वह स्फुट ही पद श्लेष (अलङ्कार होता है)।

उदाहरणमिदम्—

सुरतरुतललसगलन्नयनोदकलालसत्कुचारोहम्।
समराजिदन्तरुचिरस्मिते नमदसौ शरीरमदः ६ ॥
नवरोमराजिराजितवलिवलयमनोहरतरसारं भा।
धवलयति रोहितानवमद्ध्यानमदाहितस्तनि ते॥७॥ (युग्मम्)

उदाहरण यह है—(१) दबती हुयी कृशता वाली कटि पर झुके हुये उभरे दोनों स्तनों वाली, दन्तपंक्ति के अतिप्रिय होने के कारण सुन्दर मुस्कान वाली, तुम्हारी यह कान्ति संयोग के संभाषणों में लालायित कण्ठवाली, नेत्र वारि के प्रवाह से सुशोभित स्तनों की ऊँचाई वाली, नूतन रोमपंक्ति से शोभित, वलयाकार त्रिवली से अत्यन्त मनोहर इस शरीर को शुभ्र बना रही है ॥ ६-७ ॥

(२) कल्प वृक्ष के नीचे अलसाये हुये दुर्नीतियों वाले शत्रुओं को दूर करने की कला से सुशोभित पृथ्वी पर पृथ्वी पर (यात्रा) (कुचारः) रण में अजेय (प्रतिमर्दों) की हिंसा का मैं आदी हूँ। इसलिये (नेम) धानुष्कों को पछाड़ने का मेरा यह दर्प श्रेष्ठ नहीं है। (मित्रों को सङ्केत करके कहता है) देवों के प्राङ्गण में अजेय बलि की सेना को रोकने की चिन्ता में लगे हुये विष्णु के से तात्पर्य और अनुष्ठान वाले! धव में छिप जाने के कारण मुझसे मंदरस्थित चिर चिन्ता के तिरोहित हो जाने के कारण, मदोन्मत्त शत्रुओं के बीच में (उन शत्रु-गणों की हिंसा के कारण) तलवार की रणन् होने पर (सावधान हो जाओ)।

सुरेति । नवरोमेति । कश्चिच्चाटुकृतिप्रियामाह—हे समराजिदन्तरुचिरस्मिते अविषमदन्तपङ्क्तिकान्तहसिते, तथासौ भा एषा दीप्तिरद एतच्छरीरं वपुर्धवलयति शुक्लयति । कीदृशम् । सुरतरुतेषु निधुवनभणितेषु लालसो लम्पटो गलः कण्ठो यस्य तत्तथाभूतम् । तथा प्रियसन्निधानाद्वनयनोदकमानन्दलोचनवारि तस्य यो लालः प्रसरणं तेन सन्धोभनकुचारोह स्तनोच्छ्रायो यत्र तत्तथाभूतम् । तथा नमत्स्तनाभोगभारान्नम्रम् । तथा नवा नूतना या रोमराजी रोमलेखा तया राजितं भूषितं यद्वलिवलयं वलयाकारं वलित्रयं तेन मनोहरतरं रम्यतरं तत्र तत्सारमुत्कृष्टं चेति समासः । रोहत्युत्तिष्ठतीति रोहि तानवं कृशत्वं यस्य तद्रोहितानवं यन्मध्यमुदरं तत्रानमन्तौ कठिनत्वादलभ्यमानावाहिताववस्थितौ स्तनौ यस्यास्तस्या आमन्त्रणं हे रोहितानवमध्यानमदाहितस्तनि । एष एकस्य वाक्यस्यार्थः ॥ अपरस्य तु यथा—कश्चित्खड्गप्रहरणो धानुष्कं स्पर्धिनमुद्दिश्य वयस्यानाह—यतोऽहमेवंशिष्टस्तेन हेतुना मदसावस्मत्खड्गे न वरो न श्रेष्ठ योऽसौ शरीरमदः । शरा विद्यन्ते येषा ते शरिणो धानुष्कास्तानीरयति क्षिपत्यभिभवतीति शरीरस्तस्य मदः । जितधनुर्धरोऽहमिति कृत्वा यो दर्प इत्यर्थः । यतः कीदृशोऽहम् । सुरतरुतलेषु देववृक्षाधोभागेष्वलसा मन्दा ये गलन्नया भ्रश्यन्नीतयः । विषयासक्ता इत्यर्थः । तेषां नोदनं पातनं तत्र या कला विज्ञानं तया लसच्छोभमाना कौ पृथिव्यां चारो वल्गनं यस्य स तथाविधोऽहम् । खड्गविद्यया स्वर्गस्थानपि पातयामीत्यर्थः । तथा समरं रणमासमन्तात्त्रयन्त्यभिभवन्तीति समराजिनो ये शूरास्तेषामन्ते विनाशे रुचिरभिलाषो यस्य स एवंविधोऽस्मि भवामीति । अधुना वयस्यानामन्त्रयते—अमराजिरेषु देवाङ्गनेष्वजितमपराभूतं यद्बलिवर्ल बलिदानवसैन्यं तस्य यमनं बन्धनं तत्रोद्गमकश्चिन्ता तत्र रसो विष्णुस्तस्यैव रसस्तात्पर्यमारम्भश्चानुष्ठानं येषां ते तथाभूता भवन्त आमन्त्र्यन्ते । कीदृशे मदसी । यथा वृक्षविशेषास्तेषु लयो दुर्गधिया संश्रयस्तेन तिरोहितमन्तरितमनघं बहुदिवसभवं यन्मद्ध्यानं मदीयचिन्तनम् । दुर्गस्था वयमतः स किं करिष्यतीति कृत्वा । तैन मच्चिन्तानतर्णनेन मदो येषा ते च तेऽहिताश्च शत्रवश्च तेषु स्तनितं तद्दारणाच्छणच्छणायमाने । खड्ग इत्यर्थः । अथवा धवा पुरुषास्तेषां लयः स्वर्णकारकर्मकौशलम् । अनवम उत्कृष्टो ध्यानमदो नीतिशास्त्रचिन्तादर्पो येषां तेऽनवमध्यानमदा मन्त्रिप्राया उच्यन्ते । धवलयेन कर्मकौशलेन तिरोहिता न्यक्कृता अनवमध्यानमदा यैस्ते तथा ते च तेऽहिताश्च शत्रवस्तेषु स्तनिते शब्दिते । अन्योऽप्यत्र यदि भङ्गः संभवति सोऽपि बुद्धिदा विचार्य कर्तव्य एव ॥

मुरेनि। नवरोमेति। कोई चाटुकार प्रेयसी से कह रहा है—हे अविषम पंक्ति वाले दाँतों के कारण सुन्दर मुस्कान वाली! तुम्हारी यह कान्ति इस शरीर को आलोकित कर रही है। कैसे शरीर को—संभोग के स्वरों में जिसका *कण्ठ लालायित है—जो प्रिय के सामीप्य के कारण आनन्दाश्रु के प्रवाह से* सुशोभित स्तनों वाला है—जो स्तनों के भार से झुक रहा है—तथा जो नूतन रोमराजि के कारण शोभित त्रिवलियों के कारण अत्यन्त उत्कृष्ट है। हे शनैः शनैः कृश होती कमर पर झुकते हुये स्तनों वाली! यह एक वाक्य का अर्थ है। दूसरे वाक्य कभी जैसे—कोई तलवार से प्रहार करने वाला स्वयं करने वाले धनुर्धरों को उद्देश्य करके (अपने) मित्रों से कह रहा है—चूँकि मैं तलवार धारण कर रहा हूँ अतएव मेरा शरीर-मद इस तलवार में उचित नहीं है।

(कैसा मद) बाण धारण करने वाले शरीरों को तितर-बितर करने वाला शरीरी होने का मद। (अर्थात् धनुर्धारियों पर विजयी होने का मद) फिर मैं कैसा हूँ—कल्प वृक्ष के नीचे भ्रष्ट नाति वाले मन्द विषयासक्तों को दूर करने—विषयासक्ति से पराङ्मुख करने की कला में निपुण होने के कारण पृथ्वी पर सुन्दर या-। करने वाला (आक्रमण करने वाला)। तलवार की दिया से स्वर्ग स्वामियों को भी मैं नीचे गिरा देता हूँ—यह अर्थ है। फिर कैसा मैं हूँ—युद्ध को चारों ओर से जो भली भाँति जीत लेते हैं ऐसे वीरों को भी नष्ट कर देने की इच्छा वाला। अब मित्रों को सम्बोधित कर रहा है—अपराङ्गण में अपराजित बलि राक्षस की सेना को बाँधने की चिन्ता में पगे हुये विष्णु के से अनुष्ठान *वाले आप लोग सम्बोधित किये जा रहे हैं—कैसे मेरी तलवार में? घर में दुर्ग* के भ्रम से तिरोहित हो जाने के मेरी चिन्ता होने के कारण—हम लोग दुर्ग में हैं अतएव वह क्या करेगा—यह समझ कर—अतएव मुझ से होने वाली चिन्ता के तिरोहित हो जाने के कारण घमण्ड में पडे हुये शत्रुओं को विदीर्ण करने के कारण छण छण करती हुयी (मेरी) तलवार में।

अथवा घर-पुरुष उनका अपने पराक्रम से कर्म-कौशल। नीतिशास्त्र में सुविवेक करने वाले मन्त्रिगण यहाँ संबोधित किये जा रहे हैं। कर्म-कौशल से उत्कृष्ट नीति शास्त्र की चिन्ता का अहंकार जिनका तिरस्कृत हो गया है ऐसे शत्रुओं के शब्द करने पर। यदि यहाँ किसी और प्रकार पद-विच्छेद सम्भव हो तो उसके जानने वाले को विचार करके कर लेना चाहिए॥

अथ लिङ्गश्लेषः—

स्त्रीपुंनपुंसकानां शब्दानां भवति यत्र सारूप्यम्।
लघुदीर्घत्वसमासैर्लिङ्गश्लेषः स विज्ञेयः॥ ८॥

अब लिङ्ग श्लेष (का स्वरूप बताते हैं)—स्त्रीलिङ्ग, पुलिङ्ग और नपुंसक लिङ्ग वाले शब्दों में (मात्रा के) ह्रस्व, दीर्घ होने अथवा समास होने के कारण जहाँ सारूप्य हो उसे लिङ्ग श्लेष जानना चाहिए ॥ ८ ॥

स्त्रीपुमिति। यत्र स्त्रीपुनपुंसकलिङ्गानां सारूप्यं भवत्यसौ लिङ्गश्लेषः । कैः कृत्वा। लघुदीर्घत्वसमासैरिति क्वचिद्दीर्घस्य लघुत्वेन। ह्रस्वत्वेनेत्यर्थः । क्वचिद्ध्रस्वस्य दीर्घत्वेन क्वचित्समासेन चेति ॥

स्त्रीपुमिति। जहां स्त्रीलिङ्ग पुल्लिङ्ग और नपुंसक लिङ्ग में सारूप्य होता है वह लिङ्ग श्लेष होता है। किन कारणों से?—लघु, दीर्घ और समास होने से—कहीं दीर्घ (मात्रा) के लघु होने से—अर्थात् ह्रस्व होने से कहीं ह्रस्व (मात्रा) के दीर्घ होने से और कहीं समास होने से कारण।

उदाहरणम्—

देवी मही कुमारी पद्मानां भावनी रसाहारी।
सुखनी राज तिरोऽहितमहिमानं यस्य सद्धारी ॥ ९ ॥

(१) उदाहरण (देते हैं)—(कोई राजा से कहता है हे राजन्) क्रीडारत, महान् उत्सवों वाले, चोर आदि की हिंसा करने वाले, (पृथ्वी और कामदेव से युक्त) (सेवकों को) लक्ष्मी प्रदान करने वाले, पृथ्वी को जीतने वाले, (मधुर आदि रसों से भोजन करने वाले) (सेवकों को) सुखी करने वाले, शिष्टों को धारण करने वाले (तुम) शोभित होओ तथा वृत्र (आदि) के समान अहङ्कार वाले शत्रु जिससे तिरोहित हो जाय, नष्ट करो ॥ ९ ॥

(२) समस्त विद्यमान वस्तु को धारण करने वाली, अनन्त की महिमा को आरोपित करने वाली, शोभनकरा, रसाञ्जलि आदि से युक्त, कमलों को उत्पन्न करने वाली, नित्य तरुणी, देवी पृथ्वी शोभित होती है ॥ ९ ॥

देवीति। कश्चिद्राजानमाशास्ते—त्वं राज शोभस्व। तथा तिरश्चीनं यथा भवत्येवमहितं शत्रुं तस्य क्षयं नय। 'तसु उपक्षये' इत्यस्य रूपम्। कीदृशस्त्वम्। दीव्यतीति देवो क्रीडारतः, महो उत्सववान्, कुत्सितांश्चौरादीन्मारयतीति कुमारी। अथवा कु पृथ्वी मारः कामस्तौ विद्येते यस्य स कुमारी। तथा पद्मानां श्रिया भावं सत्तां नयति भृत्येष्विति भावनी। सेवकानां लक्ष्मीप्रद इत्यर्थः। रसा भुवमाहरत्यात्मसात्करोतीति रसाहारी यदि वा रसैर्मधुरादिभिराहरतीति रसाहारी। सुखं नयति भृत्यानिति सुखानीः, सतः शिष्टान्धारयति पोषयतीति सद्धारी, शोभनहारवान्वा। कीदृशम्। अहितमहिमानमहेर्वृत्रस्येव मानोऽहङ्कारो यस्य तं तथाविधम्। अयमेकस्य वाक्यस्यार्थः ॥ अपरस्य तु—मही पृथ्वी राजति

शोभते। देवीति पूजापदम्। कीदृशी मही। कुमार्यकृतविवाहा नित्यतरुणी वा। पद्मानां नलिनानां भावन्युत्पादिका। रसाञ्जलादीनाहरति गृह्णातीति। 'कर्मण्यणन्तादी।' सुखनि' शोभनाकरा। तथानन्तस्य शेषस्य रोहित आरोपितो महिमा माहात्म्यं यया। स्वयमात्मधारणे शक्तयाप्यनन्तस्य लोके माहात्म्यख्यापनात्मभरस्तयार्पित इत्यर्थः। सद्विद्यमानं वस्तुजातं धरतीति। 'कर्मण्यणन्तादी।' देवीत्यादौ दीर्घत्वे रसाहारीत्यादौ दीर्घत्वे समासे च सारूप दीर्घस्य। ह्रस्वत्वं त्वन्यत्र स्वधिया द्रष्टव्यम्॥

देवीति। कोई राजा को आशीर्वाद दे रहा है—तुम शोभित होओ। तथा शत्रुओं का इस प्रकार अन्त करो कि उनका पता ही न लगे। (कारिका में तम्य) 'तमु उपक्षये' धातु का रूप है। कैसे तुम?—देवी अर्थात् खेल में व्यस्त, बड़े-बड़े उत्सवों को करने वाले तथा चौर आदि की हत्या करने वाले अथवा कुमारी अर्थात् पृथ्वी और कामदेव से युक्त। तथा भृत्यों (सेवकों) को लक्ष्मी प्रदान करने वाले (तथा) रसा (पृथ्वी) का आहरण (विजय) करने वाले, रसाहारी अथवा (मधुर आदि) रसों से आहार करने वाले रसाहारी (तथा) सुखनी (अर्थात्) सेवकों को सुख देने वाले (तथा) सद्धारी—शिष्टों की संगति करने वाले अथवा सुन्दर हार वाले है।

कैसे (शत्रु) को? अहित अर्थात् अहि वृत्रासुर के समान अहंकार वाले। यह एक वाक्य का अर्थ हुआ। दूसरे का भी—मही (पृथ्वी) शोभित हो रही है। 'देवी' संमान सूचक पद है। कैसी पृथ्वी?—कुमारी अविवाहिता अथवा नित्य तरुणी—कमलों को उत्पन्न करने वाली, रसाञ्जलि आदि का आहरण करने वाली। सुखनि (अर्थात्) सुन्दर आकर वाली—(सुन्दर खानों वाली) तथा शेष को माहात्म्य देने वाली—अपने को धारण करने में समर्थ होने पर भी लोक में अनन्त के महत्त्व को प्रथित करने के लिये उसने अपना भार (शेष को) अर्पित कर दिया—यह तात्पर्य है) (तथा) सत् विद्यमान समस्त वस्तु को धारण करने वाली—कर्म उपपद रहते अण् (प्रत्यय) के योग में स्त्रीलिङ्ग में ई प्रत्यय प्रयुक्त हुआ। देवी आदि के दीर्घ होने और रसाहारी आदि के दीर्घ होने और समास में सारूप्य है। मात्रा के ह्रस्व होने का उदाहरण अपनी बुद्धि से अन्यत्र खोज लेना चाहिए॥

अथ भाषाश्लेषः—

यस्मिन्नुच्चार्यन्ते सुव्यक्तविविक्तभिन्नभाषाणि।
वाक्यानि यावदर्थं भाषाश्लेषः स विज्ञेयः॥ १०॥

आगे भाषा श्लेष (का उदाहरण देते हैं)—(एक ही प्रयत्न से उच्चार्यमाण) जिस वाक्य में भली भाँति व्यक्त स्पष्ट भिन्न भाषाओं वाले

वाक्य कवि के विवक्षित सभी अर्थों में घटते हैं उसे भाषाश्लेष जानना चाहिए ॥ १० ॥

यस्मिन्निति। यत्र यावदर्थं कवेर्यावन्तोऽर्था विवक्षितास्तावन्ति वाक्यान्युच्चार्यन्ते स भाषाश्लेष इति। कीदृशानि। सुव्यक्तं स्फुटं यथा भवत्येव विविक्ता. पृथगुपलभ्यमानविवेका भिन्ना द्वित्राद्या भाषा येषु तानि तथाविधानि ॥

यस्मिन्निति। जहाँ कवि को जितने अर्थ अभीष्ट होते हैं उतने वाक्य उच्चारण किये जाते है उसे भाषा श्लेष जानना चाहिए। कैसे वाक्य? जिनमें पृथक् पृथक् दो-तीन भाषायें सुस्पष्ट होती हैं ॥

तत्र संस्कृतप्राकृतश्लेषोदाहरणम्—

सरसबलं म हि सूरोऽसङ्गामे माणवं धुरसहावम्।
मित्तमसीसरदवरं समरणमुद्दर इमं दवलम् ॥ ११ ॥

[शरशबल सति सूरोऽसंग्रामे मानरम्धुरस्वभावम्।
मित्रमसीश्वरदवर सशरणमुद्धरति मन्दबलम् ॥]

उनमें सस्कृत प्राकृत श्लेष का उदाहरण (देते हैं)—(१)योगियों के हर्ष को लाने वाले, कृपणो में करुणापर उस सूर्य ने इस उपताप युक्त उस अश्रेष्ठ कुत्सित मनुष्य को, न स्पर्श करने योग्य रोग के होने के कारण, जिसे वैद्यों ने पहले त्याग दिया था तथा जिसकी शक्ति बड़ी क्षीण(सरस) थी चलने-फिरने योग्य बना दिया।

(२) वह वीर रण मे बाणों से चितकबरे, मान के कारण रमणीक स्वभाव वाले, तलवार से युद्ध करने वालों को ताप देने वाले, शरणागत के रक्षक मित्र की रक्षा करता है (क्यों कि) क्षीण शक्ति वाला (वह) लड़ने मे असमर्थ सेना वाला है ॥ ११ ॥

सरसवलमिति। कश्चित्कंचिदाह—स सूरो रविरिमं तं माणवं रोगित्वात्कुत्सितमनुष्यमसीसरत्सारयामास। गतियुक्तं चकारेत्यर्थ। कीदृशम्। सरसं गलिलाभात्प्रत्यग्र बलं शक्तिर्यस्य तं तथाभूतम्। हि स्फुटम्। क सति पूर्वमसीसरदसङ्गामे न विद्यते सङ्गो यत्रासावसङ्ग- स चासाचामश्च तस्मिन्। असपर्कयोग्ये रोगे सतीत्यर्थः। पुन कीदृश माणवम्। धुरसहाव धुरि प्रथममसहासमर्था अवा रक्षितारो वैद्या यस्य। पूर्वं वैद्यत्यक्तमित्यर्थः। सूरः कीदृश। मित्तमेद्यति स्निह्यति। कृपणेषु दयापर इत्यर्थः। कीदृशम्। तमवरं सरोगत्वादश्रेष्ठम्। तथा दवं लातीति दवलमुपतापयुक्तम् कीदृशः। ससरणमुद्दरः सह सरणेन ज्ञानेन वर्तन्ते ये ते ससरणा योगिनस्तेषां मुदं हर्षं धारयति पुष्णातीति कृत्वेति संस्कृतवाक्यार्थः।

प्राकृतस्य तु—काचिद्भर्तारमुद्दिश्य सखीमाह—हे सखि, स शूरोऽस्मद्भर्ता मित्रं सुहृदं सङ्ग्रामे रण उद्धरति रक्षति। कीदृशम्। शरैर्बाणैः शबलं कर्बुरम्। तथा मानेन गर्वेण बन्धुरो रम्यः स्वभावो यस्य तं तथाभूतम्। तथासीश्वराणां खड्गयोधिनां दवरमुपतापदम्। तथा सह शरणेन वर्तते यस्त सशरणं परित्राणार्थिनामार्तिहरम्। यद्येवंविधं तत्किमिति तेनोद्ध्रियत इत्याह—मन्दबलं मन्दमसमर्थं बलं यस्य तं तथाभूतम्। बहुयोधनादक्षमसैन्यमिति॥

सरसबलमिति। कोई किसी से कहता है—उस सूर्य ने रोगी होने के कारण हेय इस उस मनुष्य को चलने योग्य कर दिया अर्थात् गति से युक्त कर दिया। (कैसे मनुष्य को)? सरस—गति लाभ के कारण नूतन शक्ति से संपन्न। हि—स्पष्ट ही। क्या होने पर पहले चला दिया—असङ्गाम—जिसमें सम्पर्क न हो सके वह हुआ असङ्ग और रोग के होने पर अर्थात् असाध्य रोग के होने पर। फिर कैसे मनुष्य को?—धुरसहाय—जिसके रक्षक वैद्य पहले असमर्थ हो चुके हैं अर्थात् जो वैद्यों के द्वारा पहले से ही त्यक्त है। सूर (सूर्य) कैसा? मित्—स्नेह करने वाला अर्थात् कृपणों पर दया करने वाला। (फिर) कैसे (मनुष्य को)?—रोगी होने के कारण हेय तथा दबल—उपताप से युक्त। (पुनः) किस प्रकार का सूर्य—समरणमुद्दर-ज्ञानी योगियों को हर्ष (आनन्द) देने वाला। यह संस्कृत वाक्य का अर्थ है।

प्राकृत का भी—कोई पति को लक्ष्य करके सखी से कह रही है—हे सखि! यह हमारा पति युद्ध में मित्र की रक्षा करता है। कैसे (मित्र की)—बाणों से शबल (चितकबरे) तथा (आत्म) सम्मान के कारण सुन्दर स्वभाव वाले—तलवार से युद्ध करने वालों को कष्ट देने वाले—तथा शरण चाहने वालों की रक्षा करने वाले। यदि (वह मित्र) इस प्रकार का है तो उसके उद्धार करने की क्या आवश्यकता इसे कहते हैं—मन्दबल होने के कारण अर्थात् निरन्तर युद्ध के कारण सेना के असमर्थ होने से।

इदानीं संस्कृतमागध्युदाहरणम्—

कुलला लिलावलोले शलिलेशे शालशालिलवशूले।
कमलाशवलालिवलेऽमाले दिशमन्तकेऽविशमे॥ १२॥

[कुरालिरावरोलं सलिलं तत्सारसालिरवशूरम्।
कमलासवलालियरं मारयति शाम्यतो विषमम्॥]

अब संस्कृत और मागधी का उदाहरण देते हैं—(१) कुल का भरण-पोषण करने वालों के काटने में लम्पट, खड्ग-योधाओं को तुच्छ करने वाले,

घर बार में आसक्त लोगों की कटाई करने वाले, चाटे, लक्ष्मी के अपात्र में भी विलसित होने वाली सेना वाले, अनिवारणीय यम के समीप होने पर विष्णु की दिशा में प्रवेश किया ॥ १२ ॥

(२) कुररी पक्षियों की पंक्ति के कलरव से निनादित, सारसों के शब्द से वियोगियों के घातक होने के कारण। हिंसक कमलों के पराग को ढोने वाले, भ्रमरों की गुञ्जार से रमणीक शरत्कालीन जल मुनियों को भी क्षुब्ध कर देता है ॥१२॥

कुलेति। कश्चिज्जातसंसारभयो वक्ति—एवंविधेऽन्तके मृत्यौ सति ए विष्णौ विषये या दिङ्मार्गस्तां दिशमविशं प्रविष्टोऽस्मि। कीदृशेऽन्तके। कुलानि लालयन्ति पोषयन्ति तच्छीला. कुललालिनः सत्पुरुषास्तेषां लावे छेदे कर्तव्ये लोलो लम्पटो यस्तस्मिन्। तथा शलन्तीति शला' सोद्यमास्ते विद्यन्ते यत्र देशे स शली। यद्वा शलं खड्गकोपवन्योऽस्ति येषा शलिन' खड्गयोधास्तांल्लिनत्यल्पीकरोतीति शलीलेशस्तस्मिन्। तथा शालैर्गृहैः शालन्ते श्लाघन्त इत्येवंशीलाः शालशालिनस्तांल्लुनातीति शालशालिलव स चासौ शूलं च। पीडाकरत्वात्। तथा कमला लक्ष्मीस्तस्याः शवा दरिद्रास्तेष्वपि लवति विलसतीत्येवंशीलं बलं सैन्यं यस्य स तथा तस्मिन्। तथामाले। 'मल धारणे।' मलनं मालो न विद्यते मालो यस्यासावमालस्तस्मिन्। अनिवार्य इत्यर्थः। एष संस्कृतवाक्यार्थः॥ मागधस्य तु—शो शलिले तत्सलिलं जलं शमन्तके शाम्यत शमिनोऽपि मालेदि मारयति। कीदृशं तत्। कुररा' पक्षिविशेषास्तेषामालिः पङ्क्तिस्तदीये रावे. शब्दे रोल' कलकलो यत्र तत्तथाभूतम्। तथा सारसालिरवेण सारसश्रेणिवाशितेन क्रूरं तद्विरहिमारणसमर्थम्। तथा कमलानां पद्मानामासव मकरन्दाख्यं लान्ति ये ते च तेऽलिनश्च भ्रमरास्तैर्वर श्रेष्ठं यत्तत्। तथा विषमं वियोगिभीषणमेवंविधं शरदि सलिलं विलोक्य मुनयोऽपि क्षुभ्यन्ति। इति मागधवाक्यार्थः॥

कुलेति। कोई संसार से भयभीत होकर कह रहा है—मृत्यु की इस प्रकार की सत्ता होने पर विष्णु के विषय में जो मार्ग है उसमें मैं प्रवेश कर गया हूँ। कैसे यमराज के—कुल का भरण-पोषण करने वाले सत्पुरुषों की कटाई में लम्पट। तथा शली—उद्योगी लोगों से सम्पन्न देश अथवा तलवार से युद्ध करने वाले योद्धाओं को क्षुद्र बनाने वाले तथा घर गृहस्थी वाले लोगों की कटाई रूपी शूल—कष्ट देने के कारण तथा लक्ष्मी से शून्य लोगों में भी उत्पात मचाने वाली सेना वाले तथा अमाल (यम की सत्ता होने पर) 'मल' धातु धारण अर्थ में आती है। मलन-माल-जिसका माल न हो सके वह हुआ अमाल अर्थात्

अनिवार्य। यह संस्कृत वाक्य का अर्थ हुआ। मागध का भी—वह जल योगियों को भी मार डालता है—कैसा है वह—कुरर पक्षियों की पंक्ति के कलरव से युक्त—तथा सारस-पङ्क्तियों की ध्वनि से उन वियोगियों की हत्या करने में समर्थ—तथा कमलों के आसव (पराग) लाने वाले भ्रमरों से श्रेष्ठ—। इस प्रकार के जल को शरदृतु में देखकर मुनिजन भी क्षुब्ध हो जाते हैं। यह मागध वाक्य का अर्थ है।

इदानीं संस्कृतपिशाचभाषाश्लेषोदाहरणमाह—

कमनेकतमादानं सुरतनरजतु च्छलं तदासीनम्।
अप्पतिमानं खमते सोऽगनिकानं नरं जेतुम्॥ १३॥

[कामे कृतामोदाना सुवर्णरजतोच्छलद्दासीनाम्।
अप्रतिमानं क्षमते स गणिकाना न रञ्जयितुम्॥]

अब संस्कृत और पिशाच भाषा में श्लेष का उदाहरण देते हैं—

(१) हे शून्य—बुद्धि। कामी पुरुष नाना प्रकार से उत्पन्न किये जाने वाले उस कपट के आश्रित, वरुण की सी टेक वाले, मन्दर-गिरि की सी दीप्ति वाले किस व्यक्ति को जीतने के लिये वह जाय।

(२) काम के विषय में प्रसन्न करने वाली, सोने और चाँदी से विलसित दासियों वाली गणिकाओं का अपमान वह अपने को प्रसन्न रखने के लिये नहीं सह सकता है॥ १३॥

कमिति। कस्यचित्केनचित्पौरुषस्तुतिः कृता। ततोऽन्यस्तामसहमान आह—हे सुरतनः निधुवनपुरुष, ते तव पौरुषं न रणे इत्यामन्त्रणपदाभिप्रायः। तथा खमते शून्यबुद्धे, यस्त्वया वर्ण्यते स कं नरं जेतुमजतु गच्छतु। नास्त्येवासौ पुरुषो य सोऽभिभविष्यतीत्यर्थः। कीदृशं नरम्। अनेकतमान्यादानान्युत्पत्तिस्थानानि यस्य तं तथाभूतम्। तथा छलं तदासीनं तां मायामाश्रितम्। आश्रयणार्थः 'आसिः' सकर्मकः। तथापां पतेरप्पतेर्वरुणस्येव मानो गर्वो यस्य तम्। तथागस्येव मन्दरस्येव निकाना दीप्तिर्यस्य तम्। अथवा न गच्छतीत्यगो निकानो यस्येत्यन्यथास्य वाक्यस्यार्थः। अथवा यदा न सन्त्येवंविधास्तदा सर्वमेव तेन यतो जितमतः स कमिव नरं जेतुमजत्विति स्तुतिरेवात्रार्थः। इति संस्कृतवाक्यार्थः॥ पैशाचस्य तु—केनचिद्वेश्यानामुपकारः कृतः। ताभिस्तु तस्य न कृत इति सोऽत्र वर्ण्यते—स पूजितगणिकः पुरुषो गणिकानां वेश्यानामप्पतिमानमप्रतीपमपूजनं न क्षमते न सहते। किमर्थम्। रञ्जयितुमात्मरञ्जनाय। इदानीं मा ताः पूजयन्त्वित्येवमर्थम्। कीदृशीनां गणिकानाम्। कामविषये कृतामोदानां कृतहर्षाणाम्। तथा सुरन (स्वर्ण)

रजताभ्यामुच्छलन्त्यो विलसन्त्यो दास्यो यासाम्। पिशाचभाषायां कगचजतदपयवानां लोपो न क्रियत इत्यादिपूर्वोक्तं लक्षणम्॥

कृमिति। किसी ने किसी के पराक्रम की प्रशंसा की। तदनन्तर दूसरा उसे न सह सकता हुआ बोला—हे कामी पुरुष तुम्हारा पराक्रम लड़ाई में नहीं चलता (यह) 'ते' (इस) आमन्त्रण पद का अभिप्राय है। तथा हे शून्य—बुद्धि! जिसका तुम वर्णन कर रहे हो वह किसे जीतने जाय। ऐसा कोई पुरुष नहीं है जिसे वह पराजित करेगा। कैसे मनुष्य को?—अनेक उत्पत्ति वाले कपट को आश्रय करने वाला। आश्रयण अर्थ में 'असि' ।' सकर्मक है—तथा वरुण के समान मान वाले-तथा मन्दराचल के समान दीप्ति वाले—अथवा अक्षय दीप्ति वाले—इस प्रकार अन्यथा इस वाक्य का अर्थ होगा। अथवा जब उक्त गुणों से युक्त कोई है ही नहीं तो वह किसे जीतेगा—इस प्रकार स्तुति ही यहाँ वाच्य है। यह संस्कृत वाक्य का अर्थ है। पिशाच वाक्य का भी—किसी ने वेश्याओं का उपकार किया किन्तु उन्हों ने उसका प्रतिकार नहीं किया—उसका यहाँ वर्णन किया जा रहा है—वेश्याओं की पूजा करने वाला वह वेश्याओं का अपमान नहीं सह सकता है। क्यों—अपने को प्रसन्न रखने के लिये! इस समय मेरी वे पूजा करें—यह तात्पर्य है। कैसी वेश्याओं का—काम के विषय में आनन्द देने वाली—तथा सोने और चाँदी से विलसित होती हुई दासियों वाली (वेश्याओं का)। पिशाच भाषा में क, ग, च, ज, त, द, प, य, और व का लोप नहीं किया जाता है—यह लक्षण पहले ही बताया जा चुका है।

इदानीं संस्कृतसूरसेनीवाक्योदाहरणमाह—

तोदी सदिगगणमदोऽकलहं स मदा वलं विदन्तरिदम्।
आर दमेहावसरं सासदमारं गदासारम्॥ १४॥

[ततो दृश्यते गगनमदः कलहंसशतावष्टम्भितान्तरितम्।
आर तमेघातसरं शाश्वतमार गतासारम्॥]

अब संस्कृत और सूरसेनी वाक्य का उदाहरण देते है—

(१) (दूसरों को) पीड़ा देने वाला, सदैव अपनी सेना पर बिना गर्व किये,—व्यूह-रचनादि करने वाला बुद्धिमान् वह गदाओं से उत्कृष्ट, धनुर्धारियों से युक्त तथा पराजय को प्राप्त हुयी अतएव अब कलह से विरक्त हुयी इस शत्रु सेना मे प्रवेश कर गया।

(२) तदनन्तर सैकड़ों राजहंसों से आश्रित अतएव आच्छादित मेघपटल से शून्य, वर्षा से विरक्त कामदेव का स्थिर निकेत यह आकाश दिखाई पड़ता है॥१४॥

तोदीति। कश्चिन्नरो रणस्थो वर्ण्यते—स कश्चिच्छूरो विरपण्डित इदमारमरिसक्तं बलं सैन्यमन्तर्मध्य आर ससार। कीदृशोऽसौ। तुदति

परानिति तोदी। तथा देशन दिगुपदेशो व्यूहरचनादिविषयः सह दिशा वर्तत इति सदिक्। तथा न गणेन सहायवर्गेण मदो यस्यासावगणमदः स्वभुजबलसहायकापेक्ष इत्यर्थः। सदा सर्वकालमेव। कीदृशं बलम्। अकलहं परिभूतत्वान्निर्वैरम्। अत एव दमेहाया उपशमचेष्टाया अवसरः कालो यस्य तत्तथाभूतम्। तथास्यन्ते क्षिप्यन्त इत्यासा. शरास्तान्घ्नन्ति खण्डयन्तीत्यासदा घानुष्का. सह तैर्वर्तत इति सासदम्। तथा गदाभिः सारमुत्कृष्टम्। एष संस्कृतवाक्यार्थः॥ सूरसेन्यास्तु-शरदि नभो वर्ण्यते-तो इति तत. प्रावृषोऽनन्तरं दृश्यतेऽवलोक्यते। गगनं नभ.। अद एवत्। कीदृशम्। कलहंसशतैरवलम्बितं चान्तरितं च। तथा आरतो निवृत्तो मेघाना घनानामवसरः कालो यत्र। यदि वा आरता उपरता मेघानामाप एव शरा वाणा यत्र तत्तथाभूतम्। तथा शाश्वत. स्थिरो मारः कामो यत्र। तथा गत आसारो वेगवर्षो यतस्तत्तथाभूतम्॥

तोदीति। लडाई मे डरे हुये किसी मनुष्य का वर्णन किया जा रहा है—वह कोई वीर शत्रु-मण्डल की इस सेना मे प्रवेश कर गया। कैसा है वह (वीर) तोदी (शत्रुओं को पीडा पहुँचाने वाला) तथा सदिक् (व्यूह रचना आदि विषयों को जानने वाला)—तथा सहायक वर्ग की परवाह न करने वाला अपनी भुजाओं का ही भरोसा करने वाला। सदैव। कैसी सेना में (प्रवेश कर गया)? निर्वैर (पराजित हो जाने के कारण जो अब वैर नहीं कर सकती) दमन की जाने के समय को प्राप्त हुयी, तथा बाणों को खण्डित करने वाले धनुर्धारियों से युक्त तथा गदाओं से उत्कृष्ट (सेना में) [प्रवेश कर गया]। यह संस्कृत वाक्य का अर्थ हुआ। सूरसेनी। (वाक्य में) भी शरद में आकाश का वर्णन किया जा रहा है। वर्षा के अनन्तर यह आकाश दिखलाई पडता है—किस प्रकार सैकडों राजहंसों से आश्रित अतएव आच्छादित। तथा मेघों के विचरण से शून्य अथवा मेघों के जल रूपी बाणों से शून्य। तथा कामदेव की स्थिर सत्ता से युक्त। तथा धारा—सम्पात वर्षण से रहित।

अथ संस्कृतापभ्रंशयोः श्लेषोदाहरणमाह—

धीरागच्छदुमे हतमु-दुद्धरवारिसदःसु।
अभ्रमदप्रसराहरणु-रविकिरणा तेजःसु॥ १५॥

[धीरा गच्छतु मेघतमो दुर्धरवार्षिकदस्यु।
अभ्रमदप्रसरा हरणं रविकिरणास्ते यस्य॥]

आगे संस्कृत और अपभ्रंश के श्लेष का उदाहरण देते हैं—

(१) (संस्कृत) हे गौरि! धैर्य धारण करो! आकाश में उमडते हुये

जल-प्रवाह वाली (गङ्गा) रौंडा ही गयी, मेह के समान हर्ष के नष्ट हो जाने के कारण कृश हुयी, दिन में भी निकली हुयी पृथ्वी वाले जल रूप निवास भवन वाले, तेजों में (वाडवाग्नि में) गिर पडी।

(२) (अपभ्रंश वाक्यार्थ) हे धीरे हट जाओ। यह अवारणीय मेघ रूप चोरों वाला, मेघ कृत अन्धकार है जिस मेघाच्छन्न अन्धकार को निश्चित प्रतीति कराने वाली वे सूर्यकिरणे नष्ट करती हैं ॥ १५ ॥

धीरेति । अत्र काचिद्गौरीसखी गङ्गायाः सपत्न्यया व्यसनेन गौरीमानन्दयति—यथा हे उमे गौरि, धीरा स्वस्था भवेति क्रिया गम्यते । यतः, अभ्रे गगने माद्यत्युद्गतो भवति य स तथाविधोऽपां जलानां प्रसरो यस्या सा अभ्रमदप्रसरा गङ्गा अवेरिव गड्डरिकाया इव किरणं विक्षेपणं निर्वासनं यस्याः साविकिरणा । अहर्दिवसमपि । 'कालाध्वनोरत्यन्तसंयोगे—' इति कर्म । अत एव हतमुद्गतहर्षा । तत एव चाणुः कृशा सत्यगच्छदपतत् । क तेजःसु । कीदृशेषु । उद्धृता धरा पृथ्वी प्रलयापब्धिमग्ना सती यस्मात्तदुद्धरं तच तद्वारि च समुद्रजलं च तदेव सदो गृहं येषां तानि तथाविधानि तेषु । वडवानलतेजःस्वित्यर्थः । हरनिर्वासनदुःखिता सती गङ्गात्मानं वडवानलेन्धनीचकारेति भावार्थः । एष संस्कृतवाक्यार्थः ॥ अथवा काचित्सखी गौर्याः पुरतो हरसमरं वर्णयति—हे उमे, धीर्बुद्धिरागच्छदागता । कथमहतमुदनष्टहर्षं यथा भवति तथोद्धृता निवृत्ता हरवारिणो हरनिषेधका शत्रवो यत्र कर्मणि तदुद्धरवारि यथा भवति यथास्माकं बुद्धिस्तुष्टिश्चाभूत्तथा हरेणारयो जिता इत्यर्थः । सा च धीः सदःसु सभासु तेजःसु च परतेजोविषयेऽभ्रमदप्रसृता । तेजस्तरारेत्यर्थः । कीदृशी धीः । सर्वगत्वादपामिव प्रसरो गतिर्यस्याः साप्प्रसरा । अहर्दिवसम् । सदेत्यर्थः । अणुः कुशाग्रीया । तथाविकिरणा निरसितुमशक्या । इति संस्कृतवाक्यार्थः ॥

धीरेति । यहाँ कोर गौरी की सखी (उनकी) सवत गङ्गा के व्यसन से गौरी को प्रसन्न कर रही है । जैसे हे गोरि ! स्वस्थ हो जाओ यह क्रिया गम्य है । क्यों कि आकाश में मद करता है—उद्गत होता है जल का प्रवाह जिसका वह हुयी अभ्रमदप्रसरा (गङ्गा) तथा गडरिये के भेडों की भाँति जिनका निष्कासन हो जाता है वह हुयी अविकिरणा । 'अहः' दिन में भी । 'कालाध्वनो' आदि से 'अहः' में कर्म विभक्ति हुयी । इसलिये (उन गङ्गा का) हर्ष नष्ट हो गया । इसी (शोक) के कारण दुबली होकर गिर पडी—कहाँ तेजों में । किस प्रकार के तेजों में—प्रलय काल में निमग्न हुयी पृथ्वी के कारण उच्छलित हुये सागर के जलरूपी घरो वाले तेजों में अर्थात् वाडवाग्नि मे । शंकर के

द्वारा निर्वासित होने से दुःखी गङ्गा ने अपने को वाडवाग्नि का इन्धन बना लिया यह भाव है ॥ यह संस्कृत वाक्य का अर्थ है। अथवा कोई सखी गौरी के समक्ष शिव जी के युद्ध का वर्णन करती है। हे उमे—धी (बुद्धि) आ गयी। कैसे! शिव के शत्रुओं का भेदन हो जाने के कारण हर्ष से युक्त—अर्थात् हमारी बुद्धि और प्रसन्नता के लिये शिव जी ने शत्रुओं को जीत लिया। वह बुद्धि सभाओं में और तेजो पर—दूसरों के तेजों में फैल गयी। अर्थात् तेज दीप्यमान हो उठा। बुद्धि कैसे—सब में पायी जाने के कारण जल की सी गति वाली दिन मे अर्थात् सदैव—अणु (कुशाग्र) तथा अनिकिरणा—अर्थात् दूर करने में अशक्य। यह संस्कृत वाक्य का अर्थ है।

अपभ्रंशस्य तु—वर्षावर्णनम्—हे धीरा', गच्छत्वपसरतु। किम्। तन्मेघकृतं तमो मेघतम'। कीदृशम्। दुर्धरा दुर्वारा वार्षिका वर्षासु भवा दस्यवश्चौरा यत्र। यदि वा वार्षिका मेघा एव दस्यवश्चौरास्तेजसो हरणाद्यत्र। तथा यस्य मेघतमसस्ते रविकिरणा. सूर्यकरा हरणं हर्तारः। कीदृशाः। अभ्रमदप्रसरा भ्रमो भ्रान्तिर्न भ्रमो निश्चयस्तं ददातीत्यभ्रमदः प्रसरो येषां ते तथाविधाः यथावस्थितं वस्तुस्वरूपं ये प्रकाशयन्तीत्यर्थः॥

अपभ्रंश का भी वर्षा वर्णन—हे धीरो हट जाओ। क्यों? यह मेघ कृत अन्धकार है—कैसा अन्धकार? अनिवारणीय वर्षाकालीन चोरोंवाला अथवा प्रकाश को नष्ट करने के कारण वर्षाकालीन मेघरूपी चोरोंवाला। तथा—जिस मेघकृत अन्धकार को दूर करनेवाली सूर्य की किरणें हैं—कैसी किरणें—अभ्रमदप्रसरा—निश्चय प्रतीत करने वाली एवं यथावस्थित वस्तुका स्वरूप दिखलाने वाली॥

अथ भाषाश्लेषस्य प्रकारान्तरमाह—

वाक्ये यत्रैकस्मिन्ननेकभाषानिबन्धनं क्रियते।
अयमपरो विद्वद्भिर्भाषाश्लेषोऽत्र विज्ञेयः॥ १६॥

आगे भाषा श्लेष का अन्य भेद बताते हैं—जहाँ एक ही वाक्य में अनेक भाषाओं का बन्धन किया जाता है विद्वानों को भाषा श्लेष यह प्रकार भी अभीष्ट है॥ १६॥

वाक्य इति। यत्रैकस्मिन्नेव वाक्येऽनेकभाषा निबध्यन्ते सोऽयमपरः पूर्वस्मादन्यो भाषाश्लेषोऽत्र ज्ञातव्यः। पूर्वत्रानेकार्थोऽनेकाभिर्भाषाभिरुक्त', इह त्वेक एवार्थो बह्वीभिर्भाषाभिरुच्यत इति तात्पर्यार्थ.॥

वाक्य इति। जहाँ एक ही वाक्य में अनेक भाषायें बाँधी जाती है—वह पूर्व वर्णित श्लेष प्रकार से भिन्न प्रकार का श्लेष होता है। पूर्व भेद अनेक

अर्थ अनेक भाषाओं में बताये जाते थे—यहाँ एक ही अर्थ अनेक भाषाओं में वाच्य होगा—यह तात्पर्य है ॥

उदाहरणम्—

समरे भीमारम्भं विमलासु कलासु सुन्दरं सरसम् ।
सारं सभासु सूरिं तमहं सुरगुरुसमं वन्दे १७ ॥

उदाहरण—

रण में भीषण उद्योग करनेवाले, निर्मल कथाओं में सुन्दर, शृङ्गारादिसे युक्त, सभाओं में उत्कृष्ट, बृहस्पति-तुल्य उस विद्वान को मैं नमस्कार करता हूँ ॥ १७ ॥

समर इति । तमहं सूरिं वन्दे स्तौमि । कीदृशम् । समरे रणे भीमारम्भं भीषणोद्योगम् । विमलासु कलासु सुन्दरं निर्मलकलाविषये शोभनम् । सरसं शृङ्गारादिरसोपेतम् । तथा सभासु सदःसु सारमुत्कृष्टम् । अत एव सुरगुरुसमं बृहस्पतितुल्यम् । अयमेकत्रार्थे संस्कृतप्राकृतश्लेषः ; समसंस्कृतप्राकृतशब्दरचितत्वात् । एवमुत्तरत्रापि समसंस्कृतमागधशब्दरचितत्वादित्यादि द्रष्टव्यम् ॥

समर इति । मैं ऐसे विद्वान् को नमस्कार करता हूँ—कैसे युद्ध में भीषण पराक्रम वाले, पवित्र कलाओं में प्रबुद्ध, शृङ्गारादिरसों से युक्त सरस, सभाओं में उत्कृष्ट अतएव देवों के गुरु बृहस्पति के तुल्य । यहाँ एक ही अर्थ में संस्कृत और प्राकृत भाषायें श्लिष्ट हैं—समान संस्कृत और प्राकृत शब्दों के द्वारा रची गयी होने के कारण । इसी प्रकार आगे भी समान संस्कृत और मागध आदि भाषाओं के शब्दों द्वारा रचा गया (श्लेष) समझना चाहिए ॥

समसंस्कृतमागधशब्दोदाहरणमाह—

शूलं शलन्तु शं वा विशन्तु शबला वशं विशङ्का वा ।
अशमदशं दुःशीला दिशन्ति काले खला अशिवम् ॥ १८ ॥

समान संस्कृत और मागध शब्दों का उदाहरण देते हैं—दुराचारी खल अनुपशमनीय अवस्था वाले, अवसर पड़ने पर अमङ्गल का कारण बनते हैं अतएव वे दुष्ट हैं । (वे दुष्ट) शूली पर चढ़ें, सुख को प्राप्त हों, पराधीन हो और चाहे स्वच्छन्द रहें ॥ १८ ॥

शूलमिति । दुःशीला दुष्टचारित्रा खला शठवोऽशिवं पीडादिकं दिशन्ति ददति यतोऽतस्ते शबला पातकिनः शूलं वा शलन्त्वधिरोहन्तु । शं वा सुखं वा विशन्त्वधिगच्छन्तु । वशं पराधीनतां वा यान्तु । विशङ्काः स्वच्छन्दा वा भवन्तु तच्चिन्तामपि न कुर्मः । कीदृशमशिवम् ।

अविद्यमानः शम उपशमो यस्यां सा तथाविधा दशावस्था यत्र तदशमदशम् ॥

शूलमिति। दुराचारी दुष्ट पीड़ा ही देते हैं अतः वे पापी चाहे शूली पर चढ़ें, चाहे सुखी हों, पराधीन हों या स्वच्छन्द हो उसकी चिन्ता भी नहीं करता हूँ। कैसी पीड़ा (देते हैं)—अनिवारणीय अवस्था वाली (पीड़ा)।

संस्कृतपैशाचिकयोः श्लेषोदाहरणमाह—

चम्पककलिकाकोमलकान्तिकपोलाथ दीपिकानङ्गी।
इच्छति गजपतिगमना चपलायतलोचना लपितुम् ॥ १९ ॥

संस्कृत और पैशाची में श्लेष का उदाहरण देते हैं—चम्पक की कली के समान कोमलकान्त कपोल-स्थल वाली काम की दीपिका, गजराज के समान चाल वाली, चञ्चलनेत्री बोलना चाहती है ॥ १९ ॥

चम्पकेति। काचिन्नायिका गजेन्द्रसमगमना चञ्चलदीर्घलोचना च। तथा चम्पककलिकावत्कोमलकान्ती रम्यरुची कपोलौ यस्या सा तथाविधा। तथानङ्गस्येयमानङ्गी दीपिका। तया कामस्य प्रकाशितत्वात्। सा लपितुं वक्तुमिच्छति॥

चम्पकेति। गजराज की सी गति वाली और चञ्चल नेत्रों वाली कोई नायिका है। उसकी कपोल स्थली चम्पा की कली के समान कोमल एव कमनीय है। (वह) काम की दीपिका सी है। उसी के द्वारा काम मानो प्रकाशित हुआ हो। वह बोलना चाहती है॥

अथ संस्कृतसूरसेनीश्लेपमाह—

अधरदलं ते तरुणा मदिरामदमधुरवाणि सामोदम्।
साधु पिबन्तु सुपीवर-परिणाहिपयोधरारम्भे ॥ २० ॥

आगे संस्कृत और सूरसेनी में श्लेष का उदाहरण देते हैं—हे सुन्दर, मानन्, विस्तृत कुचयुग्म के आभोगवाली! मदिरामद के कारण मधुर रचनावाले सुगन्धित तुम्हारे अधर दल का युवक भली-भाँति पान करें॥ २०॥

अधरेति। मदिरामदेन मधुरा वाणी यस्या सा संबोध्य भण्यते। ते तवाधरदलमोष्ठपल्लवं तरुणा युवानः साधु यथा भवत्येवं पिबन्तु चुम्बन्तु। कीदृशम्। सामोदं सुगन्धि। किंविशिष्टे। सुष्ठु पीवरो मांसलः परिणाही परिमण्डलः पयोधरारम्भः कुचाभोगो यस्या. सैवमामन्त्यते॥

अधरेति। मदिरा के मद के कारण मधुर वाणी वाली को सम्बोधन कर के कहा जा रहा है—युवक तुम्हारे अधर दल का आस्वाद पान करें। कैसे (अधर-

दल का)—सुगन्धित। किन विशेषणों से युक्त ! अत्यन्त विस्तृत और मांसल स्तनाभोग वाली (नायिका की ओर) लक्ष्य किया जा रहा है ॥

संस्कृतापभ्रंशश्लेषमाह—

क्रीडन्ति प्रसरन्ति मधु-कमलप्रणयि लिहन्ति ।
भ्रमरा मित्र सुविभ्रमा मत्ता भूरि रसन्ति ॥ २१ ॥

संस्कृत और अपभ्रंश में श्लेष बताते हैं—हे मित्र ! सुविचरण करने वाले भ्रमर मतवाले होकर खेल रहे हैं, इधर उधर घूम रहे हैं, कमल सपृक्त मधु का पान कर रहे हैं और इस प्रकार अत्यन्त गुञ्जार कर रहे हैं ॥ २१ ॥

क्रीडन्तीति। कश्चित्कंचिदाह—हे मित्र, भ्रमरा मत्ताः सन्तः क्रीडन्ति विचरन्ति। प्रसरन्तीतस्ततो गच्छन्ति। तथा मधु मकरन्दं कमलप्रणयि पद्मसम्बद्धं लिहन्त्यास्वादयन्ति। कीदृशाः। सुष्ठु विभ्रमो चेष्टा ते तथाविधाः। तथा भूरि प्रभूतं रसन्ति शब्दायन्ते। अन्योऽपि मत्त एवंविधो भवति॥

क्रीडन्तीति। कोई किसी से कह रहा है—हे मित्र ! भ्रमर मत्त होकर क्रीडा कर रहे हैं—इधर-उधर घूम रहे हैं—कमल में लिपटे हुये पराग का पान कर रहे हैं। (भ्रमरों का वर्णन करते हैं)—(ये भ्रमर) सुन्दर भ्रमण वाले तथा अत्यधिक गुञ्जार करने वाले हैं। दूसरा भी मत्त होकर इसी प्रकार हो जाता है॥

भाषाश्लेषमुपसंहरन्नाह—

एवं सर्वासामपि कुर्वीत कविः परस्परं श्लेषम् ।
अनयैव दिशा भाषास्त्र्यादी रचयेद्यथाशक्ति ॥ २२ ॥

[१६ वीं कारिका से २१ वीं कारिका तक बताया गया श्लेष-प्रकार आलङ्कारिकों के द्वारा भाषा सम नाम से जाना गया है।]

आगे भाषा श्लेष का उपसंहार करते हुए कहते हैं—इसी प्रकार कवि सभी भाषाओं का परस्पर श्लेष करे। इसी मार्ग से तीन आदि भाषाओं में भी (वह) यथाशक्ति रचना करे॥ २२ ॥

एवमिति। तथा संस्कृतभाषाया अन्याभिर्भाषाभिः सह श्लेष कृत एवमन्यासामपि परस्परं कर्तव्योऽसौ। तद्यथा—प्राकृतभाषाया मागधिकापैशाचीसूरसेन्यपभ्रंशैः सह, मागधिकायाः पैशाच्या. सूरसेन्यपभ्रंशैः पैशाच्या. सूरसेन्यपभ्रंशाभ्याम्, सूरसेन्या अपभ्रंशेन। एते दश भेदाः आद्यैः द्वियोगे सर्व एव पञ्चदश भेदा भवन्ति। तथानयैव दिशानेनैव

न्यायेन त्र्यादीसि सम्भवतस्त्रः पञ्च षड्वा युगपच्छिलष्टा भाषा यथासामर्थ्य-मेकवाक्यतया भिन्नवाक्यतया वा रचयेत्। तत्र त्रियोगे विंशतिर्भेदाः। यथा—सं० प्रा० मा० १, सं० प्रा० पै० २, सं० प्रा० सू० ३, सं० प्रा० अ० ४, प्रा० मा० पै० ५, प्रा० मा० सू० ६, प्रा० मा० अ० ७, मा० पै० सू०, ८, मा० पै० अ० ९, पै० सू० अ० १०, सं० मा० पै० ११, सं० मा० सू० १२, सं० मा० अ० १३, प्रा० पै० सू० १४: प्रा० पै० अ० १५, प्रा० सू० अ० १६, सं० पै० सू० १७, सं० पै० अ० १८, प्रा० सू० अ० १९, सं० सू० अ० २०। चतुर्योगे तु पञ्चदश। तद्यथा—सं० प्रा० मा० पै० १, सं० प्रा० मा० सू० २, सं० प्रा० मा० अ० ३, प्रा० मा० पै० सू० ४, प्रा० मा० पै० अ० ५, मा० पै० सू० अ० ६, सं० मा० पै० सू० ७, सं० मा० पै० अ० ८, सं० पै० सू० अ० ९, प्रा० पै० सू० अ० १०, सं० प्रा० सू० अ० ११, सं० मा० सू० अ० १२, सं० प्रा० पै० सू० १३, सं० प्रा० पै० अ० १४, प्रा० मा० सू० अ० १५। पञ्चयोगे षट्। तद्यथा—सं० प्रा० मा० पै० सू० १, सं प्रा मा पै० अ० २, सं० मा० पै० सू० अ० ३, सं० प्रा० पै० सू० अ० ४, सं० प्रा० मा० सू० अ० ५, प्रा० मा० पै० सू० अ० ६। षड्योगे त्वेक एव भेदः॥

एवमिति। जिस प्रकार संस्कृत भाषा का अन्य (सूरसेनी आदि) भाषाओं के साथ श्लेष किया गया। इसी प्रकार अन्य (प्राकृत आदि) भाषाओं का भी परस्पर श्लेष करना चाहिए—उदाहरणार्थ—प्राकृत भाषा का मागधी, पैशाची, सूरसेनी और अपभ्रंश के साथ, मागधी का पैशाची, सूरसेनी और अपभ्रंश के साथ, पैशाची का सूरसेनी और अपभ्रंश के साथ और सूरसेनी का अपभ्रंश के साथ। ये (अभी बताये गये) दश भेद पहले के (पाँच) भेदों के साथ दो भाषाओं में श्लेष होने पर सब पन्द्रह भेद होते हैं। आगे इसी विधि से और इसी न्याय से तीन आदि—तीन, चार, पाँच अथवा छ भाषाओं को श्लिष्ट करके अपनी सामर्थ्य के अनुरूप एक ही वाक्य के रूप में भिन्न वाक्यों के रूप में रचना करे। उनमें तीन भाषाओं का योग होने पर २० भेद होता है ·· ····· ·····चार (भाषाओं का योग होने पर १५ भेद होता है जैसे ··· ···· ·······। पाँच के योग में छै जैसे······ ···। छै के योग में तो एक ही भेद होता है।

तत्र षड्योगादिकप्रदर्शनार्थमेकार्थश्लेषमेकमुदाहरणमाह—

अकलङ्ककुल कलालय बहुलीलालोल विमलबाहुबल।
खलमौलिकील कोमल मञ्जुलकमलाललाम लल॥ २३॥

इनमें छ (भाषाओं) के योग में उदाहरण देने के लिये एक अर्थ वाले श्लेष का एक उदाहरण देते हैं—हे अकलङ्क कुल कलाओं में (निपुण, अनेक प्रकार की लीलाओं में चञ्चल, निर्मल भुजबल वाले, दुष्टों के सिर पर कील, कोमल, जय लक्ष्मी के चिह्न तुम खेलो ॥ २३ ॥

अकलङ्केति। हे एवंविध, त्वं खेल क्रीड। कीदृश। अकलङ्ककुल निर्मलान्वय। कलालय कलावास। बहुलीलालोल प्रचुरविलासलम्पट। विमलबाहुबल प्रकटभुजपराक्रम। खलमौलिकील दुर्जनशिरःशङ्को। कोमल कमनीय। मङ्गलकमलाललाम जयलक्ष्मीचिह्न। अत्रैकस्मिन्नर्थे भाषाषट्कस्यापि समानं रूपम् ॥

अकलङ्केति। हे इन गुणों से युक्त। तुम खेलो। कैसे (तुम)—पवित्र कुल वाले—कलाओं के निवास—प्रभूत विलास के लोभी—प्रकट भुजाओं के पराक्रम वाले—दुष्टों की खोपडी में धँसायी जाने वाली कील—जय लक्ष्मी के चिह्न। यहाँ एक ही अर्थ में छ भाषाओं का रूप समान है ॥

अथ प्रकृतिश्लेषमाह—

सिद्ध्यति यत्रानन्यैः सारूप्यं प्रत्ययागमोपपदैः।
प्रकृतीनां विविधानां प्रकृतिश्लेषः स विज्ञेयः ॥ २४ ॥

[भाषा श्लेष से निवृत्त होकर] प्रकृति श्लेष का उदाहरण देते हैं—जहाँ एक ही प्रत्यय, आगम और उपपद से नाना प्रकार की प्रकृतियों का सारूप्य सिद्ध होता है उसे प्रकृति-श्लेष जानना चाहिए ॥ २४ ॥

सिद्ध्यतीति। यत्र प्रत्ययैरागमैरुपपदैश्चानन्यैस्तैरेव प्रकृतीनां तु नानाप्रकाराणां सारूप्यं समानरूपता सिद्ध्यति स प्रकृतिश्लेषः ॥

सिद्ध्यतीति। जहाँ उन्हीं प्रत्ययों, आगमों और उपपदों से नाना प्रकार की प्रकृतियों की समरूपता सिद्ध होती है उसे प्रकृति श्लेष जानना चाहिए ॥

तत्रोदाहरणमाह—

परहृदयविदसुरहितप्राणनमत्काव्यकृत्सुधारसनुत्।
गोगमनारं कलयति मदसि महत्कालचित्सारम् ॥ २५ ॥

उसका उदाहरण देते हैं—(१) शत्रु-मण्डल के साथ, मानवों से शून्य, शत्रुओं का हृदय वेधन करने वाला, राक्षसों के हितैषियों का प्राण मथने वाला, शुक्र का छेदन करने वाला, अमृत-रस को नमस्कार करने वाला, कृत्य-करण के समय में प्रभूत चैतन्य वाला, सुर मण्डल सभा में गणना करता है।

(२) दूसरों के चित्त को जानने वाला, प्राण रहित हो गये लोगों के पुनः जीवित होने के कारण प्रसन्न, काव्य-रचना करने वाले, खलों को प्रेरित

करने वाले, कलाओं का चयन करने वाले, शत्रु-समुदाय से रहित विद्वान् सभा में उत्तम का ही चयन करते हैं ॥ २५ ॥

परेति। देवासुरयुद्धं वर्ण्यते—सौरं सुरसमूहः कर्तृ कलयति कलिं गृह्णाति। युध्यत इत्यर्थः। क्व सन्त'। अस्यन्ते क्षिप्यन्ते यत्र तत्सदस्तत्र सदसि युद्धे। सौरं कीदृशम्। परहृदयानि रिपुवक्षांसि विध्यतीति परहृदयवित्। यथासुरहितानां दानवपक्षपातिनां प्राणनं जीवनं मन्थातीत्यसुरहितप्राणमत्। तथा काव्यं दानवगुरुं कृन्तति पीडयतीति काव्यकृत्। तथा सुधारसममृतरसं नौति स्तौतीति सुधारसनुत्। तथा देवत्वान्न विद्यते नारं नरसमूहो यत्र तदनारम्। तथा महत्प्रभूतम् तथा काले कृत्यकरणसमये चित् चैतन्य ज्ञानं यस्य तत्कालचिन् तथा सहारेणारिसमूहेन वर्तते यत्तत्सारं यथा भवत्येवं कलयति। एष एकस्य वाक्यस्यार्थः॥ परस्यापि तादृशान्येव पदानि। सौरं सूरिसमूह सारमुत्कृष्टं वस्तु न्याय्य वा सदसि सभायां कलयति परिच्छिनत्ति। किं कुर्वत्सौरम्। महत्पूज्यत्पूज्यजनम्। तथा परहृदयवित्परचित्तज्ञम्। तथासुरहितानां प्राणवर्जितानां प्राणनेन प्रत्युज्जीवनेन माद्यति हृष्यतीत्यसुरहितप्राणनमत्। तथा काव्यं कविकर्म करोतीति काव्यकृत्। तथा शोभनो धारो मर्यादादिधारण येषां ते सुधाराः सुजनास्तान्स्यन्ति घ्नन्ति ये ते सुधारसा खलास्तान्नुदति प्रेरयतीति सुधारसनुत्। तथा न विद्यत आरमरिसमूहो यस्य तदनारम्। तथा कलानां समूहः कालं चिनोत्यर्जयतीति कालचित्। अत्र प्रकृतयो व्यधिविदिप्रभृतयो भिन्नाः। प्रत्यया. क्विबादय उभयत्रापि त एव। परहृदयादीन्युपपदानि च तान्येव। आगमश्च कालचिदादिपदेऽतोऽन्तागमादिकोऽनन्यः। ननु चैकत्र पक्षेऽनोऽन्तोऽस्ति द्वितीये नास्तीति कथमनन्य.। सत्यम्। नास्त्यान्योऽस्तीत्यनन्यो द्वितीयपक्षेऽन्यागमाभावादुच्यत इति सुस्थम्॥

परेति। देवासुर सङ्ग्राम का वर्णन किया जा रहा है—सुर-समूह कलि का ग्रहण अर्थात् युद्ध कर रहा है। किस स्थल में? युद्ध में। कैसा सुरसमुदाय परहृदयवित्—शत्रुओं के हृदय को बेधने वाला, असुरहितप्राणमत्—राक्षसों के हितैषियों के प्राणों का मन्थन करने वाला तथा काव्यकृत्—शुक्राचार्य का भेदन करने वाला तथा सुधारसनुत्—अमृत के रस को नमस्कार करने वाला (चाहने वाला) तथा अनार देवता होने के कारण मनुष्य जाति से रहित-तथा-अत्यधिक महत्ता वाला—तथा कृत्य करण के समय में ज्ञान से युक्त—तथा रिपु समुदाय से युक्त—उक्त विशेषणों वाला सुरसमुदाय युद्ध करता है। यह एक वाक्य का अर्थ है॥ दूसरे वाक्य के भी वही पद हैं। विद्वन्मण्डल सभा में उत्तम एवं

न्याय्य वस्तु को ही धारण करता है। क्या करता हुआ विद्वत्समुदाय—पूज्य लोगों की पूजा करता हुआ—तथा शत्रुओं का मर्म ताड़ने वाला—तथा, प्राणों से रहित होने के कारण मर गये लोगों के पुनः जीवित हो जाने से आनन्दित—तथा, काव्यकृत काव्य-रचनेवाला—तथा सुधारसनुत् (सुन्दर आचरणों के पालन करने वालों को नष्ट करने वाले दुष्टों का विनाश करने वाला)—तथा, शत्रुओं से रहित—तथा कालचित्—कलाओं का समूह काल—उसका चयन करने वाला यहाँ ल्यपि, विटि आदि प्रकृतियाँ पृथक् पृथक् हैं। क्विप् आदि प्रत्यय दोनों ही स्थलों पर वे ही हैं। पर हृदय आदि उपपद भी वे ही हैं।

अथ प्रत्ययश्लेषः—

यत्र प्रकृतिप्रत्ययसमुदायानां भवत्यनेकेषाम् ।
सारूप्यं प्रत्ययतः स ज्ञेयः प्रत्ययश्लेषः ॥ २६ ॥

अब प्रत्यय श्लेष (का उदाहरण देते हैं।)

जहाँ प्रत्ययों के कारण अनेक प्रकृति और प्रत्यय के समूहों में समरूपता होती है वहाँ प्रत्यय—श्लेष जानना चाहिए ॥ २६ ॥

यत्रेति। यत्र प्रकृतिप्रत्ययसमुदायानां बहूनां प्रत्ययास्सकाशात्सारूप्यं समानरूपता भवति स प्रत्ययश्लेषो ज्ञातव्यः ॥

यत्रेति। जहाँ प्रकृति प्रत्यय के अनेक समुदायों में प्रत्यय के कारण समरूपता होती है उसे प्रत्यय-श्लेष जानना चाहिए ॥

उदाहरणम्—

तापनमाजं पावनमारं हारं पराप दासेयः ।
कारं चारणमाहितमाज दरं साधनं बहुशः ॥ २७ ॥

उदाहरण—(१) (यह) दासीपुत्र सताप देने वाले, आक्षेप करने वाले, शुद्ध मृत्यु कराने वाले हार को चुराकर पा गया। (उसने) दासकों से मिल सकने वाले, हृदय में समाये हुये हाथ पैर के भय को अनेक बार त्याग दिया है॥

(२) अनेक बार शीघ्र ही अहित (राग आदि) के साधन संसार में प्राणियों को भ्रमण कराने वाली क्रिया के परित्याग के कारण (यह) आत्रेय (ज्ञानी) सूर्य, विष्णु, वायु और शिव की गति को प्राप्त हो गया ॥ २७ ॥

तापनमिति। एष दासेयो दासीपुत्रश्चौरो हारं मुक्ताकलाप ह्रियमाणं वा वस्तु पराप मुषित्वा प्राप्तवान्। कीदृशम्। तापयतीति तापनम्। बन्धादिहेतुत्वात्। तथा अज्यते क्षिप्यतेऽनेनेत्याजयतीति वा आजम्। चौरो हि चारकादौ क्षिप्यते तथा पावयतीति पावनः शुद्धिकृन्मारो

मरणं यत्र तत्पावनमारम्। तथा स दासेयो हरणकाले दरं भयमाज चिक्षेप त्यक्तवान्। कीदृशं दरम्। सघनादीश्वरादागतं साधनम्। आहितं हृदये निहितम्। पुनः कीदृशं दरम्। करयोरिदं कारम्। तथा चरणयोः पादयोरिदं चारणम्। करचरणखण्डनादिभयं नाजीगणदित्यर्थः। यतोऽसौ बहून्दयतीति बहुदः। बहुबलेन धनाद्यपहारतस्तन्नूकृता इत्यर्थः। एष एकोऽर्थः॥ द्वितीयस्तु—आसेय आरं गतिं परापद्यामवान्। 'षिञ् बन्धने'। आसेतव्य आसेयो मोक्षमप्राप्तो ज्ञानी भण्यते। ईषत्कर्मबन्धनात्। कीदृशमारम्। तपनस्येमं तापनम्। अजस्येममाजम्। पवनस्येमं पावनम्। हरस्येमं हारम्। सूर्यविष्णुवायुरुद्राणां संबन्धिनीं गतिं लेभ इत्यर्थः। यतोऽसौ कारं क्रियामाज त्यक्तवान्। कीदृशं कारम्। चारयति गमयति संसारे प्राणिनमिति चारणम्। पुनः कीदृशम्। अहितानां रागादीनामिदमाहितम्। किं तत्। साध्यतेऽनेनेति साधनम्। रागादीनामुपकरणमित्यर्थः। कथं साधनम्। बहुशोऽनेकशः। अरं शीघ्रम्। अत्र प्रत्ययवशात्प्रकृतिप्रत्ययसमुदायानां सारूप्यम्॥

तापनमिति। वह दासीपुत्र चोर हार को चुराकर पा गया। कैसे (हार को)? वध आदि के कारण ताप देने वाला—आक्षेप कराने वाला तथा पवित्र मृत्यु देने वाला—तथा, उस दासीपुत्र ने चोरी करने के समय भय को त्याग दिया था—किस भय को?—(उस हार के) मालिक से होने वाले—तथा हृदय में समाये हुये, फिर कैसे भय को? हाथों के चरणों के। हाथ-पैर तोड़ दिये जाने के भय की परवाह नहीं की—यह तात्पर्य है। (फिर वह दासी-पुत्र कैसा है) बहुद—चूँकि उसने अनेकों को नष्ट किया है—धन आदि चुराने के कारण अनेक उसके द्वारा क्षीण कर दिये गये—यह भाव है। यह एक अर्थ है॥ दूसरा भी आसेय (ज्ञानी) गति को प्राप्त हो गया। 'षिञ्' धातु बन्धन के अर्थ में आती है। मोक्ष को न प्राप्त हुआ (बन्धन में पड़ा हुआ) ज्ञानी आसेय कहा जाता है। क्यों कि उसे कर्म का थोड़ा सा बन्धन होता है। कैसी गति को—तपन की अजन्मा की—पवन की—शिव की। अर्थात् सूर्य, विष्णु, वायु और रुद्र की गति को प्राप्त हुआ। (कारण देते हैं) क्यों कि इसने क्रिया का त्याग कर दिया—कैसी क्रिया का? प्राणी को संसार में भ्रमण कराने वाली चारण क्रिया का—फिर कैसी क्रिया का? अहित राग आदि की क्रिया का—वह क्या है—साधन अर्थात् रागादि का उपकरण। साधन को कैसे त्याग दिया—अनेक बार शीघ्र ही। यहाँ प्रत्यय के ही कारण प्रकृति और प्रत्यय के समुदायों में समरूपता है॥

अथ विभक्तिवचनश्लेषः—

सारूप्यं यत्र सुपां तिङां तथा सर्वथा मिथो भवति ।
सोऽत्र विभक्तिश्लेषो वचनश्लेषस्तु वचनानाम् ॥ २८ ॥

आगे विभक्ति और वचन श्लेष (का उदाहरण देते हैं)—

सुबन्त और तिङन्त में जहाँ सर्वथा परस्पर सारूप्य होता है वहाँ विभक्ति-श्लेष होता है (और) जहाँ वचनों में श्लेष होता है उसे वचन-श्लेष जानना चाहिए ॥ २८ ॥

सारूप्यमिति । यत्र सारूप्यं समानरूपता सुपां स्यादीनां तिङां त्यादीनां मिथः परस्परं सर्वथा सर्वप्रकारैर्भवति सोऽत्र श्लेषाधिकारे विभक्तिश्लेषो ज्ञेयः । वचनानां त्वेकवचनादीनां मिथः सारूप्ये वचनश्लेषः ॥

सारूप्यमिति । जहाँ सु आदि में और तिङ् आदि में परस्पर सब प्रकार से समरूपता होती है श्लेष के प्रपञ्च में उसे विभक्ति श्लेष जानना चाहिए । वचनों में भी एकवचन आदि में परस्पर समरूपता होने पर वचन श्लेष होता है ॥

तत्र तावद्विभक्तिश्लेषोदाहरणम्—

आयामो दानवतां सरति बले जीवतां न नाकिरताम् ।
नयदानवाँल्ललामः किमभूरसि दारुणः सहसा ॥ २९ ॥

उनमें सर्वप्रथम विभक्ति श्लेष का उदाहरण देते हैं—

प्राणियों में दान देने वालों की ही सेना में विस्तार होता है—कृपणों की नहीं । पराक्रम में भयङ्कर तलवार वाला, कुत्सा का अपात्र, नीति से युक्त, दानी ही संसार का भूषण होता है ॥ २९ ॥

आयाम इति । जीवतां प्राणभृतां दानवतां दानं ददतां सतां संबन्धिनि बले सैन्ये आयामो विस्तारः सरति प्रसरति । न नाकिरतां न विक्षिपताम् । कार्पण्येन गलेऽर्थिनं गृह्णतां नेत्यर्थः । कुतः । यतो नयश्च दानं च ते विद्येते यस्यासौ नयदानवान्पुरुषो ललामो भूषणं जगतः । तथा किमः कुत्साया अभूरस्थानं किमभूः । तथा सहसा बलेन असिदारुणः खड्गभीषणश्च ललामः । इत्येकोऽर्थः ॥

आयाम इति । प्राणियों में दान देने वालों की ही सेना में विस्तार होता है । न कि कंजूसी करने वालों की । कृपणता से याचक को गले लगाने वालों की सेना में विस्तार नहीं होता । क्यों ? क्योंकि नीति और दान से संपन्न ही पुरुष संसार का भूषण होता है—तथा (वह) कुत्सा का अपात्र होता है तथा पराक्रम में भीषण तलवार के कारण सुन्दर होता है । यह एक अर्थ है ।

अपरस्तु—केचित्सुरा बलिनामानमसुरमूचुः—हे बले वैरोचन, दानवतामसुरत्वमायाम आगच्छामः। कथम्। सरति सप्रीतीति कृत्वा। न पुनर्जीवता बृहस्पतिताम्। किंभूताम् नाकिषु देवेषु रतां सक्तां नाकिरताम्। तस्मान्नय प्रापय दानवानसुरान, येन तेषां मध्ये ललामो विलसाम.। किमसि त्वं दारुण. काष्ठादपि संजातः सहसा। येनास्माकं वचनं न शृणोषीत्यर्थ। अत्रायाम इत्यादयो य एव स्याद्यन्तास्त एव त्याद्यन्ताः शब्दा इति सारूप्यम्॥

दूसरा भी—कुछ देवताओंने बलि नामक राक्षस से कहा, हे बलि! हम दानवता को प्राप्त हो रहे हैं। कैसे? प्रेमपूर्वक। न कि बृहस्पतिता को? कैसी (बृहस्पतिता)? देवताओं में आसक्त—(सलग्न) अतएव राक्षसों के समीप (हमें) पहुँचाओ जिससे उनके बीच विलास कर सकें। तुम बल के कारण (सहसा) काठ से भी क्यों कठोर हो गये हो जिससे हमारी बातें नहीं सुनते हो। यहाँ 'आयाम' आदि में जो स्याद्यन्त शब्द हैं वे ही त्याद्यन्त—इस प्रकार (इनमें) सरूपता है॥

अथ वचनश्लेषोदाहरणम्—

आर्योऽसि तरोमाल्यः सत्योऽनतक्षयः स्तवावाच्यः।

सन्नाभयो युवतयः सन्मुख्यः सुनयना वन्द्यः॥ ३०॥

आगे वचन श्लेष का उदाहरण देते हैं—सेनारूपी आभूषण वाले, अनन्यथा वचन कभी भी घुटना न टेकने वालों के राज्य के विनाश, स्तुतियों से, क्षीणों के अभय, युवकों की श्रद्धा के स्थान, सज्जनों में अग्रगण्य, सुन्दर नीतियों वाले पुरुषों से युक्त हे आर्य तुम वन्दनीय हो॥ ३०॥ (२) (हे राजन्) तुम्हारे शत्रुओं की कृश रोम पंक्तिवाली, सती कृशोदरी अथो मुखी, सुन्दर नारियों वाली, सुन्दर मुखों वाली और सुन्दर नेत्रों वाली, रमणियाँ वन्दिनी बना ली गयी हैं॥ ३०॥

आर्य इति। कश्चिदुत्साह्यते—असि त्वं वन्द्यो वन्दनीय, यत आर्यो विशिष्टः। तथा तरो बलं माल्यमलंकरणयस्यासौ तरोमाल्य.। सत्योऽवितथवाक्। अननानामप्रणतानां क्ष्माभूमेः क्षयो नाशहेतुरनतक्षय.। स्तवैः स्तुतिभिरवाच्यो वक्तुमशक्यः। तथा सन्नानां क्षीणानामभयो न विद्यते भयं यस्मादिति सन्नाभयः। तथा यूनस्तरुणांस्तयतेऽभियुङ्क्त इति युवतय.। सतां साधूनां मुख्य आद्यः। तथा शोभनो नयोऽस्येति सुनयः स चासौ ना च। सुनीतिपुरुष इत्यर्थः। एष एकवचनेनैकस्य वाक्यस्यार्थः॥ अपरस्य तु—कश्चिद्राजानमाह—तव संबन्धिन्य आर्योऽरिसक्ता युवतयः

स्त्रियो वन्द्यो महानीता एवंविधाः। असिता रोमाली यासां तास्तथाभूता। तथा सत्यः साध्व्यः। नतकुक्षयः कृशोदर्यः। अवाच्योऽधोमुख्यः। तथा सती रम्या नाभिर्यासां ता' सन्नाभयः। तथा सच्छोभनं मुखं यासां ताः सन्मुख्य। शोभने नयने यासां ता' सुनयना। अत्रार्य इत्यादीनि पदानि बहुवचनान्तानीति वचनश्लेष.॥

आर्य इति। (कोई) किसी को उत्साहित कर रहा है—तुम प्रणाम कराने योग्य हो क्योंकि आर्य (श्रेष्ठ) हो। तथा (तुम) तरोमाल्य—शक्ति के आभूषण वाले हो—सत्यभाषी हो—प्रणाम न करने वालों की भूमि के विनाश हो—स्तुतियों से तुम्हारी वन्दना नहीं की जा सकती—(तुम) निर्बलों के अभय हो—युवकों में अभिनिवेश रखने वाले हो—सज्जनों में अग्रगण्य हो सुनयना (सुन्दर नीति वाले पुरुष) हो। यह एक वचन से एक वाक्य का अर्थ हुआ॥ दूसरे का भी—कोई राजा से कह रहा है—तुमसे सबन्ध रखने वाली शत्रु रमणियाँ वन्दनीय हैं। वन्दी बनायी गयी इस प्रकार का कृष्ण रोम-पंक्तिवाली, साध्वी, कृशोदरी, निम्नमुखी, सुन्दर नाभि वाली, सुन्दर मुख वाली और सुन्दर नेत्रों वाली। आर्य आदि पद यहाँ बहुवचनान्त हैं अतएव (यहाँ) वचन-श्लेष है॥

एवं श्लेपलक्षणमभिधाय पूर्वकविलक्ष्यसग्रहाय लक्षणशेषमाह—

भाषाश्लेषविहीनः स्पृशति प्रायोऽन्यमप्यलंकारम्।
धत्ते वैचित्र्यमयं सुतरामुपमासमुच्चययोः॥ ३१॥

इस प्रकार श्लेप के स्वरूप का व्याख्यान करके (अपने से) पूर्ववर्ता आचार्यों के लक्ष्य का ग्रहण करने के लिये शेष लक्षण बताते हैं—भाषा-श्लेषसे शून्य (शब्द-श्लेष) का प्रायः (वास्तव आदि अर्थ के) अन्य अलङ्कारों के साथ सम्मिश्रण होता है। उपमा और समुच्चय में तो इसके स्पर्श से विशेष चमत्कार (उत्पन्न हो जाता है)॥ ३१॥

भाषेति। अयं पूर्वोक्तश्लेपो भाषाश्लेपरहितः प्रायो बाहुल्येनान्यमप्य-लंकारमर्थविषयं व्यतिरेकादिकं स्पृशति। श्लेपस्यौपम्यादिभिः सह संकरो भवतीत्यर्थः। अपिशब्दो विस्मये। प्रायोग्रहणमसाकल्यप्रतिपाद-नार्थम्। अन्यमलंकारं स्पृशति परं न सर्वमेवेत्यर्थः। तत्रापि सुतरामतिशयेन वैचित्र्यं रम्यत्वमयं श्लेप उपमासमुच्चययोर्धत्ते धारयति उपमा-साहचर्यात्समुच्चयोऽप्यत्रौपम्यभेदो गृह्यते॥

भाषेति। भाषा-श्लेप से शून्य यह पूर्वोक्त श्लेष प्राय व्यतिरेक आदि अर्थ के अन्य अलङ्कारों का स्पर्श करता है। अर्थात् औपम्य आदि के साथ श्लेष का

मंस्कार होता है। अपि शब्द विस्मय के अर्थ में प्रयुक्त हुआ है। प्रायः का ग्रहण असाकल्य (कुछ ही स्थलों पर लागू होने) को घोषित करता है—तात्पर्य है कि कुछ ही अलङ्कारोंका स्पर्श करता है सब का नहीं। उन (स्फुट) स्थलों में उपमा और समुच्चय में यह श्लेष विशेष चमत्कारी होता है। उपमा के साथ साहचर्य होने के कारण समुच्चय भी औपम्य का ही भेद समझा जाता है ॥

नन्वत्र श्लेषवाक्यद्वये शब्दमात्रं श्लिष्टं भवति, न त्वर्थ इति साम्याभावस्तत्र कथमुपमासमुच्चयाभ्यां स्पर्शो घटत इत्याशङ्कयाह—

स्फुटमर्थालंकारावेतावुपमासमुच्चयौ किं तु ।
आश्रित्य शब्दमात्रं सामान्यमिहापि संभवतः ॥ ३२ ॥

यहाँ श्लेष के दो वाक्यों में केवल शब्द श्लिष्ट होता है, अर्थ नहीं—इस प्रकार साम्य का अभाव होता है. (फिर) उपमा और समुच्चय के साथ इसके स्पर्श की सङ्गति कैसे बैठ सकती है—इस शङ्का का उत्तर देते हैं—ये दोनों उपमा और समुच्चय स्पष्ट ही अर्थालङ्कार हैं; किन्तु शब्दमात्र साधारण धर्म का अवलम्बन करके (वे) दोनों शब्द में भी हो सकते हैं ॥ ३२ ॥

स्फुटेति। स्फुटं सत्यमर्थालंकारावेतावुपमासमुच्चयौ न कदापि स्वरूपं त्यजतः। किंतु शब्दमात्ररूपं सामान्यं साधारणं धर्ममाश्रित्य संभवतः। ताभ्यां योगो घटत इत्यर्थः। अर्थतो न सादृश्यं किं तु वाक्यद्वयसाधारणशब्दाश्रयं सादृश्यं विद्यत इति तात्पर्यार्थः॥

स्फुटेति। सत्य है; ये दोनों अर्थालङ्कार उपमा और समुच्चय कभी भी अपना स्वरूप नहीं त्यागते हैं। किन्तु केवल शब्द साम्य का आश्रय करके (शब्द में भी) हो सकते हैं। अर्थात्—(उपमा और समुच्चय) इन दोनों का (शब्द में होना) सङ्गते है। तात्पर्य यह कि यद्यपि अर्थ में सादृश्य नहीं होता है किन्तु दोनो वाक्यों में साधारण शब्दगत सादृश्य होता है ॥

उदाहरणमाह—

यदनेकपयोधिभुजस्तवैव सदृशोऽस्यहीनसुरतरसः ।
ननु वलिजितः कथं ते सदृशस्तदसौ सुराधिकृतः ॥ ३३ ॥

उदाहरण देते हैं—चारों समुद्रों तक पालन करने वाली, नागराज देव के समान बलवाली, (तुम्हारी भुजा) तुम्हारे ही सदृश है। भला वलिजित (वलि के द्वारा जीती गयी, पक्षा०—वलि को जीतने वाली) तुम्हारे सदृश कैसे हो सकता है। यह तो सुराधिकृत (देवों के द्वारा अधिकृत, पक्षा०—देवों की मनःपीडा काटने वाली) है ॥ ३३ ॥

यदिति। कश्चिदुच्यते—त्वं तवैव सदृशो नान्यस्येत्यनन्वयानामुपमाविशेषणद्वारेण साम्यमाह—कीदृशस्त्वम्। अनेकपानां द्विपानां योद्धा भुजो बाहुर्यस्यासावनेकपयोधिभुजः। तथाऽहीन परिपूर्णः सुरतरसो निधुवनरसो यस्यासावहीनसुरतरस। तव कीदृशस्य। अनेकांश्चतुरः पयोधीन्समुद्रान्भुनक्ति रक्षतीत्यनेकपयोधिभुक्तस्य। तथाहीनामिनो नागराजः सुरा देवास्तेषामिव तरो बल यस्यासावहीनसुरतरास्तस्य। अत्र प्रथमानिर्दिष्टमुपमेयं षष्ठीनिर्दिष्टमुपमानमनयोस्तु न वस्तुत किंचिदपि साम्यमस्ति, किंतु तत्प्रतिच्छायशब्दप्रयोगात्साम्यं प्रतिभासते। एवमुत्तरत्रापि योज्यम्। किमिति। त्वं तवैव सदृशो न त्विन्द्रस्येत्याह—नन्वित्यादि। ते तव कथमसौ सदृश इति व्यतिरेकोऽयमलंकारः। कीदृशस्य ते। बलिनः समर्थाञ्जयत्यभिभवतीति बलिजित्तस्य बलिजितः। तथा सुराणामाधीन्मन पीडाः कृन्ततीति सुराधिकृत्तस्य सुराधिकृत। इन्द्रस्तु कीदृश। बलिनाम्ना दानवेन जित. पराभूत। तथा सुरैरधिकृतो राज्ये नियोजितः। एवं त्व सुराणामाधीञ्छिनत्सि, स तु सुरैरधिकृत इति स्फुट एव तवेन्द्रस्य च विशेषः। यत्तच्छब्दौ हेत्वर्थौ। सन्त्वमर्षे। यस्मात्त्वं तवैव सदृशस्तस्मात्तव कथमिन्द्रः सदृशो भवतीत्यर्थ॥

यदिति। कोई किसी से कह रहा है—'तुम तुम्हारे ही सदृश हो, किसी दूसरे के नहीं' इस प्रकार अनन्वयों (अनुपमेयों) का उपमा विशेषण के मुख से साम्य बताते हैं—तुम कैसे हो?—अनेकपयोधिभुज (हाथियों से लड़ने वाली भुजाओं वाले) और अहीनसुरतरस (परिपूर्ण सभोग शृङ्गार वाले)। तुम्हारे कैसे? (राजा के पक्ष में विशेषणों का अन्वय करते हैं) चारों समुद्रों तक पृथ्वी की रक्षा करने वाले, तथा देवों के समान पराक्रम वाले। यहाँ प्रथमा से निर्दिष्ट उपमेय है और षष्ठी से निर्दिष्ट उपमान, वस्तुतः इन दोनों में कुछ भी साम्य नहीं है किन्तु उन दोनों के समान शब्द के प्रयोग के कारण साम्य की प्रतीति होती ही है। इसी प्रकार आगे भी जोड लेना चाहिए। इस प्रकार क्यों। तुम तुम्हारे ही सदृश हो इन्द्र के समान नहीं—इसे बताते हैं—नन्वित्यादि। वह इन्द्र तुम्हारे समान कैसे हो सकता है—इस प्रकार यह व्यतिरेक अलंकार है। किन (विशेषणों) से युक्त तुम्हारे? बलिजित (बल्वानों को जीतने वाले) और देवताओं की मन.पीड़ा को काटने वाले इन्द्र किन विशेषणों से युक्त है—बलिजित (बलि नामक राक्षस से पराजित) तथा सुराधिकृत (देवों के द्वारा राजकार्य में नियोजित है)। इस प्रकार तुम देवों की मन पीड़ा को दूर करते हो और वह देवों के द्वारा अधिकृत है—इस प्रकार तुम्हारे और इन्द्र के बीच भेद (वैशिष्ट्य) स्पष्ट है। 'यत्' 'तत्' शब्द हेतु अर्थ में आये हैं।

'ननु' अमर्ष में आया है। क्योंकि तुम तुम्हारे ही सदृश हो अतएव इन्द्र तुम्हारे सदृश कैसे हो सकता है यह अर्थ है॥

उपमासमुच्चयोदाहरणमाह—

वसुधामहितसुराजितनीरागमना भवांश्च वर्षाश्च।
सुरचितवराहवपुषस्तव च हरेश्चोपमा घटते॥ ३४॥

उपमा और समुच्चय का उदाहरण—

आप और वर्षा वसु-धामहित-सुराजित-नीराग-मना (धन और तेज के कारण (अपने) अनुकूल देवताओं के द्वारा अजेय राग आदि दोष से रहित चित्तवृत्ति वाले, पक्षा०—पृथ्वी पर पूजित अत्यन्त सुन्दर जल वर्षण करने वाली) हैं। सुरचितवराहवपुषः (भली भाँति रचे गये भयङ्कर रण का पोषण करने वाले, पक्षा० भलीभाँति रचे गये शूकर की काया वाले) तुम्हारी और विष्णु की ही उपमा बैठती है॥ ३४॥

वसुधेति। त्वं वर्षाश्च सदृशौ। त्व तावत्कीदृश। वसु धनम्, धाम तेजः, साभ्यां हितमनुकूलं सुरैर्देवैरजितमपराभूतं नीराग रागरहितं मनश्चित्तं यस्य स तथोक्तस्त्वम्। वर्षास्तु वसुधायां भुवि महितं पूजितं सुष्ठु राजितं शोभितं नीरागमनं जलागतिर्यासु तास्तथोक्ता। चशब्दावत्र समुच्चयार्थौ। साधारणविशेषणादौपम्यस्य सद्भावः। शुद्धाया उपमाया उदाहरणमाह—सुरचितेत्यादि। तव विष्णोश्च साम्यं घटते। कीदृशस्य तव सुष्ठु रचितं वरं श्रेष्ठमाहवं समरं पुष्णाति पुष्टिं नयतीति यस्तस्य सुरचितवराहवपुषः। हरेस्तु सुरैर्देवैश्चितं व्याप्तं वराहवपुः सूकरशरीरं यस्य स तथा तस्य। अत्रापि साधारणशब्दयोगात्साम्यम्, न त्वर्थतः॥

वसुधेति। तुम और वर्षा सदृश हो। तुम किन विशेषणों से युक्त हो? धन और तेज—इन दोनों के अनुकूल देवों से अपराजित रागशून्य मन वाले वर्षायें भी धरती पर पूजित सुन्दर जल-वर्षण वाली है। च शब्द यहाँ समुच्चय अर्थ में आये है। समान विशेषण के कारण औपम्य की सत्ता है। शुद्ध उपमा का उदाहरण देते हैं—सुरचितेत्यादि। तुम्हारा और विष्णु का साम्य सङ्गत है। किन विशेषणों से युक्त तुम्हारा—सुरचित वराहव पुषः (भली भाँति रचे गये भयङ्कर रण का पोषण करने वाले)। विष्णु का भी—देवों के द्वारा व्याप्त सूकर की काया वाले। यहाँ समान शब्दों के योग से ही साम्य है—अर्थ के कारण नहीं॥

अथ श्लेषमुपसंहरन्नाह—

शब्दानुशासनमशेषमवेत्य सम्य-
गालोच्य लक्ष्यमधिगम्य च देशभाषाः।

यत्नादधीत्य विविधानभिधानकोषा-
ञ्श्लेषं महाकविरिमं निपुणो विदध्यात् ॥ ३५ ॥

अब श्लेष का उपसंहार करते हुये कहते हैं—भलीभाँति निखिल व्याकरण को जानकर, लक्ष्य का परामर्श करके, देशभाषाओं को समझकर, प्रयत्नपूर्वक विविध अभिधान कोषों का अध्ययन करके कुशल महाकवि इस श्लेष की रचना करे ॥ ३५ ॥

शब्दानुशासनमिति । इदमिदं च कृत्वा ततो महाकविरिमं श्लेषं कुर्यात् । किं कृत्वा । शब्दानुशासनं व्याकरणं समग्रं सम्यग्ज्ञात्वा । तथा लक्ष्यमुदाहरणं महाकविकृतमालोच्य । तथा सूरसेन्यादिदेशभाषा विदित्वा । तथाभिधानकोषान्नाममाला अधीत्य पठित्वेति । एतच्च कृत्वा निपुणः कुशलो महाकविश्च यः स श्लेषं कुर्यादिति ॥

शब्दानुशासनमिति । यह यह करके तब महाकवि उस श्लेष की रचना करे । क्या क्या करके ? व्याकरण शास्त्र को भलीभाँति जानकर तथा लक्ष्य—महाकवियों के द्वारा प्रस्तुत किये गये उदाहरणों का परामर्श करके—तथा सूरसेनी आदि देश भाषाओं को जानकर—तथा शब्दकोषों का अध्ययन करके—यह यह करके जो कुशल और महाकवि हो वह श्लेष की रचना करे ।

इति श्रीरुद्रटकृते काव्यालङ्कारे नमिसाधुविरचितटिप्पणीसमेत-
श्चतुर्थोऽध्यायः समाप्तः ।

इस प्रकार रुद्रट-रचित काव्यालङ्कार में नमिसाधु-रचित टिप्पणी
से युक्त चौथा अध्याय समाप्त हुआ ।

०

पञ्चमोऽध्यायः

वक्रोक्त्यनुप्रासयमकश्लेषान्निरूप्य क्रमप्राप्तं चित्रं प्रतिपादयितुमाह—

भङ्ग्यन्तरकृततत्क्रमवर्णनिमित्तानि वस्तुरूपाणि ।
साङ्कानि विचित्राणि च रच्यन्ते यत्र तच्चित्रम् ॥ १ ॥

वक्रोक्ति, अनुप्रास, यमक, श्लेष (चार शब्दालंकारों) का निरूपण क्रमानुसार चित्र अलंकार का वर्णन करते हैं—चक्र आदि विचित्र लक्षण से लोकप्रसिद्ध वर्ण (अक्षर) आदि के क्रमरूप निमित्त से स्वनाम चिह्नवाली विचित्र (चक्र) आदि वस्तुओं का जहाँ संस्थान आदि रच दिया जाता है (वहाँ) चित्र नामक अलंकार होता है ॥ १ ॥

भङ्ग्यन्तरेति। यत्र काव्ये वस्तूना चक्रादीनां रूपाणि संस्थानानि रच्यन्ते निष्पद्यन्ते *तच्चित्रसादृश्यादाश्चर्याद्वा चित्रं नामालंकारः । काव्ये* कथं वस्तुरूपाणि रच्यन्त इति प्रश्ने विशेषणद्वारेण युक्तिमाह—भङ्ग्यन्तरेण चक्रादिर्विच्छित्तिलक्षणेन प्रकारेण कृतः स सकललोकप्रसिद्धः क्रमो रचनापरिपाटी येषां ते च ते वर्णाश्चाक्षराणि च ते निमित्तं कारणं येषां वस्तुरूपाणां तानि तथोक्तानि । तथा सहाङ्केन स्वनामचिह्नेन वर्तन्त इति साङ्कानि । तथा विचित्राणि चान्यानि च सर्वतोभद्रानुलोमप्रतिलोमादीनि । चकारो वस्तुरूपेषु मध्ये सर्वतोभद्रादिसमुच्चयार्थः ॥

भङ्ग्यन्तरेति। जिस काव्य में चक्र आदि वस्तुओं के रूप (संस्थान) की रचना की जाती है उसे चित्रके साथ सादृश्य होने के कारण अथवा आश्चर्य होने के कारण चित्र नामक (शब्द का) अलंकार होता है। काव्य में वस्तुओं का स्वरूप कैसे रच दिया जाता है—यह प्रश्न उठने पर विशेषणों के मुख से आगे बताते हैं—भङ्ग्यन्तर से चक्र आदि की विच्छित्तिरूप विधाओंसे सकल संसार में प्रसिद्ध क्रम अर्थात् रचनाविधि वाले वर्ण एवं अक्षर रूप कारणों वाले वस्तु के संस्थान। (फिर कैसे वस्तु के संस्थान)? अपने नाम के चिह्नों से युक्त और सर्वतोभद्र, अनुलोम, प्रतिलोम आदि अन्य विचित्र वस्तुरूप। (कारिकामें) चकार वस्तुरूपों में सर्वतोभद्र आदि के समुच्चय के लिये (आया है)॥

सामान्यतश्चित्रलक्षणमभिधाय विशेषणाभिधातुं तद्भेदानाह—

तच्चक्रखड्गमुसलैर्बाणासनशक्तिशूलहलैः ।
चतुरङ्गपीठविरचितरथतुरगगजादिपदपाठैः ॥ २ ॥

अनुलोमप्रतिलोमैरर्धभ्रममुरजसर्वतोभद्रैः ।
इत्यादिभिरन्यैरपि वस्तुविशेषाकृतिप्रभवैः ॥ ३ ॥
भेदैर्विभिद्यमानं संख्यातुमनन्तमस्मि नैतदलम् ।
तस्मादेतस्य मया दिङ्मात्रमुदाहृतं कवयः ॥ ४ ॥

चित्र का सामान्य लक्षण बताकर विशेष का प्रतिपादन करने के लिये उसके भेद बताते हैं—यह चक्र, खड्ग, मुसल, बाणासन, शक्ति, शूल, हल, चतुरङ्ग—फलक पर रचे गये रथ, तुरग, गज आदि पदपाठ, अनुलोम, प्रतिलोम, अर्धभ्रम, मुरज, सर्वतोभद्र आदि तथा वस्तुओं की विशेष आकृति से उत्पन्न होने वाले अन्य भेदों के किये जाने पर इसकी गणना करने में हे कवियो ! मैं (रुद्रट) समर्थ नहीं हूँ । अतएव इसका (मैंने) दिगुन्मीलनमात्र किया है ॥ २-४ ॥

तदिति । अनुलोमेति । भेदैरिति । तदेतच्चित्रं यस्मादित्यादिभिरुक्तै रन्यैरनुक्तैरपि । भेदैः कीदृशैः । वस्तुविशेषाकाराप्रभवन्ति जायन्ते ये तैर्विभिद्यमानं भेदेन व्यवस्थाप्यमानमनन्तमसख्यात तत्सख्यातुं संख्यया प्रतिपादयितुं नाल न समर्थोऽस्म्यहम् । तस्मादेतस्य मया दिङ्मात्रमुदाहृतं दर्शितं हे कवय । इत्यादिभिर्भेदैरित्युक्तं तानेव दर्शयति—तच्चक्रेत्यादि । चक्रादीनि प्रतीतानि न वरम् ।

तदिति । अनुलोमेति । भेदैरिति । यह प्रकरणगत चित्र (अलकार) चूँकि बताये गये और न गिनाये गये भी—कैसे भेदों से (वस्तु-विशेष के आकार से जो उत्पन्न होते हैं—उनमें विभक्त किये जाने पर अनन्त (असख्येय) होता है । अतएव उसकी गणना सख्या में कराने में मैं सक्षम नहीं हूँ । अतएव हे कवियो ! (मैंने) इसकी दिङ्मात्र का प्रदर्शन किया है । आदि भेदों से जो कहा है उन्हीं को गिनाते हैं—तच्चक्रेत्यादि ।

बाणासन धनु । चतुरङ्गपीठ द्यूतकारविदितचतुरङ्गफलकस्तत्र रचिते रथतुरगगजादिपदपाठै. । पठ्यतेऽनेनेति पाठ. श्लोकः । आदिग्रहणान्नर-पदसग्रह । क्रमव्युत्क्रमाभ्या य. सदृश सोऽनुलोमप्रतिलोमश्लोक. । अर्ध-भ्रमणादर्धभ्रम. । सर्ववस्तु भ्रमणात्सर्वतोभद्र. । आदिग्रहणात्पद्मगोमूत्रि-कादिसग्रह ।

बाणासन—धनु । चतुरङ्गपीठ—जुआ खेलनेवालों को विदित चतुरङ्गफलक, उस पर रचे गये रथ, तुरग, गज आदि पदपाठ । पाठ जिससे पढ़ा जाय श्लोक । (कारिका में) आदि का ग्रहण नर पद का ग्रहण करने के लिये किया गया है । सीधे और उलटे पढ़ने में जो समान होता है उसे अनुलोम और प्रतिलोम श्लोक

जानना चाहिए। आधे (छन्द) में भ्रमण होने पर अर्धभ्रम होता है तथा (सभी) प्रकार से भ्रमण (पाठ) होने पर सर्वतोभद्र होता है। आदि का ग्रहण (कारिका) में गोमूत्रिका आदि के संग्रह के (लिये किया गया है)॥

किं पुनस्तेषां वस्तुरूपाणां विरचने लक्षणमित्याह—

यन्नाम नाम यत्स्यात्तदाकृतिर्लक्षणं मतं तस्य।
तल्लक्ष्यमेव दृष्ट्वावधार्यमखिलं तदन्यदपि॥ ५॥

वस्तुओं के उन संस्थाओं के रचने में क्या स्वरूप होता है—इसे बताते हैं—जो चित्र जिस नाम का होता है उनकी (चक्र आदि की) आकृति ही उनका लक्षण होती है। उसके लक्ष्य को ही (माघ आदि महाकवियों में) देखकर समझ लेना चाहिए। (वस्तु-रूप) लक्ष्य से भिन्न (मत्स्य बन्ध आदि) चित्रों की अपनी बुद्धि से ही योजना कर लेनी चाहिए॥ ५॥

यदिति। चक्रादिकं प्रसिद्धं नाम संज्ञा यस्येति विग्रहः। तद्यन्नाम। द्वितीयस्तु नामशब्दः प्राकाश्ये। तदेवंविधं वस्तु यत्स्यात्तदाकृतिस्तदाकारस्तस्य चित्रस्य लक्षणमभिहितम्। यदनुकार्यस्य चक्रादेर्नाम संस्थानं च तदेवानुकरणस्य करणीयमित्यर्थः। तत्र चित्रलक्षणमखिलं समग्रं माघादिमहाकविरचितं लक्ष्यमुदाहरणमेव दृष्ट्वावधार्यं ज्ञेयम्। ततो वस्तुरूपादन्यदपि सर्वतोभद्रादिकं लक्ष्यमेव दृष्ट्वावधार्यम्। अथवा ततो लक्ष्योक्ताद्वस्तुरूपादन्यदपि मत्स्यबन्धादिकं स्वधियैवाभ्यूह्यम्। मार्गं दृष्ट्वान्यथापि करणं न दोषायेत्यर्थः। तेन चक्रारनेमिपद्मदलादावनियम उक्तो भवतीति स्थितमेतत्॥

यदिति। चक्र आदि प्रसिद्ध नाम जिसका है—इस प्रकार (समास) विग्रह करना चाहिए। यह (चित्र) जिस नाम का है। दूसरा नाम शब्द प्राकाश्य अर्थ में आया है। तो इस प्रकार की जो वस्तु होगी उसका आकार ही उस चित्र का लक्षण बताया गया है। तात्पर्य यह है कि अनुकार्य चक्र आदि का जो नाम (संज्ञा) और स्वरूप है वही अनुकरण का भी करना चाहिये। (अर्थात् तदाकारधारी चित्र अलंकार का भी वही नाम और स्वरूप बनाना चाहिए)। उस चित्र का समग्र लक्षण (स्वरूप) माघ आदि महाकवियों द्वारा रचे गये उदाहरणों को देखकर ही समझना चाहिए। उस वस्तुस्वरूप से भिन्न (नाम और संस्थान वाले) सर्वतोभद्र आदि को उदाहरण को ही देख कर समझना चाहिए। अथवा उन बताये जा चुके वस्तु-स्वरूप वाले (चित्र से भिन्न) मत्स्यबन्ध आदि को अपनी बुद्धि से ही समझ लेना चाहिए। मार्ग को जानकर,

तात्पर्य यह है, भिन्न बात भी करने में दोष नहीं होता है। इससे चक्रारनेमि-पद्मदल आदि में कोई नियम नहीं होता है—यह स्पष्ट है ॥

तत्राष्टभिः श्लोकैर्गर्भीकृतखड्गादिवस्तुरूपान्तरं चक्रमाह—

मारारिशक्ररामेभमुखैरासाररंहसा ।
मारारब्धस्तवा नित्यं तदर्तिहरणक्षमा ॥ ६ ॥
माता नतानां संघट्टः श्रियां बाधितसंभ्रमा ।
मान्याथ सीमा रामाणां शं मे दिश्यादुमादिजा ॥ ७ ॥

(खड्गबन्धः, युग्मम्)

उनमें आठ श्लोकोंमें—जिनमें खड्ग आदि वस्तु के अन्य रूपों का भी अन्तर्भाव हो जाता है—चक्रका उदाहरण देते हैं—शिव, इन्द्र, राम, तथा गणेश के द्वारा धारा प्रवाह से, जिसकी उत्कृष्ट स्तुति प्रारम्भ की गयी है इस प्रकार की और (उन) शिव की पीड़ा का सदा निवारण करने वाली—विनयावनत भक्तों की माता, सम्पत्ति की सङ्गमस्थली, (भक्तों की) पीड़ा को नष्ट करनेवाली, स्त्रियोंकी मर्यादारूप परम माननीया और अनादि पार्वती मेरा कल्याण करें ॥ ६–७ ॥

मारेति। मातेति। उमा गौरी शं सुखं मे मह्यं दिश्याद्देयात्। कीदृशी। आदिजा जगदादिभवा। तथा मारारिः शंभुः, शक्र इन्द्रः, रामो जामदग्न्यो दाशरथिर्वा, इभमुखो गणाधिपस्तैरासाररंहसा वेगवर्षवद्वेगेनादरावेशात्सार उत्कृष्ट आरब्धः प्रकृतः स्तवः स्तुतिर्यस्या सा। तथा नित्यं सदा तेषां मारारिप्रभृतीनामर्तेः पीडाया हरणेऽपनयने क्षमा समर्था। तथा नतानां मातेव माता। वत्सलत्वात्। तथा संघट्टः समूहः। कासां श्रियामृद्धीनाम्। तथा बाधितो नाशितो भक्तानां संभ्रमो भयं यया सा तथाभूता। तथा मान्या पूज्या। अथ सीमा मर्यादा रामाणां स्त्रीणाम्। सर्वोत्तमेत्यर्थः। अनेन सदानितकेन[1] खड्ग उत्पद्यते। आद्यः श्लोकः फलरूपोऽपरो मुष्टिरूपः। 'सा' शब्दः फलान्ते तैक्ष्ण्याकारी 'दिजा' इति मुष्टेरुपरि 'मा' शब्दौ तत्र साधारणौ। अयं[2] न्यासः ॥

मारेति। मातेति। पार्वती—कैसी—आदिजा संसार से पहले ही उत्पन्न मेरा कल्याण करें। (फिर कैसी गौरी)? शंकर, इन्द्र, परशुराम अथवा दशरथ

---

1 सदानितमिति युग्मस्य मतान्तरम्।

2. सर्वेषां बन्धानां न्यासो ग्रन्थसमाप्तौ द्रष्टव्यः।

पुत्र राम (तथा) गणेश के द्वारा जोरों से प्रारम्भ की गयी सुन्दर स्तुतिवाली तथा शङ्कर आदि मनःपीडा का निरन्तर निवारण करने में सक्षम तथा नमस्कार करने वाली की माता के समान माता (स्वभाव से) वत्सल होने के कारण तथा समुदाय जिनका समृद्धियों का, तथा भक्तों के भय को नष्ट करने वाली तथा (सत्र) के द्वारा पूज्य, तथा स्त्रियों की मर्यादा अर्थात् सबसे उत्तम— (इन गुणों से युक्त पार्वती मेरा कल्याण करें)। इस (दो श्लोक वाले) सन्दानितक से खड्ग उत्पन्न होता है। प्रथम श्लोक फलरूप है और दूसरा मूठ रूप (पकडने का स्थान)। 'सा' फल के नीचे तिरछे आकार 'दिशा' मूठ के ऊपर और दोनों 'मा' शब्द (प्रथम और द्वितीय श्लोक के) उन दोनों में समान है। उसका न्यास—

अथ मुसलधनुषी—

मायाविनं महाहावा रसायातं लसद्भुजा ।
जातलीलायथासारवाचं महिपमावधीः ॥ ८ ॥ मुसलम् ॥
माममीदा शरण्या मुत्सदैवारुक्प्रदा च धीः ।
धीरा पवित्रा संत्रासात्रात् त्रासीष्ठा मातरारम ॥ ९ ॥
धनुः ॥ (युग्मम्)

अत्र मुसल और धनुर्बन्ध (का उदाहरण देते हैं)—(हे माता तुम) गर्व से आने वाले अमर्यादित बात करने वाले और कपटी महिषासुर का वध करने वाली, सुन्दर चेष्टाओं वाली, सम्पन्न विलासों वाली (जात लीला) अभय देनेवाली, सर्वदा प्रसन्न, आरोग्यदायिनी, बुद्धिस्वरूप निर्भय पवित्र मेरी रक्षा करो ॥ ८–९ ॥

मायाविनमिति। मामिति। हे मातः, सा त्वं संत्रासाद्भयान्मां त्रासीष्ठा रक्ष। आरम व्यापारान्तरान्निवर्तस्व। पश्य मामित्यर्थः। या त्वं महिषं महिषासुरमावधीर्हतवतीति संबन्धः। कीदृशं महिषम्। मायाविनं छद्मपरम्। त्वं तु महाहावा महान्हावश्चेष्टाविशेषो यस्याः सा। रसेन दर्पेणायातं महिषम्। त्वं लसद्भुजा लसन्तौ भुजौ यस्याः। तथा जातलीला संपन्नविलासा। महिषमयथासारवाचमयथासारा मर्यादोल्लङ्घिनी वाग्यस्य। तथा त्वमभियमभयं ददासीत्यभीदा। शरणे साधुः शरण्या। मुत्प्रहृष्टा। सदैव सर्वकालमरुक्प्रदा नीरोगत्वदायिनी। चः समुच्चये। धीर्बुद्धिः। तद्धेतुत्वात्। धीरा निर्भया। पवित्रा पावनी। अत्राद्यश्लोकेन मुसलम्—मध्ये तनु पार्श्वयोः स्थूलमेकत्र प्रान्ते तीक्ष्णम्।

तत्र मध्ये 'वारसा' इत्यक्षरत्रयं साधारणमन्ते 'जा' इति। द्वितीयश्लोकेन धनु—तत्राद्यमर्धं कुटिलं वंशभागे, द्वितीयं गुणाकारं 'मा' शब्दोऽधस्तनकोटिप्रान्ते, तदुपान्ते च मकारो द्विरावृत्ति, 'धी' शब्दश्च शिखारूप। न्यास' ॥

मायाविनमिति। मामिति। हे माता—' वह तुम मेरी भय से रक्षा कर—अन्य कार्यों से निवृत्त हो जा—अर्थात् मेरी ओर कृपादृष्टि करो—जिस तू ने महिषासुर की हत्या कर डाली—इस प्रकार (सा) के साथ सम्बन्ध है। कैसे महिष को? मायावी (कपटी)। तुम तो बड़ी बड़ी चेष्टाओं वाली हो—गर्व से आक्रमण करनेवाले महिष को। तुम लसद्भुजा। (शोभित भुजाओंवाली हो), तथा जातलीला (विलासों से सपन्न) हो। (फिर किस विशेषण से युक्त।) महिष को? मर्यादा का अतिक्रमण करनेवाली बात जिसको होती है। फिर तुम अभादा (अभय देनेवाली)—शरण देनेवाली, प्रसन्न, सदैव आरोग्यता देनेवाला हो। 'च' पद समुच्चय अर्थ में आया है। धी, उस (बुद्धि) का हेतु होने के कारण बुद्धि का ही नाम है धीरा—अभीत। पवित्रा—पावन करने वाली। यहाँ प्रथम श्लोक से मुसल (उत्पन्न होता है)—बीच में पतला, दोनों बगल में मोटा और एक किनारे तीक्ष्ण। उसमें मध्य का 'वारसा' यह तीन अक्षर और अन्त में जा—यह साधारण (दोनों बार पढ़ा जाने वाला) है। द्वितीय श्लोक से धनु (उत्पन्न होता है)—उसका प्रथमार्ध वक्र आकार में बाँस वाले भाग में, द्वितीयार्ध डोरा के आकार का, 'मा' शब्द नीचे किनारे पर (होगा) उसके समीप का मकार दो बार पढ़ा जायगा और 'धी' शब्द शिखारूप होगा। न्यास ॥

अथ शर'—

मानानापरुषं लोकदेवीं सद्रस सन्नम।

मनसा सादरं गत्वा सर्वदा दास्यमङ्ग ताम् ॥१०॥ शरः ॥

आगे शर (का उदाहरण देते हैं)—

हे अङ्ग! आर्द्र हृदय! दास भाव को प्राप्त होकर सदैव प्रयासपूर्वक हृदय से पूजा से शान्त हुये क्रोधवाली उस लोक-देवी को हृदय से प्रणाम कर॥१०॥शर॥

माननेति। अङ्गेति कोमलामन्त्रणे। हे सद्रस सुभक्तिभरेणार्द्रहृदय, सर्वदा सदा सादरं सप्रयत्न मनसा चेतसा तां लोकदेवीं भुवनदेवता सन्नम सम्यक्प्रणम। दासभावं गत्वाभ्युपेत्य। माननया पूजनयाऽपगता रुद् क्रोधो यस्यास्ता माननापरुषम्। सापराधेऽपि पूजया सप्रसादामित्यर्थ। अत्र प्रथमपादेन दण्ड, द्वितीयेन फलम्, तृतीयचतुर्थाभ्या वाजावटनी च। न्यासः ॥

माननेति। कोमल आमन्त्रण में अङ्ग आया है सुन्दर भक्ति से भार से आर्द्र-हृदय! प्रयासपूर्वक हृदय से सदैव उस लोक की देवीको भलीभाँति प्रणाम कर। दासभाव से (उसके) सामीप्य में पहुँचकर। (कैसी देवी को)? पूजा पाने पर जिसका क्रोध दूर हो जाता है उसको। अर्थात् पूजा से अपराध करने वाले पर भी प्रसन्न होने वाली को। इसमें प्रथम चरण से दण्ड, द्वितीय से फल और तीसरे चौथे से दोनो पक्ष और दोनो अस्नी।

अथ शूलम्—

मा मुषो राजस स्वासूंल्लोककूटेशदेवताम्।

तां शिवावाशितां सिद्धयाध्यामितां हि स्तुतां स्तुहि ॥११॥

शूलम् ॥

आगे शूल (या उदाहरण देते हैं)—हे राजसी स्वभाववाले! अपने प्राणों को मत हरो। शिव के द्वारा आमन्त्रित (शृगालियों के द्वारा कलकल की गयी, कार्य) सिद्धि से अधिष्ठित जगत् की वन्दनीया राजाओं की उस देवी को नमस्कार कर॥ ११॥

मा मुष इति। हे राजस रजोगुणयुक्त, स्वासूनात्मप्राणान्मा मुषो मा हार्षीः। ता लोककूटानां जनसमूहानामीशा राजानस्तेषां देवतां स्तुहि नुहि। कीदृशीम्। शिवेन शंभुना वाशितामाहूतां शिवाभिर्वा वाशितां कृतकलकलाम्। सिद्धया कार्यसिद्धयाध्यासितां समधिष्ठिताम्। स्तुतां जगतेति। त्रिशिखमेतेन शूलमुत्पद्यते। प्रथममर्धं दण्डभागे द्वितीयं त्वावर्तपरावर्तं शिखासु। तत्र सर्वशिखामूले 'तां' शब्दो वारपञ्चकमुच्चार्यते। शिखायामेकस्यां 'शिवा', द्वितीयायां 'सिद्धया', मध्यमायां 'स्तुहि'। न्यासः॥

मा मुष इति। हे रजोगुण से युक्त! अपने प्राणों का हरण मत करो। प्रजाओं के पालक राजाओं की उस देवताको नमस्कार कर। जिस देवता को? जिसका शंकर जी ने आह्वान किया है अथवा जो शृगालियों के द्वारा कलकल से युक्त है, जो सिद्धि कार्यसिद्धि से अधिष्ठित है और जगत् की वन्दनीया है। इस (श्लोक) से तीन शिखाओं वाला शूल उत्पन्न होता है। (श्लोक का) आद्यर्ध दण्ड भाग में और द्वितीयार्ध उलटे सीधे शिखाओं में (न्यस्त हैं)। उसमें 'ताम्' शब्द सभी शिखाओं का मूलवर्ती पाँच बार पढ़ा जाता है। एक ओर की शिखा में 'शिव' दूसरी ओर 'सिद्धया' और मध्य में स्तुति (का न्यास होगा)। (इस प्रकार इसका) न्यास (करना चाहिये)॥

अथ शक्त्यादीनि—

माहिषाख्ये रणेऽन्या नु सा नु नानेयमत्र हि ।
हिमातङ्कादिवामुं च कं कम्पिनमुपप्लुतम् ॥१२॥ शक्तिः ॥
मातङ्गानङ्गविधिनामुना पादं तमुद्यतम् ।
तङ्गयित्वा शिरस्यस्य निपात्याहन्ति रंहसा ॥१३॥ हलम् ॥
इतीक्षिता सुरैश्चक्रे या यमाममभायया ।
महिषं पातु वो गौरी सायतासिसितायसा ॥ १४ ॥
रथपदम् ॥ (विशेषकम्)

आगे शक्ति आदि (का उदाहरण देते हैं)—महिषासुर की लड़ाई में दूसरी है या वही—इस प्रकार देवताओं के द्वारा विचित्र ढंग से वहाँ देखी गयी। मानों हिम को आतङ्क के कारण निन्दनीय (कम्) काँपते हुये (कम्पिनम्) मदोन्मत्त (उपप्लुत) [दर्प के कारण] गज और चाञ्चल्य के कारण) कामदेव इस साक्षात् विधि से उस लोक-प्रसिद्ध पाद (चरण) को घुमाकर इसके शिर पर वेगपूर्वक आक्षेप करके प्रहार करती है, महिषासुर को बिना कपट किये यम को पहुँचाने वाली, विशाल तलवारों से ध्रुवरूप से विजय लाभ करने वाले राक्षसों का विनाश करने वाली, वह गौरी आप लोगों की रक्षा करे ॥ १२–१४ ॥

माहिषेति । मातङ्गेति । इतीति । सा गौरी वो युष्मान्पातु रक्षतु । या सुरैरित्थमीक्षिता सती महिषं यमामं यमगामिनं मृतममाययाच्छद्मना चक्रे कृतवती । किंभूता । आयतैर्दीर्घैरसिभिः सितो बद्ध आयोऽर्थागमो यैस्तान्दानवादीन्स्यति हिनस्ति या सा तथोक्ता । केक्षिता । माहिषाख्ये रणे महिषासुरसंबन्धिनि समरे । कथमीक्षिता । नानानेकप्रकारम् । तदेव नानात्वमाह—अन्या नु सान्विति । नुर्वितर्के । अत्र रण इयं देवी किमन्या स्यादुत सैव । भयानकत्वादनिश्चयः । तथैवंवादिभिः सुरैरीक्षिता यथामुं महिषं कं कुत्सितम् । कम्पिनं कम्पयुक्तम् । कुत इव हिमातङ्कादिव हिमभैरिव । तथोपप्लुतं मदोद्धतमाहन्ति मारयति । केनाहन्ति । अमुना प्रत्यक्षदृष्टेन मातङ्गानङ्गविधिना । सदर्पत्वाद्गजविधिना, सलीलत्वादनङ्गविधिना । किं कृत्वा । तं लोकप्रसिद्धं पादमुद्यतमुत्पाटितं तङ्गयित्वा भ्रामयित्वा । तदनन्तरं चास्य महिषस्य शिरसि रंहसा वेगेन निपात्य निक्षिप्य । इत्यादि जल्पद्भिः सुरैरीक्षिता यमामं चक्र इति संबन्धः । देवतास्तुत्या चैतदत्र सूच्यते—यथा प्रायेण चित्रस्य देवतास्तुतिर्विषयो

न सरसं काव्यमिति । अत्राद्यश्लोकेन मध्यतन्वी तीक्ष्णप्रान्ता शक्तिरुत्पद्यते । तत्र 'हिमातं' इत्यक्षरत्रयं मध्ये, 'तुसा' अधः, 'कं' उपरि । तत्र 'हि' द्विरावृत्तिः, 'मातंनुकं' एते द्विरावृत्तय । द्वितीयश्लोकेन हलम् । तत्र हलप्रविष्टेपाशल्यभागे 'त' शब्द, 'मा' तस्य पृष्ठे, 'नामु' फलतीक्ष्णाग्रे, 'गानङ्गविधि पादं तमुद्ध' वर्णा फलेऽनुलोमविलोमश्रेणिद्वयस्थाः, 'नयित्वा शिरस्यस्यां' इतीषायाम्, 'निपात्या' हलोर्ध्वभागे, हकारो हलोर्ध्वभागे कीलिकाशल्यमध्ये, हकारोर्ध्वे 'न्ति', हकाराग्रे 'रं', हकारपृष्ठे 'सा' । मारारिप्रमुखैरेभिरष्टभिः श्लोकैरष्टारं चक्रमुत्पद्यते । अत्र पूर्वार्धान्यष्टाराः अन्त्यार्धानि त्वेका नेमिः । 'मा' शब्दो नाभि सर्वसाधारणः । अर्धान्त्यश्लोकान्त्याक्षराणि च । अत्र च चक्रे स्वनामाङ्कभूतोऽयं श्लोकः कविनान्तर्भावितो यथा—

'शतानन्दापराख्येन भट्टवामुकसूनुना ।
साधितं रुद्रटेनेदं सामाजा धीमता हितम् ॥'

महिषेति । मातङ्गेति । इतीति । (इन विशेषणों से युक्त) वह गौरी आप लोगों की रक्षा करें—देवताओं के द्वारा इस प्रकार देखी गयी जिसने यमराज को पहुँचने वाले महिष को बिना किसी प्रकार का छल किये मार डाला; क्या होकर—धर्षन हो चुका । कहाँ देखी गयी ? महिषासुर से होनेवाली लड़ाई में । किस प्रकार देखी गयी ? अनेक प्रकार से (अनेक रूपों में) । उसी अनेकरूपता का वर्णन करते हैं—अन्या नु सा न्विति । 'नु' वितर्क के लिये आया है । यहाँ रण में यह देवी वही है अथवा कोई दूसरी है, (रूप के) भयङ्कर होने के कारण निश्चय नहीं हो रहा है । तथा इस प्रकार कहने वाले देवों के द्वारा देखी गयी, जैसे इस कुत्सित (कम्) महिष को, जो काँप रहा है—क्यों !—मानो हिम (पाले) के भय के कारण तथा मद (गर्व) के कारण उद्धत महिष को मारती है । किस साधन से मारती है ! इस साक्षात् देखे गये मातङ्गानङ्गविधि से (गर्व होने के कारण (यह देवी) गज की गति से और चञ्चल होने के कारण कामदेव की विधि से । क्या करके (मारती है)—उस लोकप्रसिद्ध पाद (चरण) को घुमाकर फिर इस महिष के शिर पर वेगपूर्वक प्रहार करके—इस प्रकार कहने वाले देवताओं के द्वारा देखी गयी (देवी ने) (महिष को) यमलोक पहुँचा दिया—इस प्रकार सम्बन्ध जोड़ना चाहिए । देवता की स्तुति से यह सूचित होता है कि प्रायः चित्र का विषय देव-स्तुति है सरस काव्य नहीं । यहाँ प्रथम श्लोक से बीच में पतली, और तिरछे प्रान्त भाग वाली शक्ति उत्पन्न होती है । उनमें 'हिमातम्' यह तीन अक्षर बीच में, 'तुसा' नीचे और 'कम्'

ऊपर होगा। उनमें 'दि' का दो बार पाठ होगा, 'मात' 'नु' और 'कम्' भी दो बार पढे जायेंगे। दूसरे श्लोक से हल उत्पन्न होता है। इसमें हल में घुसे हुये इषा (हर्षि) के शल्य भाग में 'सम्' शब्द, उसके पीछे 'मा' शब्द'। फल के तीक्ष्ण अग्र भाग में 'नामु', 'मानन्दविध' (और) 'पाद तमुन्न' वर्ण फल के अनुलोम और विलोम दोनों श्रेणियों में, 'नवित्वा विरस्यस्य' इषा (हर्षि) में, 'निपात्या' हल के ऊपरी भाग में, कीलिका के शल्य के बीच हल के ऊपरी भाग में हकार, हकार के ऊपर 'न्ति', हकार के आगे 'र' और हकार के पीछे 'सा' (अक्षर का न्यास होगा)। मारारि आदि आठ श्लोकों से आठ अरों वाला चक्र उत्पन्न होता है। इनमें पूर्वार्ध आठ अर है और अन्त्यार्ध एक नेमि। नामियता मा शब्द सर्वसाधारण होगा। अर्धान्त्यश्लोक के अन्त्याक्षर भी सर्वसाधारण हैं। इन्हीं (आठ श्लोकों) में कवि ने अपने नाम का चिह्नभूत यह श्लोक भी अन्तर्भावित कर दिया है जैसे—"साम के अनुयायी, शतानन्द जिनका दूसरा नाम है (उस) भट्टवामुक के पुत्र 'रुद्रट' ने विद्वानों के इस हित को सिद्ध कर दिया॥'

अस्यार्थ.—वामुकाख्यभट्टसुतेन शतानन्द इत्यपरनाम्ना रुद्रटेन कविना साधितं निष्पादितमिदं चक्र काव्यं वा। कीदृशेन। साम गीतिविशेपमजति प्राप्नोतीति सामाक्, तेन सामाजा। सामवेदपाठकेनेत्यर्थः। तच्च धीमतां बुद्धिमतां हितमुपकारकम्। न्यास। तृतीयश्लोकेन रथपदानि पूर्यन्ते। रथपदन्यायेन युक्पादयोरावृत्तिनिवृत्तिभ्यां पाठ॥

इसका अर्थ है—वामुक-नामधारी ब्राह्मणपुत्र (भट्ट-सुत) शतानन्द दूसरे नाम वाले कवि रुद्रट ने इस चक्र (बन्ध) अथवा काव्य की रचना की है। (किन विशेषणों से युक्त)—सामाजा—साम (गीति विशेष) को जानने वाले, अर्थात् सामवेद के पाठक। वह (चक्रबन्ध या काव्य) बुद्धिमानों का उपकारक है। तीसरे श्लोक से रथ के (चार) पद पूर्ण होते हैं। रथपद के न्यास से द्वितीय और चतुर्थ पाद का आवृत्ति और निवृत्ति के द्वारा पाठ (रथपद-पाठ) है। (जिस प्रकार रथ के पहिये को आगे या पीछे खींचने पर गति में कोई अन्तर नहीं होता है उसी प्रकार श्लोक के द्वितीय और चतुर्थ पाद का आवृत्ति और निवृत्ति के द्वारा पाठ करने पर (पादों में) कोई अन्तर नहीं होता॥

अथ तुरगपदपाठ —

सेना लीलीलीना नाली लीनाना नानालीलीली।
नालीनालीले नालीना लीलीली नानानानाली॥ १५॥

आगे तुरग पद पाठ (का उदाहरण देते हैं)—(कोई) सत्यभाषी (नाली) जिसके सैनिक गाड़ियों पर सवार है तथा जिसके सेवक नाना प्रकार की सटी हुयी कतारों के मनुष्यों को बुलाते हैं, पंक्तियों का अनर्थ न करने वाला, अधीनस्थ प्राणियों के पालक राजाओं वाला, विविध प्रकारके मनुष्यों से युक्त, बुद्धिमान (उस) पुरुष ने आश्लिष्ट लीलाओं वाले नायकों की सेनाओं को प्रसन्न कर दिया ॥ १५ ॥

सेनेति । तत्र—सेना, लीलीलीनाः, न, आली, लीनानाः, नानालीलीली, न, आलीनाली, ईले, ना, आलीनाः, लीलीली, नानाना, अनाली इति पदानि । पदार्थस्त्वयं यथा—कश्चिद्वक्ति—अहं ना पुरुषः सेना. पृतना ईले स्तौमि । 'ईड स्तुतौ' । वर्तमानायां ए । सेनाः स्तौम्यहमिति संबन्ध' । यद्वा परोक्षाया 'ईले' इति रूपम् । बहुलत्वादाम्प्रत्ययाभावः । ततः कश्चिन्ना सेना ईले । तुष्टावेत्यर्थः । कीदृशोः सेनाः । लीला विद्यते येषां लीलिनस्तैरीत्येवंशीलो लीलीली स इन' स्वामी यासां ता लीलीलीनाः । ना कीदृशः । आलमनर्थोऽसत्यं वा विद्यते यस्य स आली एवंविधो न । तथा लीनानि सबद्धान्यनांसि शकटानि शकटारूढा वा जना यस्य स लीनानाः । तथा नानाप्रकारा आल्य. पङ्क्तयो नानाल्यस्तासां लीः श्लेषस्तां लान्ति गृह्णन्ति ये ते नानालीलीलाः पुरुषा विद्यन्ते यस्य स नानालीलीली । व्यूहाश्रितनरनायक इत्यर्थः । तथा आलीनानामाश्रितानां आली अनर्थकर. आलीनाली एवंविधो न । सेवकानुकूल इत्यर्थः । कीदृशीः सेनाः । आलीना आश्लिष्टा । ना कीदृशः । लीलिनी लीलावती सुखितत्वात्प्राणिनामिला भूर्येषां ते लीलीला नृपास्ते यस्य सन्ति स लीलीली । तथा नानाप्रकारो ना मनुष्यो यस्य स नानाना । तथा आली मूर्ख उच्यते । आलमस्यास्तीति वा न आली अनाली । प्राज्ञ इत्यर्थः । अत्र तुरगपदपरिज्ञानाय श्लोको यथा—'कशझेनागभटाय तथखेवेन्नराघवे. । पजेथाढेपचेमेठे दोणसच्छलडेपडे ॥' अमुं श्लोकं 'सेनाली' इत्यादिप्रस्तुतश्लोकोपरिभागे यथाक्रमाक्षरं लिखित्वा ततः एतच्छ्लोकगतमातृकापठितकादिवर्णक्रमानुमिततुरगपदक्रमेण प्रस्तुत' श्लोक उच्चेय इति ॥

सेनेति । इसमें—सेना, लीलीलीना; न, आली, लीनानाः, नानालीलीली, न, आलीनाली, ईले, ना, आलीना', लीलीली, नानाना, अनाली-ये पद हैं । पदों का अर्थ इस प्रकार है—कोई कह रहा है मैं पुरुष सेनाओं की वन्दना करता हूँ । 'ईड' धातु स्तुति के अर्थ मे प्रयोग की जाती है । वर्तमान काल में (एकार) है । अथवा 'ईले' यह रूप परोक्ष (काल) में है । 'आम्' प्रत्यय का प्रयोग विकल्प के कारण नहीं किया गया । अर्थात् संतुष्ट किया । कैसी

सेनाओं को ! (नाना प्रकार की) लीला करने वाले नायकों वाली । मनुष्य किस प्रकार का ? माली (असत्य भाषण न करने वाला) तथा जिसके सेवक गाड़ियों पर सवार हैं तथा जिसके पुरुष अनेक प्रकार की कतारों में सटे हुए हैं (अर्थात् जो व्यूह में लगाये गये मनुष्यों का नायक है) (फिर किस विशेषण से युक्त) पंक्तियों का अनर्थ न करने वाला अर्थात् सेवकों का हितैषी । सेनायें कैसी ? आश्लिष्ट । मनुष्य किस प्रकार का ? लीलिनी (प्राणियों के लिये सुखकारी होने के कारण लीलावती भूमि वाले राजाओं वाला) तथा विविध प्रकार के मनुष्यों वाला तथा अनाली (मूर्ख आली कहा जाता है—जो आली नहीं है वह हुआ अनाली—अर्थात् बुद्धिमान्)।

अथ गजपद्पाठमाह—

ये नानाधीनावा धीरा नाधीवा राधीरा राजन् ।
किं नानाशं नाकं शं ते नाशङ्कन्तेऽशं ते तेजः ॥ १६ ॥

आगे गजपदपाठ का उदाहरण देते हैं—जो नानाप्रकार के मनःक्लेशों से युक्त स्वामी की रक्षा करने वाले, पराक्रमी, दुर्बुद्धि को न प्राप्त होने वाले (और) हिंसकों को नष्ट करने वाले हैं वे नानाप्रकार की इच्छाओं के पूरक (तुम्हारे भृत्य) क्या स्वर्गीय सुख की कामना करते हैं ? (अर्थात् अवश्य करते हैं) । (इसके अतिरिक्त) तुम्हारा तेज दुःख रूप है ऐसी शङ्का नहीं करते हैं ॥ १६ ॥

य इति । अत्र—ये, नानाधीनावा., धीराः, न, अधीवाः, राधीरा., राजन्, किं, नानाश, नाकं, शं, ते, न, आशङ्कन्ते, अश, ते, तेजः, इति पदानि । पदार्थस्त्वेवम्—यथा कश्चिद्राज्ञः कस्यापि सेवकानभिनन्दति—हे राजन्, ये तदीयभृत्या एवंगुणयुक्तास्ते किं नाकस्येदं नाकं स्वर्गसक्तं शं शिवं सुखमाशङ्कन्ते । नव उत्तरत्र संबन्धः । किंशब्दकाक्वावश्यं तेषां स्वर्गसुखं भवतीत्यर्थः । कीदृशा ये । नानाविधा आधयो यस्य स नानाधिः स चासाविनश्च प्रभुस्तमवन्ति विनाशात्रक्षन्तीति नानाधीनावा. तथा धीराः सत्त्वयुक्ता । तथा दुष्टा धीर्बुद्धिरधीस्तां वान्ति गच्छन्त्याश्रयन्त्यधीवा एवंविधा न । तथा 'राधी हिंसायाम्' । राधिनो हिंसकास्तानीरयन्तीति राधीरा । शं कीदृशम् । नानाविधा आशाः सुखाभिलापा यत्र तन्नानाशम् । किंच ते तव सबन्धि यत्तेजस्तदशं दुःखरूपमित्येवं नाशङ्कन्ते । प्रभुतेजोऽस्माकं नाशायेति चेतसि नैव कुर्वन्तीत्यर्थः । अत्र गजपदन्यायेन श्लोक उत्पद्यते । स च श्लोकगतप्रथमनवमद्वितीयदशमतृतीयैकादशचतुर्थद्वादशादिक्रमेण उच्चेय इति ॥

य इति। इस (श्लोक) में—ये, नानाधीनावाः, धीराः, न, अधीवाः, राधीराः, राजन्, किं, नानाशं, नाकं, शं, ते, न, आशङ्कन्ते, अश, ते, तेजः,—ये पद हैं। पदों का अर्थ इस प्रकार है—कोई किसी राजा के सेवकों की प्रशंसा कर रहा है—हे राजन्! जो तुम्हारे सेवक इन गुणों से युक्त हैं वे क्या स्वर्गीय सुख की कामना करते हैं। नञ् का उत्तरवर्ती वाक्य के साथ अन्वय होगा (ते तेज' अश नाशङ्कन्ते)।

'किं' शब्द में काकु से से यह द्योतित होता है कि उन्हें अवश्य ही स्वर्गीय सुख होता है। वे किन (विशेषणों) से युक्त हैं—नानाप्रकार की मन.पीडाओं वाले स्वामियों की रक्षा करने वाले, धीर (पराक्रमी) तथा अधीवा (दुर्बुद्धि को न प्राप्त होने वाले) तथा राधीर (हिंसकों का निवारण करने वाले)। कैसे सुख को—नानाप्रकार की आशाओं से युक्त। इसके अतिरिक्त तुम्हारे तेज को अपने लिये दु'ख रूप नहीं समझते हैं अर्थात् स्वामी का तेज हमारे नाश के लिये है ऐसा हृदय में नहीं करते हैं। यहाँ गजपदन्याय से श्लोक उत्पन्न होता है, उसका प्रथम और नवें, द्वितीय और दसवें, तृतीय और ग्यारहवें, चतुर्थ और बारहवें-इस क्रम से उच्चारण करना चाहिए॥ (पूर्वार्ध में प्रथम और नवम आदि क्रम से उच्चारण करने पर जो श्लोक बनता है वह प्रथम-द्वितीय आदि अक्षरों के क्रम से पढे गये श्लोक के ही सदृश होता है। इसी प्रकार उत्तरार्ध में भी समझना चाहिए)।

अथ प्रतिलोमानुलोमपाठं स्रग्धरावृत्तमाह—

वेदापन्ने स शक्ले रचितनिजरुगुच्छेदयत्नेऽरमेरे
देवासक्तेऽमुदक्षो वलदमनयदस्तोदद्दुर्गासवासे।
सेवासर्गादुदस्तो दयनमदलवक्षोदमुक्ते सवादे
रेमे रत्नेऽयदच्छे गुरुजनितचिरक्लेशसन्नेऽपदावे॥१७॥

आगे स्रग्धरा वृत्त में प्रतिलोमानुलोम पाठ का उदाहरण देते हैं—

वेद-पारङ्गत (वेदापन्ने) प्रियभाषी, (शक्ले) अपनी राग-द्वेषात्मक प्रवृत्तियों की पीडा निवारण करने वाले (अरमेरे) देवप्रिय, कष्टों के दुर्गों के समान दुर्गभूत शत्रुओं को आहत करने की भूमि, दानशीलता एव अहंकार की कणिकामात्र से अस्पृष्ट (दयनमदलवक्षोदमुक्ते) प्रमाण शास्त्र के जानने वाले, विशुद्ध-बुद्धि (अयदच्छे) गुरुसेवा के चिरश्रम से श्रान्त उपताप रहित (अपदावे) नरश्रेष्ठ में (रत्ने) ऐसा कोई जितेन्द्रिय (अमुदक्षः) शक्ति, उपशम और नीति को जानने वाला परोपकार से निवृत्त होकर सन्तुष्ट हो गया॥ १७॥

वेदापन्न इति । स कश्चिद्गुणिप्रियो रत्ने गुणवति जने रेमे ननन्द । 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते'। वेदानापन्नो वेदापन्नस्तत्र । अधीतवेद इत्यर्थः । तथा मन्ले प्रियंवदे । तथा रचितः कृतो निजाया रागद्वेषात्मिकाया रुजो बाधाया उच्छेद उन्मूलने यत्नो येन तस्मिन् चितनिजरुगुच्छेदयत्ने । तथा न रमन्ते सुजनेषु धर्मे वा ये ते अरमा दुर्जनास्तानीरयति यस्तस्मिन्नरमेरे । तथा देवेष्वासक्तो देवासक्तस्तस्मिन् देवासक्ते । देवपूजोद्यत इत्यर्थः । स कीदृशः । न मोदन्ते प्रमोद यान्तीत्यमुन्दि अक्षाणीन्द्रियाणि यस्य सोऽमुदक्षो जितेन्द्रिय । तथा बलदमनयदः शक्त्युपशमनीतिदाता । रत्ने कीदृशे । तोदस्य व्यथाया दुर्गा इव दुर्गाः परानभिभूतास्तानप्यस्यन्ति क्षिपन्तीति तोददुर्गासास्तेषां वासे निलये । शूराणामपि शूरा यमाश्रिता इत्यर्थ । स कीदृश । सेवाया परपणतौ सर्गं उत्साहस्तत उदस्तो निवृत्तः । स्वाधीन इत्यर्थः । रत्ने कीदृशे । दयनं दानं रक्षा वा तेन यो मदलवो गर्वकणिका तेन य क्षोदः परिकथनं तेन मुक्ते रहिते । प्रियं कृत्वाप्यगर्विन इत्यर्थः । यद्वा अदयनेन निर्दयत्वेन मदलवेन गर्वलेशेन क्षोदेन हिंसया च मुक्ते । तथा सह वादेन वर्तते सवादस्तस्मिन् । प्रमाणशास्त्रज्ञ इत्यर्थ । तथा अयन्नगच्छन्नच्छो नैर्मल्यं यस्य तत्रायदच्छे । शुद्धिमतीत्यर्थः । तथा । गुरुभिः पूज्यैर्जनितो यश्चिरं क्लेशः शुश्रूषाश्रमस्तेनैव सन्ने श्रान्ते । न त्वन्येन । तत्र वा सन्ने सक्ते । तथा अपदान्पदभ्रष्टानवतीत्यपदाव । यदि वापगतो दाव उपतापो यस्य तस्मिन्निति । यथैवाय श्लोकः क्रमेण पठ्यते, एव व्यतिक्रमेणापीति प्रतिलोमानुलोम' ॥

वेदापन्न इति । किसी गुणवान् के प्रेमी मनुष्य की किसी गुणी मनुष्य में आस्था हो गयी । प्रत्येक जाति में जो उत्तम होता है उसे रत्न कहते हैं । वेदों को जानने वाला वेदज्ञ—उनमें । अर्थात् वेदाध्येता । तथा प्रियभाषी में—तथा अपनी राग-द्वेषात्मक पीड़ा के उन्मूलन में प्रयत्न कर चुके हुये व्यक्ति में—तथा अरमा (सज्जनों या धर्म में आस्था न रखने वाले) का निवारण करने वाले—तथा देवताओं में आस्था रखने वाले । (मनुष्य में) । वह (गुणिप्रिय) कैसा है ?—अमुदक्ष (सुखों में लालसा न रखने वाली इन्द्रियों वाला—जितेन्द्रिय) तथा शक्ति, उपशम और नीति देने वाला, किस प्रकार के रत्न में (गुणी में) ? तोददुर्गासवास (कष्टों के दुर्गरूपी दूसरों से अपराजित दुर्ग को आहत करने की भूमि—अर्थात् वीरों के भी वीर के आश्रय (रत्न में) । वह किस प्रकार है—सेवा के उत्साह से पराङ्मुख, अर्थात् स्वतन्त्र । (फिर) कैसे रत्न में ?—

दान अथवा रक्षा के गर्व की कणिकामात्र की डींग से रहित—अर्थात् हित कर देने पर भी गर्व न करने वाला। अथवा निर्दयता, गर्व के लेश और हिंसा से शून्य। तथा सवाद में (वाद से युक्त में, अर्थात् प्रमाणशास्त्र के जानने वाले (रत्न में)। तथा अयदच्छ (स्थिर पावित्र्य से युक्त) में। अर्थात् शुद्धि से युक्त में। तथा पूज्य-जन की सेवा से उत्पन्न चिरक्लेश से थके हुये, अन्य (क्लेश से) नहीं। अथवा उस (पूज्य वर्ग) में आसक्त तथा अपदाव में (पद से च्युत हुये लोगों की रक्षा करने वाले में अथवा दूर हुये संताप वाले में)। जिस प्रकार यह श्लोक क्रम से पढा जाता है उसी प्रकार व्यतिक्रम (उलटे क्रम) से भी—इस प्रकार यह प्रतिलोमानुलोम पाठ का उदाहरण हुआ॥

अथार्धभ्रममाह—

सरसायारिवीरालीरसनव्याध्यदेऽगमत्।
सा नः पायादरं देवी याव्यायागमदध्वरि॥ १८॥

आगे अर्धभ्रम का उदाहरण देते हैं—

क्रोधपूर्वक रणक्षेत्र में उतरने वाली, शत्रुओं की पंक्तियों को मारकर भक्तों को मानसिक पीडा का निवारण करने वाली, सर्वशक्तिशालिनी वह देवी, जो शत्रुओं को दबाकर सदैव लाभ प्राप्त करने वाली है वह हमारी शीघ्र ही रक्षा करे॥ १८॥

सरसेति। सा ईश्वरा देवी गौरी नोऽस्मानरं शीघ्रं पायादव्यात्। या अगमद्गता। कथम्। अध्वरि रिपूनधिकृत्य। कीदृश्यगमत्। अव्याया विगत आयोऽर्थागमो यस्याः सा व्याया, न व्याया अव्याया। सलाभे-त्यर्थः। तथा अयनमायः, सरस. सरोष आयो रणे गमनं यस्याः सा सरसाया, सा चासावरिवीराली च शत्रुसुभटपङ्क्तिस्तस्या रसनेनास्वा-दनेन हिंसया विशेषेण भक्तानामाधीर्मनोदुःसान्यपि नाशयतीति सर-सायारिवीरालीरसनव्याध्यदा। यदि वा सरसाया अरिवीराल्या रसेन भावेन नव्या स्तुत्या। आध्यदा दुःसनाशिका। अर्धभ्रमणादर्धभ्रमो-ऽयम्। न तु सर्वतोभद्रवत्सर्वत्र भ्राम्यति। न्यास.॥

सरसेति। यह देवी गौरी हमारी शीघ्र ही रक्षा करे—जो चली गयी—किस प्रकार! शत्रुओं को दबाकर। कैसी (देवी) चली गयी?—अव्याया—(अर्थलाभ के आगमन से रहित न रहने वाली) अर्थात् लाभ पाने वाली; तथा सरसाया—(क्रोधपूर्वक रण में उतरने वाली) वह और अरिवीरालीरसनव्याध्यदा (शत्रु-सैनिकों को मार कर भक्तों की मन.पीडा को नष्ट करने वाली)। अथवा सरस

शत्रुपङ्क्तियों के रस से (भाव से) नवीन वन्दनीय। आध्यदा—दुःख नष्ट करने वाली। अर्ध भ्रमण के कारण अर्धभ्रम नामकरण हुआ है। न कि सर्वतोभद्र की तरह सर्वत्र भ्रमण करता है। इस प्रकार इसका न्यास हुआ॥

अथ मुरजबन्ध.—

सरलाबहलारम्भतरलालिबलारवा ।

वारलाबहलामन्दकरला बहलामला ॥ १९ ॥

आगे मुरजबन्ध का उदाहरण देते हैं—

(यह शरद्) दीर्घ एवं प्रभूत आरम्भ के कारण चञ्चल भ्रमरावलियों के गुञ्जार से सघन हंसिनियों से व्याप्त, राजाओं को उद्यम में लगाने वाली (तथा) प्रचुर आमलकी फलों वाली है ॥ १९ ॥

सरलेति। सर्वभाषाभिरमागधिकाभिः शरद्वर्णने श्लोकोऽयम्। तत्र कीदृशी शरद्वर्तते। सरलो दीर्घ आ समन्ताद्बहलेन प्रभूतेनारम्भेण तरलाना चञ्चलानामलिबलानां भ्रमरसैन्यानामारव शब्दो यस्या सा सरलाबहलारम्भतरलालिबलारवा। तथा वारलाभिर्हंसीभिर्बहला संतता। यदि वा वारेण परिपाट्या लावो लवनं येषां तानि तथाविधानि हलानि हलकृष्टधान्यक्षेत्राणि यस्यां सा तथाविधा। तथा करं लान्ति गृह्णन्ति ये ते करला नृपाः। अमन्दा यात्राया सोद्यमाः करला यस्या सा तथाविधा। तथा बहलानि प्रभूतान्यामलान्यामलकीफलानि यस्यां सा तथाविधा। यदि वा बहलमत्यर्थममला निर्मला बहलामला। अत्र मुरजत्रयमर्धमुरजौ चान्ते भवतः। न्यासः॥

सरलेति। यह श्लोक मागधी को छोडकर शरद्वर्णन में सभी भाषाओं में है। वह शरद् कैसी है?—सरलाबहलारम्भतरलालिबलारवा (लम्बे एवं अत्यधिक समारोह के साथ भ्रमर-पङ्क्तियों की गुञ्जार से युक्त) तथा हंसिनियों से व्याप्त। अथवा क्रम से लुनाई किये गये हल से जुते हुये धान के खेतों वाली। तथा अमन्दकरला (करला—करग्रहण करने वाले राजा, अमन्द—उद्यमी)। तथा अत्यधिक आमलकी फलों वाली अथवा अत्यन्त निर्मल।

अथ सर्वतोभद्रमाह—

रसा साररसा मार सायताक्ष क्षतायसा ।

सातावात तवातासा रक्षतस्त्वस्त्वतक्षर ॥ २० ॥

आगे सर्वतो भद्र का उदाहरण देते हैं—

हे पुष्टि देने वाले (अतक्षर) उद्यमशील (अत) सुख की रक्षा करने वाले उत्तम (राजन्!) वह (मधुर आदि) सुन्दर रसों वाली, दमन कर दिये गये

चोर आदि दुष्टों वाली, पालन की जाती हुयी तुम्हारी यह पृथ्वी (राज्य) अक्षय हो ॥ २० ॥

रसेति । कश्चिद्राजानमाह—हे सार उत्कृष्ट, तव रक्षतः पालयतः सतः सा रसा पृथ्वी साररसा उत्कृष्टरसास्तु भवतु । हे आयताक्ष दीर्घलोचन, तथा सा क्षतायसा चास्तु । क्षतो नाशित आयोऽर्थागमो यैस्ते क्षतायाश्चौ-रादयस्तान्स्यत्यन्तं नयतीति कृत्वा । तथा सातं सुखमवतीति सातावा । श्रेयस्करीत्यर्थः । अस्त्विति सर्वत्र योज्यम् । हे अत । अततिं नित्यमेवोद्यमं भजत इत्यर्थः । तथा अतासा अक्षया रसा । भवत्वित्यत्रापि योगः । तुर्नियमे । रक्षस एव, न त्ववलिप्तस्य । तथा हे अतक्षर तक्षण तक्षस्तनू-करणं तं राति ददातीति तक्षरः, न तक्षरोऽतक्षरः । पुष्टिद इत्यर्थः । चतुर्दिशं वाच्यत्वात्सर्वतोभद्रोऽयं श्लोकः ॥

रसेति । कोई राजा से कह रहा है—हे उत्तम (प्रकृति वाले) तुम्हारे पालन करते हुये पृथिवी मधुर रसों वाली हो । हे विशाल लोचन इसके अति-रिक्त वह क्षतायसा—अर्थ के आगमन को नष्ट करने वाले चोर आदि से सर्वथा शून्य—हो । तथा सातावा—सुख की रक्षा करने वाली अर्थात् श्रेयस्करी हो । हो का योग सभी वाक्यों में करना चाहिए । हे अत (निरन्तर उद्यम करने वाले) । तथा अतासा—नष्ट न होने वाली पृथ्वी । 'हो' का यहाँ भी योग है । 'तु' नियम के अर्थ में आया है । पालन करने वाले तुम्हारी न कि अवलिप्त (राग आदि में आसक्त)। चारों दिशाओं से पाठ्य होने के कारण—यह श्लोक सर्वतोभद्र है।

आदिग्रहणसगृहीतं पद्माद्युदाहरणमाह—
(कारिका में) आदि के ग्रहण से संगृहीत पद्म आदि का उदाहरण देते हैं—

या पात्यपायपतितानवतारिताया
यातारितावपति वाग्भुवनानि माया ।
यामानिना वपतु वो वसु सा स्वगेया
यागे स्वसासुररिपोर्जयपात्यपाया ॥ २१ ॥

जो देवी (वाणी स्वरूप होने के कारण) यज्ञ में अपने द्वारा ही स्तुत्य है, विष्णु की बहन है, (भक्तों के) उत्कर्ष की रक्षा करती है, (जो) विपत्तियों को पार कर गयी है, (अत्यपाया) जो आपत्ति में पड़े हुये प्राणियों की रक्षा करती है (तत्त्वतः जिसका बोध न होने के कारण) जो माया स्वरूप है वह स्वामिनी (गौरी) आठों प्रहर आप लोगों को धन प्राप्त कराये ॥ २१ ॥

येति । सा इना स्वामिनी गौरी वो युष्मभ्यं यामानष्टावपि प्रहरान्नित्यं वसु धनं वपतु जनयतु । या अपायपतितानापद्गतान्प्राणिनः पाति रक्ष-

वीति। किंभूता सती। अवतारित. प्रापित आयोऽर्थागमो यया सावतारिताया। तथा याता निवृत्तारिता शत्रुभावो यस्यां सा यातारिता। निर्मत्सरेत्यर्थ। या तथा वाक् वचनरूपा सती भुवनानि जगन्त्यावपति व्याप्नोति। या च तत्त्वतो ज्ञातुमशक्यत्वान्मायेव माया। या च यागे यज्ञे स्वेनात्मनैव गेया स्तुत्या। वाग्रूपत्वात्तस्याः। तथा या चासुरारिपोर्विष्णोः स्वसा भगिनी। या च जय सर्वोत्कर्षवर्तनं भक्तानां पाति रक्षतीति जयपा। तथातिक्रान्ता अपाया अनर्था यया सात्यपाया। निरापदेत्यर्थ। इदमष्टदलं पद्ममिति पूर्वे भणन्ति तत्र सम्यग्बुध्यते। चतुर्दलं तु बुध्यते। यथा 'या' शब्दोऽत्र कर्णिका अष्टवारान्परावर्त्यते। दलानि द्वादशाक्षराणि। तत्र पार्श्ववर्तिनश्चत्वारश्चत्वारो वर्णा दलसंधिगतत्वाद् द्विरावर्त्यन्ते॥

येति। वह स्वामिनी गौरी आप लोगों को आठों प्रहर धन प्रदान कराये। जो आपत्ति में पड़े हुए प्राणियों की रक्षा करती है। क्या होकर १—अवतारिताया—अर्थ के आगम को प्राप्त होकर, यातारिता—शत्रु भाव से वञ्चित होकर या द्वेष शून्य होकर, तथा जो वाणी वचनरूप होकर संसार को व्याप्त करती है, जो तत्त्वत. बोध का विषय न होने के कारण माया रूप है और जो यज्ञ में अपने द्वारा ही स्तुत्य है, (उसके वाक् (वाणी) रूप होने के कारण), तथा और जो विष्णु का बहन है, जो जयपा—भक्तों की सर्वत. उन्नति की रक्षा करने वाली—है, तथा अत्यपाया—अनर्थों से रहित अर्थात् आपत्तियों से असृष्ट—है। इसे पूर्ववर्ती विचारकों ने आठ दलों वाला पद्म कहा है—(किन्तु) यह बात समझ में नहीं आती है। चार दल तो समझ में आते हैं, जैसे—या शब्द इसमें कर्णिका (स्थानीय) आठ बार पढ़ा जाता है। (चारों दल) बारह बारह अक्षर के होंगे। उसमें समीप में न्यस्त चार चार वर्ण दलों की संधियों पर स्थित होने के कारण दो दो बार पढ़े जायेंगे॥

अथानुलोमविलोमविपर्यस्ताक्षरपाठेन श्लोकाच्छ्लोकान्तरोत्पत्तिमाह। तत्राद्यः श्लोकः—

> समरणमहितोपायास्तनामारिपाता
> वनगतिसरमाया वानगा मापसारम्।
> अमरततवरालीमानभासाद्य नेद्
> रणमहिमतलाशा वीरभावेऽसिराते॥ २२॥

आगे अनुलोम, विलोम और विपर्यस्ताक्षर पाठ से श्लोक से अन्य श्लोक की उत्पत्ति का उदाहरण देते हैं। उसमें प्रथम श्लोक—

सभी युद्धों में पूजित उपाय वालों से युक्त की हिंसा कर देने वाले, आक्रमण करने वाले और नमस्कार न करने वाले शत्रुओं का विनाश करने वाले (यास्त-नामारिपाता) मुनियों के पास जाने वाले राक्षसों को मार डालने वाले (वनरतिसरमाया), (अपने) युद्ध की महिमा से दिशाओं को व्याप्त करने वाले वानर, देवों के द्वारा उपहार किये गये वरदानों के कारण मान को प्राप्त होकर तलवार के कारण (अपने में उत्पन्न) धैर्य में अनवरत (मापसारम्) गान करने लगे॥२२॥

समरणेति । सुग्रीवाङ्गदप्रभृतयोऽत्र वानरा वर्ण्यन्ते—वानरा नेदु । जगदुरित्यर्थ । कीदृशा । समौ तुल्यौ रणमहौ संग्रामोत्सवौ येषां ते समरणमहा इन्द्रजित्प्रभृतयस्ते विद्यन्ते येषां ते समरणमहिनो रावणादयस्तांस्तुपन्ति हिंसन्ति ये ते समरणमहितोपा । तथा यान्ति गच्छन्तीति या अभियोगिनः, अस्तः परित्यक्तो नामो नतिर्यैस्तेऽस्तनामा, याश्च तेऽस्तनामाश्च ते च तेऽरयश्च शत्रवश्च तान्पातयन्ति नाशयन्तीति यास्तनामारिपाताः । यदि वा समशब्दः सर्वनामसु । ततः समरणेषु सर्वसमरेषु महितः पूजित उपायो येषां ते च तेऽस्तनामारिपाताश्चेति समासः । तथा वने रतिर्येषां ते वनरतयो मुनयस्तान्सरन्ति जिघांसयाभिगच्छन्तीति वनरतिसरा राक्षसादयस्तान्मीनन्तीति कर्मण्यणि वनरतिसरमायाः । कथं नेदुः । मापसारम् । मा प्रतिषेधे ततश्चाविद्यमानोऽपसारश्छेदो यत्र कर्मणि तन्मापसारम् । किं कृत्वा नेदुः । अमरैर्देवैस्तता विस्तारिता दत्ता या वराली वरपरम्परा तया मानं पूजा गर्वं वासाद्य प्राप्य । तथा रणमहिम्ना युद्धमाहात्म्येन तता व्याप्ता आशा दिशो यैस्ते तथोक्ताः । कदा नेदु । धीरभावे धैर्येऽसिना खड्गेन राते दत्ते सति ॥

समरणेति । यहाँ सुग्रीव, अङ्गद आदि वानरों का वर्णन किया जा रहा है—वानरा नेदुः । अर्थात् गान करने लगे । कैसे (वानर) ?—(समरणमहितोपाः)—युद्ध में समान पराक्रम वाले मेघनाद आदि से युक्त रावण आदि की हिंसा करने वाले, (याः)—आक्रामक, (अस्तनामारिपात)—नमस्कार न करने वाले शत्रुओं का विनाश कर देने वाले । अथवा सम शब्द सर्वनाम है । इस प्रकार सभी युद्धों में पूजित उपायवाले (समरणमहितोपाया) और नमस्कार न करने वाले शत्रुओं का विनाश करने वाले (अस्तनामारिपाता)—इस प्रकार समास करना चाहिए । फिर कैसे (वानर) वन्य जीवन में अभिनिवेश रखने वाले मुनियों को मारने की इच्छा से विचरण करने वाले राक्षसों को मार डालने वाले (वनरतिसरमायाः) में कर्म (उपपद) रहते 'मीन' धातु के आगे अण् प्रत्यय आया है । मापसारम्—प्रतिषेध (मा) से शून्य क्रिया वाला । क्यों गाने

लगे !—देवों के द्वारा दी गयी वरपरम्परा के घमण्ड में आकर। तथा (फिर कैसे वानर) युद्ध की कीर्ति से दिशाओं को व्याप्त करने वाले। कब गाया—तलवार के द्वारा धीर भाव दे दिये जाने पर।

अस्माच्छ्लोकादेकाक्षरव्यवधानेन द्वयोर्द्वयोश्च विपर्ययपाठेनायं श्लोको निर्याति। यथा—

सरमणहिमतोयापास्तमानारितापा
वरनतिरसमावायानमारा परं सा।
अरमत वत रामा लीनसामाद्यदूने
रमणहितमताधीशारवे भासितेरा॥ २३॥

इसी श्लोक का एक अक्षर का बीच देकर दो दो अक्षरों का विपर्यय (उलटे) पाठ करने पर यह श्लोक निकलता है। जैसे—

सताप का अपहरण करने के कारण नीहारजल रूप प्रिय के साथ रहने वाली अतएव मान रूपी शत्रु से उत्पन्न सताप से रहित तथा सुन्दर प्रणाम करने वाली, सर्वोत्कृष्ट (असमा) (प्रिय की एव अपनी) रक्षा करने वाली, निरन्तर कामुक (अयानमारा), प्रिय के लिये हितैषिणी और अभीष्ट, सुमधुर स्वभाव वाली (लीनसामा) रमणी अत्यन्त रम गयी॥ २३॥

सरमणेति। काचिन्मानिनी प्रसन्नात्र वर्ण्यते—सा रामा युवतिरधीशारवे दयितवचसि परमतिशयेनारमत प्रीतिं कृतवती। वत विस्मये। चित्रं मानिन्यपि प्रसन्ना यत्। कीदृशी। रमणो दयितः स एव संतापापहारित्वाद्धिमतोयं नीहारजलम्, सह तेन वर्तते या सा सरमणहिमतोया। अत एवापास्तो निरस्तो मानारितापो गर्वशत्रुजनितोपतापो यया सापास्तमानारितापा। तथा वरा श्रेष्ठा नतिर्मानपरित्यागेन प्रणतिर्यस्याः सा वरनतिः। यद्वा वरे भर्तरि नतिर्यस्याः। तथा असमा सर्वोत्कृष्टा। तथा अवति रक्षत्यात्मानं प्रियं चेत्यवा। न विद्यते यानं गमनमस्येत्ययानः स्थिरो मारः कामो यस्याः सायानमारा। तथा लीनं सबद्धं साम कोमलवचनं यस्याः सा लीनसामा। प्रियभाषिणीत्यर्थः। कीदृशेऽधीशारवे। आद्यः प्रधानभूतः, दून उपतप्तो गद्गदः, आद्यश्च दूनश्च तत्राद्यदूने। रामा कीदृशी। रमणस्य प्रियस्य हिता च मता च। अनुकूलत्वादिष्टेत्यर्थः। तथा भासिता शोभिता इरा वाणी यस्याः सा भासितेरा। मधुरवागित्यर्थः। अस्माच्छ्लोकात्तथैव पूर्वश्लोको निर्याति। एवमन्येऽपि चित्रप्रकारा महाकाव्येभ्योऽवधार्याः। सर्वेषां स्वरूपदर्शनं कर्तुमशक्यमानन्त्यादिति। एतेषु यमकश्लेषचित्रोदाहरणेषु व्याख्यानान्तराण्यपि महामति-

कृतानि दृष्टानि, परमेकैकमेव चार्विन्येकैकमेव लिखितम्। यत उक्तं सुधीभिः—'व्याख्यानमनेकविध लिङ्गमबोधस्य धूम इव वह्नेः। स्पष्टं मार्गमजानन्स्पृशत्यनेकान्पथो मुह्यन्' इति॥

सरमणेति। यहाँ किसी प्रसन्न हो गयी मानिनी (नायिका) का वर्णन किया जा रहा है—वह युवती रमणी प्रिय के वचन में अत्यन्त रम गयी। बत आश्चर्य अर्थ में आया है। आश्चर्य है कि मानिनी होकर भी प्रसन्न हो गयी। कैसी (मानिनी) संताप को दूर करने के कारण नीहारजल रूपी प्रिय के साथ वास करने वाली (सरमणहिमतोया) अतएव मानरूपी शत्रु के उपताप से रहित (अपास्तमानारितापा), तथा मान के परित्याग के कारण सुन्दर नमस्कार वाली, अथवा पति को नमस्कार करने वाली, तथा अनुपमेय तथा अपनी एवं प्रिय की रक्षा करने वाली (अवा) तथा शान्त न होने वाले काम के आवेग वाली, तथा कोमल वचन वाली एवं प्रियभाषिणी। किस प्रकार के प्रिय के वचनों में? प्रथम बार उच्चारण किये गये और गद्गद वचन में (आद्यदूने)। रमणी कैसी?—प्रिय की हितैषिणी और अभीष्ट अर्थात् अनुकूल होने के कारण-इष्ट। तथा शोभित वाणी वाली (भासितेरा) अर्थात् मधुर वचन वाली। इस श्लोक से उसी प्रकार (एक एक अक्षर का बीच देकर दो दो अक्षरों का उलटे पाठ करने से) पूर्व श्लोक (५-२२) निकलता है। इसी प्रकार चित्र (अलंकार) के अन्य प्रकारों को भी महाकाव्यों से समझ लेना चाहिए। क्योंकि (प्रकारों के) अनन्त होने के कारण सभी के स्वरूप का दर्शन कर सकना असमव है। इन यमक, श्लेष और चित्र के उदाहरणों में बड़े बड़े पण्डितों (टीकाकारों) के द्वारा अन्य टीकायें भी की गयी मिली हैं परन्तु (उनमें) एक एक ही सुन्दर है इसलिये एक एक का ही (मैंने—नमि साधु) ने उपन्यास किया। क्योंकि बुद्धिमानों ने भी कहा है—'अग्नि के लिङ्ग (साधन) धूम के समान अज्ञ को अनेक प्रकार का व्याख्यान सूझता है। स्पष्ट मार्ग को न जानने वाला मोहवश अनेक रास्तों को पकडता है'॥

अथ य एते मात्राच्युतादयस्ते किमलंकाराः, उत नेत्याशङ्क्याह—

मात्राबिन्दुच्युतके प्रहेलिका कारकक्रियागूढे ।
प्रश्नोत्तरादि चान्यत्क्रीडामात्रोपयोगमिदम् ॥ २४ ॥

आगे जो ये मात्राच्युतक आदि हैं क्या वे अलङ्कार हैं अथवा नहीं—इस शङ्का का उत्तर देते हैं—मात्राच्युतक, बिन्दुच्युतक, प्रहेलिका, कारकगूढ, क्रियागूढ और प्रश्नोत्तरादि—यह सब अन्य खेल मात्र के उपयोग में आते हैं (अर्थात् ये अलङ्कार नहीं हैं)॥ २४॥

मात्रेति। च्युतकशब्दो गूढशब्दश्चोभयत्र संबध्यते। ततश्च मात्राच्युतकबिन्दुच्युतकप्रहेलिकाकारकगूढक्रियागूढानि प्रश्नोत्तरादि। च समुच्चये। अन्यत्पूर्वालंकारेभ्यो व्यतिरिक्तं तत्क्रीडामात्रोपयोगम्। मात्रग्रहणेनाल्पप्रयोजनता सूचयति। अल्पप्रयोजनत्वादेवालंकारमध्ये न संगृहीतम्। काव्येषु च दर्शनादुक्तव्यमिति॥

मात्रेति। च्युतक शब्द और गूढ शब्द दोनों ही के साथ (मात्रा और बिन्दु तथा कारक और क्रिया के साथ) अन्वित होंगे। इस प्रकार मात्राच्युतक, बिन्दुच्युतक, प्रहेलिका, कारकगूढ, क्रियागूढ, प्रश्नोत्तर आदि (पद होंगे)। च समुच्चय अर्थ में आया है। अन्यत्—अर्थात् जो पहले बताये गये अलङ्कारों से भिन्न है उसका खेलमात्र में उपयोग होता है। मात्र पद से प्रयोजन की स्वल्पता सूचित होती है। प्रयोजन के अल्प होने के ही कारण अलङ्कारों में इनकी गणना नहीं की गयी। काव्यों में उपलब्ध होने के ही कारण इनका वर्णन किया गया॥

तल्लक्षणं यथाक्रममाह—

मात्राबिन्दुच्यवनादन्यार्थत्वेन तच्च्युते नाम।
स्पष्टप्रच्छन्नार्था प्रहेलिकाव्याहृतार्था च॥ २५॥

प्रच्छन्नत्वाद्भवतस्तद्गूढे कारकक्रियान्तरयोः।
प्रश्नानां च बहूनामुत्तरमेकं भवेद्यत्र॥ २६॥
प्रश्नोत्तरं तदेतद्व्यस्तसमस्तादिभिर्भवेद्बहुधा।
भेदैरनेकभाषं ··· ······ ····· ··च भिद्यते॥ २७॥

क्रमशः उनके लक्षण बताते हैं—मात्रा और अनुस्वार के प्रच्छन्न होने के कारण अभिधेय के भिन्न होने पर मात्राच्युतक और बिन्दुच्युतक नामक अलङ्कार होते हैं। प्रहेलिका दो प्रकार की होती है—स्पष्ट प्रच्छन्नार्था (जिसमें प्रश्न में ही उत्तर स्पष्टतः प्रच्छन्न हो) और व्याहृतार्था (जहाँ अर्थ साक्षात् कथित न हो)। कारक के प्रच्छन्न होने पर कारकगूढ और क्रिया के प्रच्छन्न होने पर क्रियागूढ चित्र होता है। जहाँ अनेक प्रश्नों का एक उत्तर होता है—उसे प्रश्नोत्तर चित्र कहते हैं (वह) व्यस्त, समस्त आदि भेदों से अनेक प्रकार का होता है तथा अनेक भाषाओं की दृष्टि से भी इसका भेद किया जाता है॥२५-२७॥

मात्राबिन्दुच्यवनादिति। प्रच्छन्नत्वादिति। प्रश्नोत्तरमिति मात्रायाः स्वरस्य, तथा बिन्दोरनुस्वारस्य च्यवनाद्भ्रंशाद्धेतोरन्यार्थत्वेन भिन्नाभिधे-

थत्वेन तच्च्युते मात्राबिन्दुच्युते भवतो नाम। प्रहेलिका द्विधा। स्पष्टप्रच्छन्नार्थो व्याहृतार्था च। तत्र स्पष्ट. पदारूढत्वात्प्रच्छन्नश्च प्रश्नवाक्य एवान्तर्गतत्वेन भ्रमकारित्वादर्थो यस्याः सा तथाविधा। तथासाधारणविशेषणोपादानादेवाधिगतत्वेनाव्याहृत' । साक्षादनुक्तोऽर्थो यस्या सा तथाभूता द्वितीया। तथा कर्त्रादिकारकाणां गूढत्वादप्रकटत्वात्कारकगूढम्। क्रियापदानां तु प्रच्छन्नत्वात्क्रियागूढम्। तथा प्रश्नोत्तरमेतद्यत्र बहूना प्रश्नाना वचनस्यातन्त्रत्वादेकस्य द्वयोर्वैकमेवोत्तरं भवेत्। एतच्च प्रश्नोत्तरं व्यस्तसमस्तादिभि., आदिग्रहणाद्गतप्रत्यागतैकालापकप्रतिलोमानुलोमादिभिर्भेदैर्बहुधा भवेत्। तथैकभाषत्वेनानेकभाषत्वेन च भिद्यते॥

मात्राबिन्दुच्यवनादिति। प्रच्छन्नत्वादिति। प्रश्नोत्तरमिति। मात्रा (स्वर) और अनुस्वार के अपभ्रंश होने पर अभिधेय के भिन्न होने के कारण मात्राच्युतक और बिन्दुच्युतक होते हैं। प्रहेलिका दो प्रकार की होती है—स्पष्टप्रच्छन्नार्था और व्याहृतार्था। उनमें स्पष्ट (किन्तु) पदारूढ होने के कारण प्रश्न वाक्य के अन्तर्गत ही भ्रम उत्पन्न करने के कारण अर्थ जिसका प्रच्छन्न होता है वह एक प्रकार की (प्रहेलिका) होती है। तथा असामान्य विशेषणों के उपादान के कारण होने वाली, जिसमें अर्थ साक्षात् कथित नहीं होता है ऐसी वह (प्रहेलिका) दूसरी ही होती है। इसी प्रकार कर्ता आदि कारकों (विभक्तियों) के स्पष्ट न होने के कारण कारकगूढ तथा क्रियापदों के प्रच्छन्न होने के कारण क्रियागूढ होता है। इसी प्रकार अनेक प्रश्नों का वचन के स्वाधीन होने के कारण जहाँ एक या दो का एक ही उत्तर होता है वहाँ प्रश्नोत्तर होता है। और यह प्रश्नोत्तर व्यस्त, समस्त आदि से = आदि ग्रहण से गत, प्रत्यागत, एकालापक, प्रतिलोम, अनुलोम आदि भेदों से अनेक प्रकार का होता है। इसी प्रकार एक भाषा और अनेक भाषाओं में भी (इसका) भेद किया जाता है॥

अधुनैतेषामेव यथाक्रममेकैकमुदाहरणं दिक्प्रदर्शनार्थमाह—

नियतमगम्यमदृश्यं भवति किल त्रस्यतो रणोपान्तम्।
कान्तो नयनानन्दी बालेन्दुः खे न भवति सदा॥ २८॥

अब इन्हीं का क्रमशः एक एक उदाहरण दिग्दर्शन कराने के लिये कहते हैं—

डरते हुये मनुष्य के लिये रण में अप्राप्य निश्चित वस्तु अनवलोकनीय हो जाती है। नेत्रों को आनन्द देने वाला बालचन्द्र सदैव आकाश में नहीं होता है॥ २८॥

नियतेति। त्रस्यतो बिभ्यतो नरस्य। किलेति सत्ये। रणोपान्त समरनिकटं नियतं निश्चितमगम्यमप्राप्यमदृश्यमनवलोकनीयं भवति। इत्येकवाक्यार्थः। अत्र मात्रया ककारगतेकाररूपया च्युतयान्य एवार्थो

भवति मात्राच्युतके च सर्वत्र मात्रापगमेऽप्यकारान्तत्वावस्थिति'। उच्चारणार्थत्वादकारस्य। तत्रान्योऽर्थो यथा—कलत्रस्य दाराणां तोरणपान्तं तोरणनिकटं राजपथो नियतमगम्यमदृश्यं च भवति। कुलवधूत्वादिति। बिन्दुच्युतकमाह—कान्त इत्यादि। कश्चित्कंचिदाह—एष बालेन्दुरपूर्णचन्द्रः खे वियति सदा न भवति। कान्तः कमनीयः। अत एव नयनानन्दो नयनानन्दकरः। अत्र बिन्दौ च्युतेऽर्थान्तरं भवति। इदं काचित्सखीमाह—हे बाले मुग्धे, कान्तो वल्लभो नयनानन्दी दुःखेन क्लेशेन भवति सदा। तस्मान्मैनं तिरस्कार्षीरिति शेषः। व्यञ्जनच्युतकाक्षरच्युतकेत्यादिग्रहणात्संगृहीते तदुदाहरणे अप्यनयैव दिशा द्रष्टव्ये॥

नियतेति। त्रस्यतो—डरते हुये मनुष्य को। 'किल' यह सच है—इस अर्थ में आया है। रण में पहुँच कर निश्चय ही अप्राप्य (वस्तु) दिखाई नहीं पड़ती है। यह एक वाक्य का अर्थ है। यहाँ ककारगत इकार रूप मात्रा के छोड़ देने पर दूसरा ही अर्थ हो जाता है और मात्राच्युतक में सर्वत्र मात्रा के हट जाने पर भी (अक्षर की) अकारान्त रूप में स्थिति होती है। अकार की (सत्ता) उच्चारण के लिये (होती है)। उसका दूसरा अर्थ इस प्रकार है—स्त्रियों का तोरण के समीप राजमार्ग निश्चय ही अदृश्य हो जाता है। (उनके) कुलवधू होने के कारण। बिन्दुच्युतक का उदाहरण देते हैं—कान्त इत्यादि। कोई किसी से कह रहा है—यह अपूर्ण चन्द्र आकाश में सदैव नहीं रहता है। कान्त (कमनीय) अतएव नेत्रों को आनन्द देनेवाला। यहाँ (भी) बिन्दु के छोड़ देने पर दूसरा ही अर्थ होता है। कोई सखी से यह कहती है—हे मुग्धे! नेत्रों को सुख देनेवाले प्रियतम कष्ट से ही सदा (समीप) में रहते हैं, अतएव इनका तिरस्कार मत करो—इतना शेष है। व्यञ्जनच्युतक और अक्षरच्युतक (कारिका में आये हुये) आदि पद से गृहीत तथा उनके उदाहरण भी इसी दिशा से जान लेने चाहिए॥

अथ स्पष्टप्रच्छन्नार्थप्रहेलिकामाह—

कानि निकृत्तानि कथं कदलीवनवासिना स्वयं तेन।
कथमपि न दृश्यतेऽसावन्वक्षं हरति वसनानि॥२९॥

आगे स्पष्टप्रच्छन्नार्था प्रहेलिका का उदाहरण देते हैं—

कदलीवन में निवास करनेवाले स्वयं उसने किस प्रकार क्या काट डाला। (उत्तर) स्वयं उस (रावण) ने तलवार से (असिना) कदली के समान (कदलीव) आश्चर्य है (कथम्) नव शिर (नव कानि) काट डाले। यह आँखों के सामने वस्त्रों को चुरा रहा है और किसी प्रकार दिखलाई नहीं पड़ रहा है॥२९॥

कानीति । कदलीवनवासिना रम्भावनगतेन नरेण कानि निकृत्तानि कानि छिन्नानि । कथं केन प्रकारेणेति प्रश्ने । स्पष्टोऽपि प्रच्छन्नोऽर्थः । स चायम्—कानि शिरांसि मस्तकानि निकृत्तानि । कथम् । कदलीव रम्भेव । केन । असिना खड्गेन । कियन्ति । नव नवसंख्यानि । स्वयमात्मना । तेन दशाननेन । कथंशब्दोऽत्र विस्मये । चित्रमिदं यत्स्वयं तृणराजवदात्मनः शिरांसि छिन्नानीत्यर्थः । प्रश्नोत्तरात्त्वस्या अयमेव विशेषो यत्प्रश्नवाक्येनैवोत्तरदानम् । अथ व्याहृतार्थामाह—कथमपीत्यादि । असौ कश्चिदन्वक्ष प्रत्यक्षमेव वसनानि वस्त्राणि हरति । अथ च कथमपि न दृश्यते नावलोक्यते । अत कोऽयं स्यात् । अत्रासाधारणविशेषणोपादानाद्वायुरिति गम्यते । नान्यस्य चौरादेरेवंविधा शक्तिरिति । प्रश्नोत्तराच्चास्या वायुर्वातः समीर इत्याद्यनियतशब्दत्वं विशेषः ॥

कानीति । केला-वन में रहनेवाले मनुष्य ने क्या काट डाले । किस प्रकार से—यह प्रश्न है । स्पष्ट होकर भी अर्थ प्रच्छन्न (छिपा) है । वह यह है—शिर काट डाले । किस प्रकार ?—केले के (खम्भे) के समान; किससे ?—तलवारसे, कितने ?—नव सख्या में । स्वयं ही । उस रावण ने । 'कथम्' पद यहाँ विस्मय अर्थ में आया है । यह आश्चर्य है कि उसने तृणराज के समान अपने शिर काट डाले । प्रश्नोत्तर से इसका यह भेद है कि (इसमें) प्रश्न-वाक्य से ही उत्तर (भी) दिया जाता है । आगे व्याहृतार्था (प्रहेलिका) का उदाहरण देते हैं—कथमपीत्यादि । यह कोई नेत्रों के समक्ष ही वस्त्रों को चुरा रहा है और किसी भी प्रकार दिखाई भी नहीं दे रहा है । अतः यह कौन हो सकता है । यहाँ असाधारण विशेषणों के उपादान के कारण 'वायु' (रूप अर्थ) गम्य है । चोर आदि की अन्य की इस प्रकार की सामर्थ्य नहीं हो सकती । प्रश्नोत्तर से भेद है कि यह वायु, वात, समीर आदि अनिश्चित शब्दगत होती है (प्रश्नोत्तर में शब्द उक्त होता है) ॥

अथ कारकगूढमाह—

पिबतो वारि तवास्यां सरिति शरावेण पातितो केन ।
वारि शिशिरं रमण्यो रतिखेदादपुरुषस्येव ॥ ३० ॥

अब कारकगूढ बताते हैं—

तुम्हारे इस नदी में ढकनी (कसोरे) से जल पीते समय किसके द्वारा छोड़े गये (क्या छोड़े गये—यह कर्म गूढ है) । हे मृग (एण) बाण (शरो) छोड़े गये । रति के कष्ट के कारण रमणियों ने अपुरुष के समान शीतल जल—(यहाँ क्रियागूढ है) । रमणियोंने प्रातः काल ही (उपसि एव) रतिखेद के कारण शीतल जल का पान किया (अपुः) ॥ ३० ॥

पिबत इति। कश्चित्कंचिदाह—तवास्यां सरिति नद्यां शरावेण वर्ध-मानकेन भाजनविशेषेण जलं पिबतः केन पातितौ। कौ पातिताविति साकाङ्क्षत्वात्कर्मात्र गूढम्। तच्चैवं प्रकटम्—हे एण मृग, तवास्यां सरिति वारि पिबतः केन शरौ बाणौ पातिताविति। अथ क्रियागूढम्—वारि शिशिरमित्यादि। वारि जलम्, शिशिरं शीतलम्, रमण्यो नार्यः, रति-खेदान्निधुवनायासादपुरुषस्येव। अत्र क्रिया गुप्ता। सा चेयम्—रमण्यो रतिखेदाद्वारि शिशिरमुपस्येव। अत्र क्रिया गुप्ता। सा चेयम्—रमण्यो रतिखेदाद्वारि शिशिरमुपस्येव प्रभात एवापुः पीतवत्यः॥

पिबत इति। कोई किसी से कह रहा है–तुम्हारे इस नदी में ढकनी (कसोरे) से जल पीते हुये किसके द्वारा गिराये गये। क्या गिराये गये—इस प्रकार (वाक्य के) साकाङ्क्ष होने के कारण यहाँ कर्म गूढ है। वह इस प्रकार स्फुट है—हे मृग! इस नदी में जल पीते हुए तुम्हारे (ऊपर) किसने बाण छोड दिये। आगे क्रियागूढ का उदाहरण देते हैं–वारि शिशिरेत्यादि। वारि–जल, शिशिर–शीतल, रमणी—नारी, रति के परिश्रम के कारण अपुरुष के समान। यहाँ क्रिया गुप्त है। वह इस प्रकार है—रमणियों ने निधुवन के आयास से थककर प्रातः काल ही शीतल जल का पान किया।

अथ प्रश्नोत्तरमाह—

उद्यन्दिवमकरोऽसौ किं कुरुते कथय मे मृगायाशु।
कथयानिन्द्राय तथा किं करवाणि क्वणितुकामः॥ ३१॥
अहिणवकमलदलारुणिण माणु फुरन्तिण केण।
जाणिज्जई तरुणीअणस्स निद्धा (?) भण अहरेण॥ ३२॥

आगे प्रश्नोत्तर का उदाहरण देते हैं—

मुझ मृग से बताओ उदय होकर यह सूर्य क्या करता है? मैं जो इन्द्र नहीं हूँ बताओ चिल्लाने की इच्छा करता हुआ क्या करूँ? नूतन कमलपत्र के समान अरुण फुरफुराता हुआ तरुणियों का मान कैसे जाना जा सकता है? (बताओ निंद)। हे मृग दिन (अहः एण)। हे अनिन्द्र (अहरे अण) शब्द करो। ओष्ठ से (अहरेण-अधरेण-स०)॥ ३१-३२॥

उद्यन्निति। अहिणवेति। कश्चिन्मूर्खत्वेन मृगः सन्कंचन पृच्छति—यथा मह्यं मृगाय त्वं कथय। एष दिवसकरः सूर्य उद्यन्नुदयं प्राप्नुवन्किं कुरुत इत्येकः प्रश्नः। अपरमाह—अनिन्द्रायाशक्राय मह्यं कथय निवेदय। क्वणितुकामः शब्दितुकामः सन्नहं किं करवाणि किं करोमीति द्वितीयः। उत्तरानुरोधेन चात्र मृगायेत्यनिन्द्रायेति च प्रश्नवाक्येऽभिहितम्। वक्तृ-

बहुत्वख्यापनार्थमनेकभाषत्वख्यापनार्थं तृतीयप्रश्नोऽयं प्राकृते च यथा—अहिणवेत्यादि। कश्चित्सुहृदमाह—अभिनवकमलदलारुणेन स्फुरता केन तरुणीजनस्य मानो लक्ष्य इति भण वद। णिद्धेत्यामन्त्रणपदम् (?)। अत्र यथाक्रमं यथाभाषं चोत्तरमाह—अहरेणेति। तत्र—अहर्दिनम्। एण हे मृग। तथा अहरेऽनिन्द्र। अण शब्द कुरु। तथा प्राकृतोत्तरम्—अहरेणाधरेण। ओष्ठेनेत्यर्थः। इत्युत्तरत्रयं युगपदुक्तम्। एतदनेकवक्तृकमनेकभाषं व्यस्तसमस्तं च प्रश्नोत्तरम्। एकवक्तृकं त्र्यादिभाषं च प्रश्नोत्तरजातमन्यत्र विस्तरादवगन्तव्यम्॥

उद्यन्निति। अहिणवेति। कोई मूर्खतापूर्वक मृग होकर किसी से पूछता है—जैसे—मुझ मृग से तुम बताओ—यह सूर्य उदय होकर क्या करता है—यह एक प्रश्न है। दूसरा (प्रश्न भी) बताते हैं—अथक मुझसे बताओ चिल्लाने की इच्छा होने पर मैं क्या करूँ। यह दूसरा प्रश्न है। उत्तर के अनुरोध (आग्रह) को ही दृष्टि में रखकर प्रश्नवाक्य में ही 'मृगाय' और 'अनिन्द्राय' कह दिये गये हैं। वक्ताओं की अनेकता और भाषाओं की अनेकता को सूचित करने के लिये यह तीसरा प्रश्न प्राकृत में है; जैसे—अहिणवेत्यादि। कोई (अपने) मित्र से कह रहा है—नूतन कमलपत्र के समान लाल फुरफुराते हुये किस वस्तु से तरुणीजन का मान जाना जा सकता है—यह बताओ। णिद्धा यह आमन्त्रण (संबोधन) के लिये प्रयुक्त होता है। (सिद्ध हेमचन्द्र में णिद्धा-णिद्ध का संस्कृत रूप स्निग्धम् बताया है २। १०९।) अब क्रमानुसार और भाषा के अनुसार उत्तर देते हैं—अहरेणेति। उसमें—अहः—दिन। एण—हे मृग। इसी प्रकार अहरे! अनिन्द्र। अण—चिल्लाओ। प्राकृत भाषा का उत्तर इस प्रकार है—(अहरेण सं०-अधरेण) ओठ से। इस प्रकार तीन उत्तर एक साथ ही दिये गये। यह अनेक वक्ताओं वाला और अनेक भाषाओं वाला व्यस्त-समस्त प्रश्नोत्तर है। एक वक्तावाले और तीन आदि भाषावाले प्रश्नोत्तर को विस्तारपूर्वक अन्य स्थलों पर समझना चाहिए॥

अथाध्यायमुपसंहरन्नाह—

इत्थं स्थितस्यास्य दिशं निशम्य शब्दार्थवित्सोदितचित्रवृत्त.।
आलोच्य लक्ष्यं च महाकवीनां चित्रं विचित्रं सुकविर्विदध्यात्॥३३॥

अब अध्याय का उपसंहार करते हुये कहते हैं—

पूर्ववर्णित चित्र की इस दिशा को जानकर शब्द और अर्थ में पटु विविध (तनुमध्य आदि) वृत्तों का परामर्श करके महाकवियों के लक्ष्य को जानकर कुशल कवि विचित्र चित्र अलंकार की रचना करे॥ ३३॥

इत्थमिति। अस्य चित्रस्येत्थं पूर्वोक्तप्रकारेण स्थितस्य दिशं मार्गं निशम्य श्रुत्वा तथा महाकवीनां लक्ष्यमुदाहरणं चालोच्य विमृश्य ततः सुकविश्चित्रमलकारं चित्रं नानाविधं विदध्यात्कुर्यात्। किंविशिष्टः सन्। शब्दार्थौ वेत्ति शब्दार्थवित्। तथा क्षोदितानि पर्यालोचितानि चित्राणि नानाविधानि वृत्तानि तनुमध्यादीनि येन स तथाविध.। यतः किल न सर्वेण वृत्तेन सर्वं चित्रं कर्तुं पार्यते। तथालोच्य वीक्ष्य, लक्ष्यमुदाहरणम्, महाकवीनां सुकवीनाम्। चित्रकरणे किल लक्षणाभावाल्लक्ष्यदर्शनमेव महानुपाय इति कृत्वा॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतः

पञ्चमोऽध्याय. समाप्त'।

इत्यमिति। इस चित्र की इस प्रकार वर्णन की गयी दिशा को जानकर तथा महाकवियों के उदाहरण का परामर्श करके सुकवि नाना प्रकार के चित्र-अलकारों की रचना करे। किन विशेषणों वाला (सुकवि)?—शब्द और अर्थ को जानने वाला तथा तनु, मध्य आदि विविध वृत्तों की पर्यालोचना कर चुका हुआ। क्यों कि सभी वृत्तों को (जानकर भी) कोई सभी चित्रों को पार नहीं कर सकता। तथा (फिर क्या करके सुकवि रचना करे?) महाकवियों के उदाहरण को देखकर। चित्र की रचना में लक्षण के अभावके कारण उदाहरण का साक्षात्कार ही महान उपाय है–यह जानकर (अर्थात् उदाहरणों के ही अनुकरण पर रचना की जा सकती है)॥

इस प्रकार श्री रुद्रट-विरचित काव्यालङ्कार में नमिसाधु-रचित-टिप्पणी से

युक्त पाँचवा अध्याय समाप्त हुआ।

षष्ठोऽध्यायः ।

शब्दास्यालंकारानभिधायेदानीं तद्दोषानभिधित्सुराह—

पदवाक्यस्थो दोषो वाक्यविशेषप्रयोगनियमेन ।
यः परिहृतस्ततोऽन्यस्तदतिव्याप्तिश्च संह्रियते ॥ १ ॥

शब्द के अलङ्कारों को बताकर उसके दोषों को बताने की इच्छा से कहते हैं—

(२।८) में विशिष्ट वाक्य के प्रयोग का जो नियम बताया गया उससे पदगत और वाक्यगत दोषों का परिहार हो गया। उस (२।८) के अतिरिक्त दोषों का यहाँ विवेचन किया जा रहा है। इस लिये यहाँ पर अतिव्याप्ति नहीं समझनी चाहिए ॥ १ ॥

पदवाक्यस्थ इति। पूर्वम् 'अन्यूनाधिक-' (२।८) इत्यादिना ग्रन्थेन काव्योपयोगिनो वाक्यविशेषस्य प्रयोगे नियमेन यः पदस्थो वाक्यस्थश्च दोषः परिहृतः ततो दोषादन्योऽसमर्थाप्रतीतादिकः संमिति संप्रति ह्रियते परिह्रियते। तथा तस्मान्न्यूनादिकस्यासमर्थादिकस्य च दोषस्य यातिव्याप्तिरतिप्रसक्तिः सा च संह्रियते संकोच्यते। ननु पूर्वत्र वाक्यस्थ एव दोषः परिहृतो न पदस्थस्तत्कथमिहोच्यते पदवाक्यस्थ इति। सत्यम्। अन्यूनाधिकविशेषणविशिष्टैः पदैर्वाक्यस्य नियमितत्वात्पदस्थोऽपि दोषस्तेन परिहृत एवेति। तर्हि पदग्रहणमत्र न कर्तव्यमाशङ्कानिरासार्थम्। यतः कश्चिदाशङ्कयेत यथा वाक्यस्थ एव दोषस्ते परिहृतो न पदस्थ इति। तथा पदग्रहणाभावे ततोऽन्य इति। वक्ष्यमाणदोषोऽपि पदस्योक्तो न स्यादिति। पृथक्करणं तु तस्य दोषस्य महीयस्त्वस्यापनार्थम्। न्यूनाधिकादिदोषो हि नेत्रोत्पाटतुल्यः। असमर्थादिकस्तु पटलनिभः॥

पदवाक्यस्थ इति। पहले (२।८) में 'अन्यूनाधिक'—आदि कारिका के द्वारा काव्य के उपयोग में आने वाले वाक्यविशेष के प्रयोग के नियम के द्वारा जिस पदगत और वाक्यगत दोष का परिहार किया गया उस दोष से पृथक् असमर्थ, अप्रतीत आदिका इस समय प्रसग प्रारम्भ किया जा रहा है। अतएव न्यून आदि और असमर्थ आदि के कथन में जो अतिव्याप्ति दोष की प्रसक्ति हो रही थी वह (उनके भिन्न होने के कारण) संकुचित हो गई (दूर हो गयी)। प्रश्न उठता है कि पहले (२।८) में वाक्यगत दोष का ही परिहार किया गया है पदगत का नहीं फिर यहाँ (६।१) में 'पदवाक्यस्थ 'ऐसा क्यों कहा ! ठीक

है। अन्यून, अनधिक, विशेषणों से विशिष्ट पदों के द्वारा ही वाक्य के निर्मित होने के कारण उस (वाक्यगत) से पदगत दोष का भी परिहार हो ही गया। तो पद का ग्रहण यहाँ नहीं करना चाहिए इस शङ्का का समाधान हो गया। क्योंकि कोई शङ्का कर सकता है कि तुम्हारा वाक्यगत दोष ही दूर किया गया है पदगत नहीं। इस प्रकार पदग्रहण के अभाव में (पदगत दोष) वाक्यगत दोष से भिन्न होता। आगे कहा जानेवाला दोष भी पद का (दोष कथित) न हो पाता। (वास्तव में) उस (वाक्यगत) दोष का अलग से वर्णन उसकी महत्ता द्योतित करता है। न्यून, अधिक आदि दोष नेत्र निकाल लेने के तुल्य है और असमर्थ आदि तो (केवल) पटल (पलक) (निकाले जाने) के तुल्य॥

अथ तानेवान्यान्दोषानाह—

असमर्थमप्रतीतं विसंधि विपरीतकल्पनं ग्राम्यम्।
अव्युत्पत्ति च देश्यं पदमिति सम्यग्भवेद्दुष्टम् ॥ २ ॥

आगे उन्हीं अन्य दोषों को बताते हैं—

असमर्थ, अप्रतीत, विसंधि, विपरीत कल्पना, ग्राम्य और व्युत्पत्तिशून्य देशी शब्द अवश्य ही सदोष होते हैं ॥ २ ॥

असमर्थमिति। इतिशब्दो हेतौ, स च प्रत्येकं संबध्यते। असमर्थमिति हेतोः पदं दुष्टं भवेत्। एवमप्रतीतमित्यादौ बोध्यम्। सम्यक्शब्दो नियमार्थः। अवश्यं दुष्टमित्यर्थः। चशब्दः समुच्चये। अन्यैरनुक्तं व्युत्पत्तिहितं देश्यमसमर्थादिदोषमध्ये समुच्चीयत इत्यर्थः॥

असमर्थमिति। इतिशब्द हेतु के अर्थ में आया है और उसका (असमर्थ आदि) प्रत्येक के साथ योग होगा। असमर्थ है इस कारण से पद दुष्ट होगा। इसी प्रकार अप्रतीत आदि को भी जानना चाहिए। सम्यक्शब्द नियम के अर्थ में आया है अर्थात् अवश्य दुष्ट होगा। च शब्द समुच्चय अर्थ में आया है। अन्य (आलंकारिकों के) द्वारा न गिनाये गये व्युत्पत्ति से रहित देशी पद का असमर्थ आदि दोष में अन्तर्भाव किया जाता है।

यथोद्देशस्तथा लक्षणमिति पूर्वमसमर्थलक्षणमाह—

पदमिदमसमर्थं स्याद्वाचकमर्थस्य तस्य न च वक्तुम्।
तं शक्नोति तिरोहिततत्सामर्थ्यं निमित्तेन ॥ ३ ॥

'उद्देश के अनुसार लक्षण किया जाता है' इस नियम के अनुसार पहले असमर्थ का लक्षण करते हैं—

'निर्दिष्ट अर्थ का वाचक पद उस अर्थ में अपनी सामर्थ्य किसी कारणवश खोकर उसे जब नहीं कह पाता है तो उसे असमर्थ पद कहते हैं ॥ ३ ॥

पदमिति। यत्पदं तस्य निर्दिष्टार्थस्य वाचकम्। अथ च तमेवार्थं वक्तुं न शक्नोति तदासमर्थम्। वाचकं चेत्कथं न शक्नोतीत्याह—निमित्तेन केनचिच्छब्दान्तरसंबन्धादिना तिरोहितं स्थगितं तत्रार्थे सामर्थ्यं वाचकत्वं यस्य तत्तमभिधातुं न शक्नोतीति। एतेनावाचकत्वदोषादसामर्थ्यं दोषभेद उक्तः॥

पदमिति। जो पद उस निर्दिष्ट अर्थका वाचक है फिर भी उसी अर्थ को व्यक्त नहीं कर सकता है उसे असमर्थ पद कहते हैं। वाचक है तो फिर क्यों नहीं व्यक्त कर पाता इसे बताते हैं किसी कारण से—अन्य शब्द के संसर्ग से उस अर्थ की व्यक्ति में जिसके सामर्थ्य का लोप हो गया वह उसका अभिधान नहीं कर सकता है। इस प्रकार अवाचक से असमर्थ दोष का भेद कथित हो गया॥

सामान्येनाभिधायैतदेव विशेषेणाह—

धातुविशेषोऽर्थान्तरमुपसर्गविशेषयोगतो गतवान्।
असमर्थः स स्वार्थे भवति यथा प्रस्थितः स्थास्नौ॥ ४॥

इस प्रकार असमर्थ का सामान्य लक्षण करके उसका विशेष-विवरण दे रहे हैं—कोई धातु जब उपसर्ग के योग से किसी अन्य अर्थ का वाचक हो जाती है और अपना अर्थ नहीं दे पाती है (*तब वह उपसर्गयुक्त तिङन्त पद भी असमर्थ* दोष से दुष्ट हो जाता है) जैसे प्रस्थित यह पद 'स्थास्नु' पद का अर्थ देने में असमर्थ है॥ ४॥

धातुविशेष इति। धातुविशेषस्तिष्ठत्यादिरुपसर्गविशेषेण प्रादिना योगतः संबन्धाद्धेतोरर्थान्तरं गतिनिवृत्त्यादिलक्षणादन्यमर्थं गतवान्प्राप्तः सन्स्वार्थेऽसमर्थो भवति। समर्थं वक्तुं न शक्नोतीत्यर्थः। यथा प्रस्थितशब्दः स्थास्न्वर्थे। विशेषग्रहणमुभयत्र न सर्वो धातुः सर्वेणोपसर्गेण संबन्धे सत्यर्थान्तरं याति। अपि तु कश्चिदेव केनचिदेवेत्यस्यार्थस्य सूचनार्थम्। तथाहि प्रेण योगे तिष्ठत्यादिरेवार्थान्तरं याति न तु यातिप्रभृतिः। तथा तिष्ठतिरपि प्रेण योगे न त्वदादिना। आकुलनिधनादीनि कलधौतकार्तस्वरवच्छब्दान्तराण्येव। न नामोपसर्गयोग उदाहृतः॥

धातुविशेष इति। तिष्ठति आदि धातु विशेष प्र आदि किसी विशेष उपसर्ग के योग से गति, निवृत्ति आदि अपने अर्थ से भिन्न अर्थ को प्राप्त होकर अपने अर्थ में असमर्थ हो जाती है। अर्थात् उस (स्वकीय) अर्थ को नहीं दे पाती है। जैसे प्रस्थित शब्द स्थास्नु के अर्थ में। (धातु और उपसर्ग) दोनों के साथ विशेष के ग्रहण का तात्पर्य है कि सभी धातुयें सभी उपसर्गों के साथ योग

होने पर मिलार्थक नहीं होती है। अपितु कोई ही धातु किसी ही उपसर्ग के साथ यह इस अर्थ की सूचना के लिये प्रयोग किया गया है। क्यों कि प्र के योग में तिष्ठति आदि ही धातु मिलार्थक होती है 'याति' आदि नहीं। इसके अतिरिक्त 'तिष्ठति' भी प्र के ही योग में मिलार्थ होती है 'अव' आदि के योग में नहीं। 'आकुलनिधन' आदि 'कलधौत' 'कार्तस्वर' के समान भिन्न ही शब्द है। नाम के साथ उपसर्ग के योग का उदाहरण (यहाँ) नहीं दिया गया है ॥

प्रकारान्तरेणासमर्थमाह—

इदमपरमसामर्थ्यं धातोर्यत्पठ्यते तदर्थोऽसौ।
न च शक्नोति तमर्थं वक्तुं गमनं यथा हन्ति ॥ ५ ॥

असमर्थ के दूसरे रूप का वर्णन करते हैं—

'यह धातु की असमर्थता दूसरे ही प्रकार की होती है कि जिस निर्दिष्ट अर्थ में धातु पढ़ी जाती है उसको नहीं दे पाती है, जैसे, जाने के अर्थ में पढ़ी गयी 'हन्' धातु ॥ ५ ॥

इदमिति। इदमन्यदसामर्थ्यं धातो', यत्तदर्थोऽसौ धातु' पठ्यते न च स निर्दिष्टमर्थं वक्तुं शक्नोति। यथा 'हन् हिंसागत्योः' इति पाठेऽपि हन्तीत्युक्ते हिनस्तीति प्रतीयते न च गच्छतीति। यमकश्लेषचित्रेषु गत्यर्थोऽपि दृश्यते। अत एवाल्पोऽयं दोषः॥

इदमिति। धातु की असामर्थ्य यह दूसरी ही होती है कि जिस अर्थ में यह धातु पढ़ी जाती है उस निर्दिष्ट अर्थ को यह व्यक्त नहीं कर सकती है। जैसे 'हन्' धातु हिंसा और गति—दोनों अर्थों में पठित होने पर भी 'हन्ति' कहने पर 'मारता है, अर्थ की ही प्रतीति होती है, जाता है, इस अर्थ की नहीं। यमक, श्लेष और चित्र के स्थलों 'हन्' धातु का प्रयोग गत्यर्थ में भी मिलता है। अतएव असामर्थ्य का यह प्रकार स्वल्प ही दोष होता है।

पुनः प्रकारान्तरमाह—

शब्दप्रवृत्तिहेतौ सत्यप्यसमर्थमेव रूढिबलात्।
यौगिकमर्थविशेषं पदं यथा वारिधौ जलभृत् ॥ ६ ॥

आगे और भी प्रकार बताते हैं—

'शब्द प्रकृति का हेतु होने पर भी आश्चर्य है कि यौगिक अर्थ देने वाला पद रूढ अर्थ में प्रसिद्ध होने के कारण यौगिक अर्थ देने में असमर्थ हो जाता है। जैसे जलभृत् पद 'मेघ' अर्थ में रूढ होने के कारण जल धारण करने वाला रूप यौगिक अर्थ वाले समुद्र रूप अर्थ में प्रवृत्ति निमित्त होने पर भी असमर्थ है ॥ ६ ॥

शब्देति। यौगिकं संबन्धजं क्वचिदर्थविशेषेऽसमर्थमेवावाचकमेव पदम्। तत्र तदर्थस्याभाव इति चेन्न। शब्दप्रवृत्तिहेतौ सत्यपि विद्यमानेऽपि। अपिर्विस्मये। चित्रमिदमित्यर्थः। यदि शब्दप्रवृत्तिहेतुत्वं कथं तह्र्यसमर्थत्वमित्याह—रूढिबलात्प्रसिद्धिबलात्। क्वचिदेव किंचिदेव शब्दरूपं वाचकत्वेन रूढमतस्तत्रैव प्रवर्तते नान्यत्र। एवकारोऽवधारणे। असमर्थमेव न तु समर्थम्। उदाहरणं यथा वारिधौ जलभृदिति। जलधारणक्रियालक्षणे प्रवृत्तिनिमित्ते सत्यपि जलभृच्छब्दो वारिधिं समुद्रमभिधातुमसमर्थः। मेघ एव तस्य रूढित्वादिति॥

शब्देति। यौगिक पद किसी विशेष अर्थ देने में कहीं असमर्थ होता है। यदि यह कहें कि यहाँ उस अर्थ का अभाव होता है तो ऐसा नहीं है। शब्द-प्रवृत्ति के हेतु के होने पर (असमर्थ होता है)। 'अपि' विस्मय अर्थ में आया है। 'यह आश्चर्य है' यह अर्थ है। यदि शब्द-प्रवृत्तिका हेतु है फिर असमर्थ क्यों है—इसे बताते हैं—रूढिके कारण। कहीं ही और कोई ही शब्द वाचक रूप में रूढ होता है अतः वहीं प्रवृत्त होता है अन्यत्र नहीं। 'एव' अवधारण अर्थ में आया है। असमर्थ ही समर्थ नहीं। उदाहरण जैसे 'वारिधि' अर्थ में 'जलभृत्'। जलधारण रूप क्रिया के स्वरूप निमित्त के होने पर भी जलभृत् शब्द 'वारिधि' का अभिधान करने में असमर्थ है क्यों कि वह मेघ अर्थ में रूढ है॥

भूयोऽपि भेदान्तरमाह—

निश्चीयते न यस्मिन्वस्तु विशिष्टं पदे समानेन।
असमर्थं तच्च यथा मेघच्छविमारुरोहाश्वम्॥ ७॥

और भी प्रकार बताते हैं—

जिस पद के अभीष्ट अर्थ के वाचक होने पर भी समान रूप आदि के कारण वहाँ विशिष्ट वस्तु का निश्चय नहीं हो पाता है वह भी असमर्थ पद होता जैसे घोड़े ने मेघ की कान्ति प्राप्त की मेघ के अनेक वर्ण होने के कारण अश्व के वर्ण का ज्ञान स्पष्ट नहीं होता॥ ७॥

निश्चीयत इति। यस्मिन्पदे तदर्थाभिधायिन्यपि विशिष्टं वस्तु न निश्चीयते तदप्यसमर्थम्। कथं न निश्चीयत इत्याह—समानत्वात्। समानस्तुल्यो मानः परिच्छेदो विवक्षितेऽन्यत्र च वस्तुनि येन पदेन तत्तथा तद्भावस्तत्त्वम्। तस्मादनेकार्थवाचकत्वादित्यर्थः। यथा मेघच्छविमारुरोहाश्वमित्युक्ते मेघानामनेकवर्णानां दर्शनान्न निश्चयः कर्तुं पार्यते। यत्र तु निश्चयस्तत्समानार्थमपि साध्वेव। यथा—'लक्ष्मीकपोलसंक्रान्त-

कान्तपत्रलतोज्ज्वलाः। दोर्द्रुमाः पान्तु वः शौरेर्घनच्छाया महाफलाः॥'
अत्र हि शौरिः कृष्णवर्ण इति॥

निश्चीयत इति। उस (निर्दिष्ट) अर्थ के वाचक होने पर भी जिस पद में विशिष्ट वस्तु का निश्चय नहीं हो पाता वह (पद) भी असमर्थ होता है। क्यों नहीं निश्चय हो पाता—इसे बताते हैं—समान होने के कारण—विवक्षित और अन्य वस्तु के मान के समान होने के कारण। अर्थात् उस (पद) के अनेक अर्थों का वाचक होने के कारण। जैसे—'घोड़ा' मेघ की कान्ति को प्राप्त हो गया—यह कहने पर मेघों के अनेक वर्णों के दिखाई पड़ने के कारण (घोड़े के वर्ण का) निश्चय नहीं होता है। जहाँ निश्चय हो जाता है वहाँ अर्थसाम्य भी साधु ही होता है। जैसे—लक्ष्मी के कपोल पर प्रतिबिम्बित कमनीय पत्र लताओं के समान उज्ज्वल, बड़े बड़े फलों वाले, मेघ कीसी कान्ति वाले कृष्ण के भुजारूपी वृक्ष आप लोगों की रक्षा करें॥' यहाँ कृष्ण का काला वर्ण (निश्चित) है॥

इदानीमस्यैवासमर्थदोषस्यातिव्याप्तिं संहर्तुमाह—

यत्पदमभिनयसहितं कुरुतेऽर्थविशेषनिश्चयं सम्यक्।
नैकमनेकार्थतया तस्य न दुष्येदसामर्थ्यम्॥ ८॥

अब इसी असमर्थ दोष की अतिव्याप्ति का निवारण करने के लिये कहते हैं—

'अनेकार्थक होने के कारण एक का नहीं किन्तु जो पद अभिनय के साथ विशेष अर्थ की भली भाँति निश्चित प्रतीति करा देता है उसका असामर्थ्य सदोष नहीं होता है॥ ८॥

यदिति। यत्पदं विशेषणभूतमनेकार्थतया विवक्षितविशिष्टार्थविशेषनिश्चयं सम्यक्कुरुते। किंभूतं सदभिनयसहितम्। तस्य। सामर्थ्यं 'निश्चीयते न यस्मिन्' (६।७) इत्यनेन प्राप्तं दोषाय न भवति॥

यदिति। विशेषणभूत जो पद अनेकार्थक होने के कारण विवक्षित विशिष्ट अर्थ का विशेष निश्चय भली भाँति करता है—क्या होकर—अभिनीत होकर (अभिनय के साथ)। उसका (असामर्थ्य सदोष नहीं होता है)। (अर्थात्) (६।७) 'निश्चीयते न यस्मिन्' के द्वारा उक्त असामर्थ्य दोष युक्त नहीं होता है॥

नन्वर्थस्य शब्दो वाचको न त्वभिनय, तत्कथं तेनार्थविशेषनिश्चयः क्रियत इत्याह—

शब्दानामत्र सदानेकार्थानां प्रयुज्यमानानाम्।
निश्चीयते हि सोऽर्थः प्रकरणशब्दान्तराभिनयैः॥ ९॥

अर्थ का वाचक शब्द होता है अभिनय नहीं फिर क्यों (अभिनय से) अर्थ विशेष का निश्चय किया जाता है—(यह कहा) इसका उत्तर देते हैं—

'यहाँ काव्य में प्रयुक्त होने वाले अनेकार्थक शब्दों का वह (विवक्षित) अर्थ प्रकरण अथवा अन्य शब्द के सन्निधान से निश्चित होता है ॥ ९ ॥

शब्दानामिति। हि यस्मादत्र काव्येऽनेकार्थानां शब्दाना प्रयुज्यमानानां स विवक्षितोऽर्थः प्रकरणेन प्रस्तावेन शब्दान्तरसंनिधानेन वाभिनयेन वा निश्चीयते। तत्र प्रकरणे यथा—'महीभृत. पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम्' इत्यत्र हिमवानेव महीभृदुच्यते। शब्दान्तरेण यथा—'कोपादेकतलाघातनिपतन्मत्तदन्तिनः। हरेर्हरिणयुद्धेषु कियान्व्याक्षेपविस्तरः॥' अत्र दन्तिहरिणशब्दसंनिधानात्सिंह एव हरिर्निश्चीयते। अभिनयेन त्वर्थविशेषप्रतीतावुदाहरण सूत्रकार एव दास्यति। यतः प्रकरणशब्दान्तरे प्रसिद्धत्वादुपमाने। अभिनयस्तु प्रस्तुतत्वादुपमेयः। तथा ताभ्यां विवक्षितार्थनिश्चयस्तथाभिनयेनापीत्यर्थ. ॥

शब्दानामिति।—क्यों कि काव्य में प्रयुक्त होने वाले अनेकार्थक शब्दों का विवक्षित अर्थ प्रकरण, अन्य शब्द की सन्निधि एवं अभिनय से निश्चित किया जाता है। इनमें प्रकरण द्वारा जैसे पुत्र के भाव में भी उस सन्तति में हिमाचल की दृष्टि संतुष्ट नहीं हुयी' यहाँ (महीभृत् का अर्थ राजा और हिमाचल दोनों होने पर भी प्रकरण के कारण) हिमाचल अर्थ ही महीभृत्—से वाच्य है। अन्य शब्द के संसर्ग से जैसे—'क्रोध के कारण एक ही पञ्जे के आघात से मतवाले हाथी को गिरा देने वाले सिंह और मृग के युद्धों में दूर फेंकने की क्या दूरी होगी। यहाँ दन्ति (हाथी) और हरिणके संसर्ग से सिंह ही हरि-पद से निश्चित होता है। अभिनय के द्वारा विशेष अर्थ की प्रतीति का उदाहरण सूत्रकार ही देंगे। क्यों कि प्रकरण और अन्य शब्द की संनिधि प्रसिद्ध होने के कारण उपमान हैं; अभिनय तो प्रस्तुत होने के कारण उपमेय है। जैसे उन दोनों (*प्रकरण और शब्दान्तर*) के द्वारा विवक्षित अर्थ का निश्चय होता है उसी प्रकार अभिनय से भी यह तात्पर्य है।

तदेवोदाहरणमाह—

सा सुन्दर तव विरहे सुतनुरियन्मात्रलोचना सपदि।
एतावतीमवस्थां याता दिवसैरियन्मात्रैः ॥ १० ॥

उसी का उदाहरण देते हैं—

हे सुन्दर तुम्हारे वियोग में वह सुन्दरी इतने बड़े नेत्रों वाली, इतने ही दिनों में शीघ्र ही इस अवस्था को प्राप्त हो गयी ॥ १० ॥

सेति । अत्रेयन्मात्रैतावच्छब्दौ महति स्वल्पे च वर्तेते । ततोऽभिनयेन विशेषप्रतीतिर्यथा—हे सुन्दर, सा सुतनुस्तव विरहे इयन्मात्रलोचना । प्रसृत्यभिनयेन विशाललोचनेति निश्चीयते । तथैतावतीमवस्थां यातेति । अत्रोर्ध्वीकृतकनिष्ठिकाङ्गुल्या कृशत्वं प्रतीयते । दिवसैरियन्मात्रैरित्यत्र पञ्चाङ्गुलिदर्शनेन स्वल्पत्वं चेति ॥

सेति । यहाँ 'इयन्मात्र' और 'एतावत्' शब्द (क्रमशः) अत्यधिक और थोड़े अर्थों में आये हैं । तदनन्तर अभिनय से विशेष प्रतीति होती है, जैसे—हे सुन्दर ! वह सुन्दरी तुम्हारे विरह में इतने लोचनवाली थी । अभिनय से प्रतीत होता है कि विशाल नेत्रों वाली थी । तथा इस अवस्था को प्राप्त हो गयी । यहाँ ऊपर उठायी गयी कनिष्ठिका अङ्गुलि से कृशता प्रतीत होती है । इतने ही दिनों में—इस प्रकार पाँच उँगलियाँ दिखलाने से (दिनों की संख्या) स्वल्प सूचित होती है ॥

अथाप्रतीतमाह—

युक्त्या वक्ति तमर्थं न च रूढं यत्र यदभिधानतया ।
द्वेधा तदप्रतीतं संशयवदसंशयं च पदम् ॥ ११ ॥

आगे अप्रतीत का वर्णन करते हैं—

जो पद जिस अर्थ में प्रसिद्ध में नहीं है उसे जब गुण अथवा क्रिया के योग से देता है तब वह (दुष्ट) पद होता है । उसके दो भेद होते हैं—संशयवद-प्रतीत और असंशयाप्रतीत ॥ ११ ॥

युक्त्येति । तदप्रतीतं यद्युक्त्या गुणक्रियायोगेन तं विवक्षितमर्थं वक्ति प्रतिपादयति । अथ च तत्रार्थाभिधानतया वाचकत्वेन न रूढं न प्रसिद्धं तथाप्रतीतं द्वेधा । कथं संशयवदसंशयं चेति ॥

युक्त्येति । जो पद युक्ति—गुण अथवा क्रिया के योग से उस अभीष्ट अर्थ का प्रतिपादन करता है वह अप्रतीत (पद होता है) । इसके अतिरिक्त उस अर्थ के अभिधायक रूप में वह पद न तो रूढ होता है न तो प्रसिद्ध ही । ऐसा अप्रतीत दो प्रकार का होता है । किस प्रकार—संशयवदप्रतीत और असंशयाप्रतीत ॥

तत्र संशयवद्यथा—

साधारणमपरेष्वपि गुणादि कृत्वा निमित्तमेकस्मिन् ।
यत्कृतमभिधानतयार्थे संशयवद्यथा हिमहा ॥ १२ ॥

उसमें संशयवद् जैसे—

अन्य अर्थों में भी प्रयुक्त होने वाले गुण आदि को निमित्त बनाकर जहाँ एक ही अर्थ में प्रयुक्त करते हैं वहाँ संशयवदप्रतीत होता है, जैसे हिमहा ॥ १२ ॥

[टि०—हिम नष्ट करने का साधारण गुण अग्नि और सूर्य दोनों में उपलब्ध है। अग्नि और सूर्य दोनों में ही इस गुण के रूढ न होने के कारण किसी एक (अग्नि या सूर्य) अर्थ में 'हिमहा' पद प्रयुक्त होने पर संशयवदप्रतीत दोष से दुष्ट होगा]।

साधारणमिति। यत्पदं गुणक्रियादिनिमित्तमुद्दिश्यान्येष्वप्यर्थेषु साधारणं सदेकस्मिन्विशिष्टेऽर्थेऽभिधानतया संज्ञात्वेन कृतं न तु विशेषणत्वेन तदनेकार्थतयैकत्र निश्चयानुत्पादनात्संशयवदप्रतीतम्। उदाहरणं यथा—हिमहेति। अत्र हिमहननलक्षणया क्रिययैतत्पदं रवौ वह्नौ च साधारणम्। अभिधानतया चैकत्रापि न रूढम्। अत एकत्र प्रयुज्यमानं संशयं कुर्वीत। अथ किमेतत् 'शब्दप्रवृत्तिहेतौ सत्यपि' (६।६) इत्यनेनासमर्थलक्षणेन न परिहृतम्। नेत्युच्यते। यतो यदेकत्र रूढमन्यत्र तु तदर्थसद्भावेऽपि न प्रयोगार्हं तत्तस्य विषयः। इह तु यत्कचिदपि न रूढं युक्त्या च तदर्थवाचकत्वं तदेकत्रार्थेऽनुचितमिति स्फुट एव भेदः। तथा 'निश्चीयते न यस्मिन्' (६।७) इत्यस्याप्ययमविषयः। यतस्तत्र विशेषणपदं संशयकारि निषेध्यम्॥

साधारणमिति। जिस पद का गुण एवं क्रिया रूप निमित्त को लक्ष्य करके अन्य अर्थों में भी साधारण होने पर एक ही विशिष्ट अर्थ में संज्ञारूप में—न कि विशेषण रूप में—प्रयोग किया जाता है उसके अनेकार्थक होने के कारण निश्चय प्रतीति न होने से संशयवदप्रतीत होता है। उदाहरण जैसे—हिमहा। यहाँ हिम नष्ट करने की क्रिया के कारण यह पद रवि (सूर्य) और अग्नि में समान रूप से प्रवृत्त होता है। अभिधायक रूप से किसी एक ही अर्थ में रूढ नहीं है अतएव (किसी) एक अर्थ में प्रयुक्त होने पर संशय उत्पन्न करता है। फिर शब्द प्रवृत्ति के हेतु के होने पर भी (६।६) के द्वारा असमर्थ दोष से दुष्ट होने के कारण क्या इसका परिहार नहीं किया गया। कहते हैं नहीं। क्यों कि असमर्थ का विषय तो वह पद है जो एक अर्थ में रूढ होता है और अन्य (दूसरे) अर्थ में प्रवृत्ति के हेतु के होने पर भी प्रयोग किये जाने के योग्य नहीं होता है। यहाँ तो जो किसी भी अर्थ में रूढ नहीं है और युक्ति के बल पर उस (एक) अर्थ का वाचक है उसका (उस) एक अर्थ में (प्रयोग) संशयोत्पादक होता है—अतएव भेद तो स्पष्ट ही है। इसी प्रकार 'निश्चीयते न यस्मिन्' (६।७) का भी यह (संशय) विषय नहीं है। क्यों कि वहाँ (६।७) में संशयोत्पादक विशेषण पद निषिद्ध है (यहाँ विशेषण पद नहीं संज्ञापद निषिद्ध है) ॥

अथासंशयमाह—

पदमपरमप्रतीतं यद्यौगिकरूढशब्दपर्यायैः ।
कल्पितमर्थे तस्मिन्यथाश्वयोपिन्मुखार्चिष्मान् ॥ १३ ॥

अब असमय का उदाहरण देते हैं—

दूसरा यह भी पद अप्रतीत होता है जो यौगिक एवं रूढ शब्दों के पर्यायों से विवक्षित अर्थ में कल्पित होता है; जैसे (वडवावदनाग्नि अर्थ में) अश्वयोपिन्मुखार्चिष्मान् (घोड़े की स्त्री के मुख की अग्नि) ॥ १३ ॥

पदमिति । अपरमिदं पदमप्रतीतं यद्यौगिकानां सबन्धजानामथ च रूढाना संज्ञात्वेन प्रसिद्धानां पर्यायैस्तस्मिन्विवक्षितेऽर्थे कल्पितमभिधाननया प्रयुक्तम् । यथा वडवामुखानलशब्दे वाच्येऽश्वयोपिन्मुखार्चिष्मानिति शब्दः । स ह्यश्विमुखसादृश्यादौर्वाग्नौ यौगिको रूढिशब्दश्च । तत्र वडवापर्यायोऽश्वयोषिदिति, अनलस्यार्चिष्मानिति । मुखशब्दः स्वरूपेण प्रयुक्तः । केचित्त्वश्वयोषिद्वदनवह्निरिति पठन्ति । एवंविधं पदं विवक्षितमर्थं निर्विकल्पमेव प्रत्याययति । केवलं न तथा रूढमिति दुष्टम् । यथा माघस्य—'तुरङ्गकान्तामुखहव्यवाहज्वालेव भित्त्वा जलमुल्ललास' । अल्पश्चायं दोषः, महाकविभिरपि प्रयुक्तत्वात् । अथ किमेतावसमर्थाप्रतीतदोषाववाचकत्वेन परिहृतौ । नेत्युच्यते । यतो यत्किंचिदपि तमर्थं नाभिधत्ते तदवाचकम् । इह तु पदमर्थाभिधायकमेव । केवलं पदान्तरसंनिधानादसामर्थ्यमरूढ्या चाप्रतीतत्वमागतमिति ॥

पदमिति । यह दूसरा ही अप्रतीत पद होता है जो यौगिक (व्युत्पत्तिपरक) एवं रूढ (संज्ञा रूप में प्रसिद्ध) शब्दों के पर्यायों के द्वारा उस विवक्षित अर्थ में कल्पित (संज्ञा रूप में प्रयुक्त) होता है । जैसे 'वडवामुखानल' शब्द के वाच्य (अभिधेय) होने पर 'अश्वयोपिन्मुखार्चिष्मान्' शब्द (का प्रयोग) । यह घोडी के मुख के साथ सादृश्य होने के कारण और्वाग्नि अर्थ में यौगिक और रूढ शब्द है । उसमें वडवा का पर्याय 'अश्वयोपित्' और अनल का 'अर्चिष्मान्' है । मुखशब्द अपने ही रूप में (आया) है । कुछ लोग 'अश्वयोपिद्वदनवह्नि' ऐसा पाठ मानते हैं । इस प्रकार का पद अभीष्ट अर्थ की प्रतीति बिना किसी विकल्प के कराता है । केवल उस प्रकार रूढ नहीं होता—यही दोष है । जैसे माघ का 'वाडवाग्नि के ज्वाला के समान जल को भेद कर (वह द्वारका) शोभित हो रही थी ।' महाकवियों में प्रयुक्त होने के कारण यह दोष अल्प है अब क्या असमर्थ और अप्रतीत ये दोनों दोष—अवाचक से ही नहीं दूर हो गये । कहते हैं नहीं । क्यों कि जो कुछ भी उस (निर्दिष्ट अर्थ) को

अभिधान नहीं करता वह अवाचक होता है। यहाँ तो पद अर्थ का अभिधायक ही होता है। केवल अन्य पद की सन्निधि के कारण असामर्थ्य और रूढि न होने के कारण अप्रतीतत्व आ जाता है॥

अथ विसंधिपदमाह—

यस्यादिपदेन समं संधिर्न भवेद्भवेद्विरुद्धो वा।
तदिति विसंधि स इत्थं मन्थरया भरत आहूतः॥ १४॥

आगे विसंधि का उदाहरण देते हैं—

जिस पद की अपने से पूर्व पद के साथ संधि नहीं होती अथवा (विरुद्धार्थक होने के कारण) विरुद्ध होती है उसे विसंधि कहते हैं; जैसे—'मन्थरया भरत आहूतः'॥ १४॥

यस्येति। यस्य द्वितीयपदस्यादिपदेन सार्धं संधिः संधानं न भवेद्यत्रापि विरुद्धार्थत्वाद्विरुद्धो वा भवेत्तत्पदं विसंधि। विरुद्धार्थो विशब्दः। ननूभयाश्रयत्वात्संधेः किमिति द्वितीयपदमेव विसंधि भण्यते, न त्वाद्यम्। सत्यम्। यतो द्वितीयपदे सत्येव विसंधित्वमायाति। ततस्तस्य तदुक्तम्। उभयत्रोदाहरणमाह—स इत्यादि। स भरतो मन्थरया कुब्जयेत्थमाहूत आकारितः। स इत्थमिति, भरत आहूत इति चासंध्युदाहरणम्। मन्थरया भरत इति तु विरुद्धसंधिनिदर्शनम्। संहितापाठे सति पदभङ्गवशान्मन्थरे याभे मैथुने रत इति प्रतीपोऽर्थो गम्यते॥

यस्येति। जिस द्वितीय पद की आदि पद के साथ संधि नहीं होती है अथवा होने पर भी विरुद्धार्थक होने के कारण विरुद्ध होती है वह पद विसंधि (होता है)। विशब्द विरुद्धार्थक (है)। तो संधि के दोनों (पदों) पर आश्रित होने के कारण द्वितीय पद ही विसंधि कहा जाता है प्रथम नहीं! सच है—क्यों कि द्वितीय पद की सत्ता होने पर ही विसंधि का प्रश्न उठता है (अतएव द्वितीय पद ही विसंधि कहा जाता है) दोनों का उदाहरण देते हैं—स इत्यादि। मन्थराने भरत को इस प्रकार बुलाया। स इत्थमिति भरत आहूत—ये (दोनों) असंधि के उदाहरण हैं। 'मन्थरया भरत'—यह विरुद्ध संधिका उदाहरण है। एक साथ पढ़ने पर पद-भङ्ग के कारण 'मन्द मैथुन में रत' यह विरुद्ध अर्थ गम्य होता है।

नन्वेवं विसंधिपदे दूषिते सति सर्वमेव पूर्वकविलक्ष्यं दूषितं स्यादित्याशङ्क्य विशेषमाह—

तत्रासत्संधि पदं कृतमसकृदयुक्तितो भवेदुष्टम्।
दूरं तु वर्जनीयं विरुद्धसंधि प्रयत्नेन॥ १५॥

इस प्रकार विसंधि पद के दूषित होने पर पूर्व कवियों का सभी उदाहरण दूषित हो जायगा—इस शंका का समाधान करते हैं—

उक्त दोनों भेदों में बार बार प्रयुक्त किया गया असंधि पद युक्ति न होने के कारण दुष्ट होता है। विरुद्ध संधि का तो जहाँ तक हो सके प्रयोग ही नहीं करना चाहिए॥ १५॥

तत्रेति। तत्र द्वयोर्मध्याद्यदसंधि तदसकृत्कृत पुन पुनः प्रयुक्तमयुक्तितः पूर्वोत्तरपदासंश्लेषाद्दुष्टं भवति। यथा—'कान्ते इन्दुशिरोरत्ने आदधाने उदंशुनो। पातां वः शम्भुशर्वाण्याविति दुःखाकुलाद्भवात्॥' इत्यादि। विरुद्धसंधि पुन पदं दूरमतिशयेन प्रयत्नतो वर्जनीयमेव॥

तत्रेति। उन दोनों (असंधि और विसंधि) में जो असंधि है उसका बिना युक्ति के बार बार प्रयोग (अपने) से पूर्व और पश्चात् के पदों के साथ योग न होने के कारण दुष्ट होता है। जैसे—'उगलते हुये किरणों वाले कमनीय चन्द्ररूप शिरोभूषण को धारण करने वाले शिव और पार्वती दुःखमय इस भव से आप लोगों की रक्षा करें' उदाहरण। विरुद्ध संधि पद का प्रयोग तो प्रयत्नपूर्वक दूर ही रखना चाहिए॥

अथ विपरीतकल्पनमाह—

पूर्वार्थप्रतिपन्थी यस्यार्थः स्पष्ट एव संभवति।
विपरीतकल्पनं तद्भवति पदमकार्यमित्रमिव॥ १६॥

आगे विरुद्ध-कल्पना का उदाहरण देते हैं—

जिस पद का अर्थ अभीष्ट अर्थ के विरुद्ध स्पष्ट ही संभव होता है वह पद विपरीतकल्पन होता है। जैसे, 'अकार्यमित्र'॥ १६॥

पूर्वार्थेति। यस्य पदस्य पूर्वार्थप्रतिपन्थी विवक्षितार्थविरोधी स्पष्ट एवाव्याख्यात एवार्थः संभवति तद्विपरीतार्थप्रतिभासनाद्विपरीतकल्पनम्। निदर्शनमाह—अकार्यमित्रमिवेति। अत्र ह्यकार्यमकृत्रिमं मित्रमकारणबन्धुरित्ययमर्थो विवक्षितोऽप्यकार्ये पापे मित्रमिति विरोध्यर्थो झगित्येव प्रतिभाति। ननु विरुद्धसंधित्वेन किं न परिहृतमेतत्। न परिहृतम्। तत्र हि पदद्वयसंधिविषयं पूर्वार्थविरोधित्वम्, इह तु संध्यभावेऽपीति॥

पूर्वार्थेति। जिस पद का अर्थ अभीष्ट अर्थ के विरुद्ध कहा गया संभव होता है, विपरीत अर्थ के आभास के उत्पादक होने के कारण वह पद विपरीत कल्पन होता है। उदाहरण देते हैं—जैसे, 'अकार्यमित्र'। यहाँ वक्ता को 'अकार्य—अकृत्रिम (स्वाभाविक) मित्र—अकारण बन्धु' यह अर्थ अभीष्ट है। किन्तु शीघ्र ही 'अकार्य में—पाप में साथ देने वाला' इस विपरीत अर्थ की प्रतीति

होती है। प्रश्न उठता है कि विरुद्धसंधि से ही परिहार इसका क्यों नहीं हुआ? (कहते हैं) परिहार नहीं हुआ। विसंधि में दो पदों की संहिता का विषय अभीष्ट अर्थ का विरोधी होता है यहाँ संहिता न होने पर भी (विरुद्ध अर्थ की प्रतीति होती है)

टि० ['मन्थरया भरत आहूत' में संहिता ही विपरीत अर्थ का बोध कराती है। विपरीत कल्पना के उदाहरण में समास होने पर भी विरुद्ध अर्थ की प्रतीति होती है। वस्तुतः विरुधि का विषय अर्थान्तरप्रतीति है और विपरीत कल्पना का विरुद्धार्थ]

अथ ग्राम्यमाह—

यदनुचितं यत्र पदं तत्तत्रैवोपजायते ग्राम्यम् ।
तद्वक्तृवस्तुविषयं विभिद्यमानं द्विधा भवति ॥ १७ ॥

आगे ग्राम्य का उदाहरण देते हैं—

जो पद जिस विषय में अयोग्य होता है वह उस विषय में (प्रयुक्त होकर) ग्राम्यत्व उत्पन्न करता है। वक्ता और वस्तु के भेद वह दो प्रकार का होता है ॥ १७ ॥

यदिति। यत्पदं यत्र विषयेऽनुचितमयोग्यं तत्तत्रैव ग्राम्यमुपजायते। एतदुक्तं भवति, न स्वाभाविकं पुरुषस्येव शब्दस्य ग्राम्यत्वम्, अपि तु विषयभेदेन। तच्च ग्राम्यं वक्तृवस्तुविषयत्वेन भिद्यमानं सद् द्विधा द्विभेदं भवति। अत्र यद्वस्तुनि वक्तुमुचितं वक्तरि त्वनुचितं तद्वक्तृविषयं ग्राम्यम्। विपरीत तु वस्तुविषयमिति ॥

यदिति। जो पद जिस स्थल पर शोभा नहीं पाता उसकी वहाँ सत्ता ग्राम्य उत्पन्न करती है। कहने का भाव यह है कि मनुष्य की भाँति शब्द का ग्राम्यत्व स्वाभाविक नहीं होता अपितु विषयभेद से ही (उसमें ग्राम्यत्व आता है)। वह ग्राम्य वक्ता और वस्तु के विषय से भेद करने पर दो प्रकार का होता है। इनमें वस्तु में जो कथन करना उचित है और वक्ता में अनुचित-वह वक्तृविषयक ग्राम्य है और (उसके) विरुद्ध वस्तु विषयक (ग्राम्यत्व) ॥

तत्र वक्तृग्राम्यमाह—

वक्ता त्रिधा प्रकृत्या नियतं स्यादधममध्यमोत्तमया ।
तत्र च कश्चित्किंचिन्नैवार्हति पदमुदाहर्तुम् ॥ १८ ॥

उनमें वक्तृग्राम्य का उदाहरण देते हैं—

'अधम, मध्यम और उत्तम प्रकृति के भेद से वक्ता तीन प्रकार के होते हैं; उनमें कोई किसी निश्चित पद का प्रयोग करने के लिये अयोग्य होता है ॥ १८ ॥

वक्तेति। वक्ताधममध्यमोत्तमया प्रकृत्या स्वभावेन त्रिधा त्रिप्रकारो भवति। तत्राधमा हीनजातयो दासचेटादय', मध्यमाः प्रतीहारपुरोहितसार्थवाहादय, उत्तमा मुनिनृपतिप्रभृतय'। अथ बालयुववृद्धलक्षणादिकापि प्रकृति' कि नोच्यते। तत्रापि हि परस्परं व्यवहाराद्यनौचित्यमस्त्येव। सत्यम्। अर्थविषयमेव तद्ग्राम्यत्वम्। तच्च तत्रैव परिहरिष्यते 'ग्राम्यत्वमनौचित्य व्यवहाराकारवेषवचनानाम्' इत्यनेन। तत्र तेष्वधममध्यमोत्तमेषु वक्तृषु मध्ये कश्चिद्वक्ता किंचित्पदमुदाहर्तु वक्तु नैवार्हति न योग्यो भवति॥

वक्तेति। अधम, मध्यम और उत्तम प्रकृति के भेद से वक्ता तीन प्रकार के होते हैं। उनमें अधम हीन (नीच) जाति वाले दास, चेट आदि हैं, मध्यम द्वारपाल, पुरोहित, सार्थवाह आदि हैं और उत्तम मुनि, राजा आदि हैं। प्रश्न उठता है कि बाल, युवक और वृद्ध रूप प्रकृति से भेद क्यों नहीं किया जाता। उनमें भी परस्पर व्यवहार आदि में अनौचित्य पाया ही जाता है। सच है। (किन्तु) वह अर्थविषयक ही ग्राम्यत्व है उसका परिहार वहीं कर दिया जायगा। क्यों कि एक पंक्ति है, 'व्यवहार, आकृति, वेष और वाणी का अनौचित्य ही ग्राम्यत्व है। उन अधम, मध्यम और उत्तम (पात्र) वक्ताओं में कोई वक्ता किसी पद का उच्चारण करने के योग्य नहीं होता॥

तत्र दिङ्मात्रप्रदर्शनायाह—

तत्रभवन्भगवन्निति नार्हत्यधमो गरीयसो वक्तुम्।
भट्टारकेति च पुनर्नैवैतानुत्तमप्रकृतिः॥ १९॥

उसका दिग्दर्शनमात्र कराने के लिये कहते हैं—

उनमें अधम (पात्र) 'तत्र भवन्' 'भगवन्' आदि पदों से उत्तम पात्रों को नहीं सबोधित कर सकता तथा इन्हीं (उत्तम पात्रों) को उत्तमप्रकृति का पात्र (प्रयोग के योग्य होने पर भी) भट्टारक पद से नहीं बोधित कर सकता॥१९॥

तत्रभवन्निति। गरीयस उत्तमान्सुरमुनिप्रभृतींस्तत्रभवन्भगवच्छब्दवाच्यानप्यधमो वक्तैवमादिभिः शब्दैर्वक्तु नार्हति न योग्यो भवति। वक्तृविषयं पदमिदमनुचितम्। तथैतान्गरीयसो भट्टारकशब्दयोग्यान'न्य उत्तमस्वभावो राजादिर्वक्तुं नार्हति। इतिशब्दौ स्वरूपनिर्देशार्थौ। चशब्दोऽनुक्तस्वामिप्रभृतिशब्दसमुच्चयार्थ। भट्टारकेति स्वामिन्नित्यादि चेत्यर्थ.॥

तत्रभवन्निति। देवता, मुनि आदि 'तत्रभवन्' 'भगवन्' शब्दों के द्वारा सबोधन किये जाने के योग्य होने पर भी उत्तम पात्र (होने के कारण) अधम

वक्ता इस प्रकार के शब्दों द्वारा सम्बोधन करने के योग्य नहीं होता है। (अधम पात्रों के लिये) ('तत्रभवन्' भगवन्) यह वक्तृविषयक अनुचित पद है। इसी प्रकार भट्टारक शब्द के पात्र इन उत्तम (पात्रों) को उत्तम स्वभाव वाले राजा आदि नहीं पुकार सकते हैं। 'इति शब्द' (कारिका में) स्वरूप के निर्देशक है। च शब्द न गिनाये गये स्वामी आदि के समुच्चय के लिये है। तात्पर्य है 'भट्टारक' 'स्वामिन्' आदि।

इदानीं वस्तुविषयं ग्राम्यमाह—

तत्रभवन्भगवन्निति नैवार्हत्युत्तमोऽपि राजानम्।
वक्तुं नापि कथंचिन्मुनिमपि परमेश्वरेशेति ॥ २० ॥

अब वस्तुविषयक ग्राम्यत्व का उदाहरण देते हैं—इनमें उत्तम (मुनि आदि) पात्र भी राजा को 'तत्रभवन्' 'भगवन्' आदि पदों से नहीं संबोधित कर सकते हैं। उसी प्रकार उत्तम पात्र (राजा) भी मुनि को 'परमेश्वरेश' आदि पदों से नहीं सम्बोधित कर सकता ॥ २० ॥

तत्रभवन्निति। उत्तमो मुनिमन्त्रिप्रभृतिस्तत्रभवदादिपूजापदानि वक्तुं योग्योऽपि राजानमेभिः पूजापदैर्वक्तुं नार्हति। वस्तुविषयमेतदनौचित्यम्। राजा हि परमेश्वरादिभिः शब्दैर्वाच्यो न तु तत्रभवदादिभिरिति। तथा स एवोत्तमो राजा मुनिं तपोधनं परमेश्वरेशेत्यादिभिरामन्त्रणपदैः कदाचिदपि वक्तुं नार्हति। नियतविषया हि शब्दास्तेऽन्यत्र केलिं विना प्रयुज्यमाना अनौचित्यज्ञतां गमयेयुरिति ग्राम्यत्वं तेषाम्। आस्तां तावदधम उत्तमोऽपि नार्हतीत्यपिशब्दार्थः। दिङ्मात्रप्रदर्शनं चैतत्। विस्तरस्तु भरतादवगन्तव्यः॥

तत्रभवन्निति। उत्तम मुनि, मन्त्री आदि (पात्र) भी 'तत्रभवत्' आदि पूजापदों के बोलने के अधिकारी होने पर भी राजा को इन पूजापदों से नहीं पुकार सकते हैं। यह वस्तु-विषयक अनौचित्य है। राजा 'परमेश्वर' आदि शब्दों के द्वारा पुकारा जा सकता है 'तत्रभवत्' आदि के द्वारा नहीं। इसी प्रकार वही राजा तपस्यारूपी धनवाले मुनि को 'परमेश्वर' आदि संबोधन पदों के द्वारा कभी भी नहीं पुकार सकता है। शब्दों के प्रयोग का विषय निश्चित है। अन्यत्र बिना कौशल के प्रयुक्त होकर वे अनौचित्यज्ञता का ज्ञान कराते हैं—यह उनका ग्राम्यत्व है। अधम की तो बात ही छोड़िये उत्तम भी (मुनि को 'परमेश्वर' आमन्त्रणपद से) आमन्त्रित नहीं कर सकता है। यह दिग्दर्शनमात्र कराया गया। विस्तारपूर्वक भरत के नाट्यशास्त्र से समझना चाहिये।

भूयोऽपि ग्राम्यविशेषमाह—

पदमिदमनुचितमपरं सभ्यासभ्यार्थवाचि सभ्येऽर्थे ।
तद्धि प्रयुज्यमानं निदधाति मनस्यसभ्यमपि ॥ २१ ॥

आगे और भी ग्राम्यत्व का भेद बताते हैं—दूसरे वे पद अनुचित होते हैं जो शिष्ट और अश्लील दोनों प्रकार के अर्थों के वाचक होते हैं। वे शिष्ट अर्थ में प्रयुक्त होनेपर भी अश्लील अर्थ का आभास कराते हैं ॥ २१ ॥

पदमिति। इदमपरं पदमनुचितं ग्राम्यं यत्सभ्यासभ्यार्थवाचकं सत्सभ्येऽर्थे प्रयुज्यमानम्। सभायां पर्षदि वक्तुं योग्यः सभ्यस्ततोऽन्योऽसभ्योऽर्थः। कुतोऽनुचितम्। हिर्यस्मादर्थे। यतस्तत्प्रयुज्यमानं सन्मनसि चेतस्यसभ्यमप्यर्थं निदधाति स्फुरयति। नन्वेवंविधस्य पदस्योभयार्थवाचकत्वादसभ्योऽपि प्रयोगो न स्यात्ततश्चास्य प्रयोगोच्छेद एवागतः। नैतत्। अदुष्टो ह्यर्थो दुष्टेन दूष्यते न तु दुष्टं साधुनेति ॥

पदमिति। यह दूसरे ही प्रकार का अनुचित पद होता है जो शिष्ट और अश्लील दोनों अर्थों का वाचक होकर भी शिष्ट अर्थ में प्रयुक्त होता है। शिष्टों की सभा में प्रयुक्त होने के योग्य सभ्य इसके अतिरिक्त असभ्य अर्थ। क्यों अनुचित होता है। हि अर्थात् क्योंकि। क्योंकि वह प्रयुक्त होकर मन में अशिष्ट अर्थ का स्फुरण करता है। फिर तो इस प्रकार के पद के दोनों ही अर्थों के वाचक होने के कारण अशिष्ट अर्थ में भी प्रयोग नहीं होगा, फिर इसके प्रयोग का अन्त ही हो जायगा। ऐसा नहीं है। अदुष्ट अर्थ दुष्टों के द्वारा दोषी ठहराया जाता है सज्जनों के द्वारा दोषी नहीं। (अतएव सज्जन लोग उसका शिष्ट अर्थ में प्रयोग करेंगे ही)।

निदर्शनमाह—

वारयति सखी तस्या यथा यथा तां तथा तथा सापि ।
रोदितितरां वराकी बाष्पभराक्लिन्नगण्डमुखी ॥ २२ ॥

उदाहरण देते हैं—'उसकी सखी जैसे जैसे उसे मना करती है वैसे वैसे आँसुओं की धारा से आर्द्र कपोलों से मुखवाली वह बेचारी और भी रोती है॥२२॥

वारयतीति। तस्या नायिकायाः सखी यथा यथा तां वारयति तथा तथा सा वराकी रोदितितराम्। कीदृशी। बाष्पभरेण क्लिन्नगण्डमार्द्रकपोलं मुखं यस्याः सा तथाविधा। अत्र क्लिन्नगण्डशब्दावार्द्रकपोले सभ्येऽर्थे प्रयुक्तावपि पूयपुर्णपिटकत्वलक्षणमसभ्यमप्यर्थं स्फुरयतः। यनोऽसभ्यद्वययोगाच्चात्र विशेषणविशेष्यभावे सति दुष्टतरार्थत्वम् ॥

वारयतीति। उस नायिका की सखी जैसे जैसे उसे मना करती है वैसे वैसे वह बेचारी और भी रोती है। किस प्रकार की (वह नायिका)। आँसुओं के बहाव से आर्द्र कपोलों से युक्त मुखवाली। यहाँ 'क्लिन्नगण्ड' पद आर्द्रकपोल रूप शिष्ट अर्थ में प्रयुक्त होने पर भी पूय से युक्त पिटारी रूप अश्लील अर्थ का आभास कराते हैं। क्योंकि यहाँ दो अशिष्ट (अर्थों) के योग के कारण विशेषण-विशेष्य भाव होने पर अर्थ और भी दुष्ट है।

अथैतदतिव्याप्तिपरिहारार्थमाह—

अर्थविशेषवशाद्वा सभ्येऽपि तथा क्वचिद्विभक्तेर्वा।
अनुचितभावं मुञ्चति तथाविधं तत्पदं सदपि ॥ २३ ॥

आगे इसकी अतिव्याप्ति का परिहार करने के लिये कहते हैं—ग्राम्य होने पर भी कोई पद कहीं कहीं विशिष्ट अर्थ के कारण अथवा विभक्ति के कारण किसी विशिष्ट अर्थ में अनौचित्य त्याग देता है (अनौचित्य छोडकर शिष्ट अर्थ देता है)॥२३॥

अर्थेति। ग्राम्यं यत्पदं तत्तथाविधं ग्राम्यं सदपि क्वचित्सभ्येऽर्थे ऽनुचितभावं ग्राम्यत्वं मुञ्चति। कुतोऽर्थविशेषवशाद्वा, विभक्तेर्वा। वाशब्दौ विकल्पार्थौ। विशिष्टसभ्यार्थप्रयोगाद्वा विभक्तिविशेषाद्वेत्यर्थः। अपिर्विस्मये संभावने वा। तथाशब्दः समुच्चयार्थः। पदमेतद्दोषाभावमध्ये समुच्चीयते। क्वचिच्छब्दो विरलत्वप्रतिपादनार्थः। क्वचिदेवार्थविशेषे न सर्वत्रेत्यर्थः॥

अर्थेति। जो पद ग्राम्य होता है वह ग्राम्य होकर भी किसी विशिष्ट स्थल में शिष्ट अर्थ में ग्राम्यत्व छोड देता है। क्यों? विशेष अर्थ के कारण या विभक्ति के कारण। 'वा' पद विकल्पार्थक है। अर्थात् किसी विशिष्ट शिष्ट अर्थ के कारण अथवा विशेष विभक्ति के कारण। 'अपि' शब्द विस्मय एव संभावना के अर्थ में आया है। तथा शब्द समुच्चय के अर्थ में आया है। यह पद दोषाभाव के अन्तर्गत गिना जाता है (जो पद शिष्ट अर्थ में) अश्लील अर्थ छोड देता है। 'क्वचित्' शब्द विरलता का प्रतिपादन करता है। 'किसी विशेष अर्थ में ही सर्वत्र नहीं' यह तात्पर्य है।

निदर्शनमाह—

कथमिव वैरिगजानां मदसलिलक्लिन्नगण्डभित्तीनाम्।
दुर्भेद्यापि घटासौ विशांपते दारिता भवता ॥ २४ ॥

उदाहरण देते हैं—'(हे राजन्!) आपने दानवारि से आर्द्र कपोलस्थलों वाले शत्रुओं के हाथियों की बडी कठिनाई से भिन्न की जाने योग्य इस घटा को कैसे भिन्न कर दिया॥ २४॥

कथमिति। निगदसिद्धम्। यथा अत्रार्थविशेषो गजो वीररसश्च। कथं तर्हि नायिकाया बाहुल्येन दृश्यते। यथा—'धृतबिसवलये निधाय पाणौ मुखमधिरूपितपाण्डुगण्डलेखम्। नृपसुतमपरा स्मराभितापादमधुमदालसलोचनं निदध्यौ॥' कामिनीलक्षणोऽर्थविशेषोऽत्रापीति चेत्तर्हि 'वारयति सखी तस्याः' (६।२२) इति दुष्टत्वे कथमुदाहरणम्। पाण्डुशब्दसंनिधानादत्रानुप्रासत्वेन रम्यत्वाददोष इति नोत्तरम्। विनापि पाण्डुशब्दप्रयोग दर्शनात्। 'दैत्यस्त्रीगण्डलेखानां मदरागविलोपिभिः' इत्यादिषु। तस्मात्पूर्वकविलक्ष्याणां बाहुना दुष्टत्वमायाति। अत्रोच्यते—क्लिन्नशब्दसंनिधानादेव गण्डशब्दस्यासभ्यत्वं स्फुरति न त्वन्यदा। इत्येतदेव दर्शयितुमुदाहरणे सर्वेव प्रयुक्तवानिति। विशांपते इत्यत्र षष्ठीबहुवचनवशान्न विट्शब्देन विष्ठालक्षणोऽसभ्यार्थो मनसि निधीयते॥

कथमिति। स्पष्ट है। यहाँ विशेष अर्थ है (पूर्वार्ध में) गज और (उत्तरार्ध में) वीररस। फिर इस (गण्ड शब्द का प्रयोग) प्रायः नायिका में ही क्यों मिलता है। जैसे—'पकड़े हुये पीत कपोल-कान्तिवाले मुखको कमलनाल का अङ्गद धारण किये हुये हाथ में रखकर दूसरी ने काम के संताप के कारण बिना मकरन्द के मद के ही अलसाये हुये नेत्र वाले राजकुमार को धारण कर लिया' यहाँ भी कामिनी रूप विशेष अर्थ है। फिर क्यों 'वारयति सखी तस्याः' (६।२२) को ही दोष का उदाहरण बनाया (क्योंकि वहाँ भी कामिनी ही वाच्य है)। पाण्डु शब्द के सामीप्य से अनुप्रास की रमणीयता आने के कारण दोष नहीं रहा—यह कोई उत्तर नहीं। क्योंकि पाण्डु शब्द के अभाव में भी उदाहरण मिलता ही है। जैसे—'राक्षसी के कपोलों की कान्ति के मद की लालिमा को लुप्त करने वाले' आदि। (यहाँ किस अनुप्रास के कारण दोषाभाव मानेंगे) अतएव पूर्व कवियों के बहुत से उदाहरणों में दोष आ ही जाता है। इसका उत्तर देते हैं—क्लिन्न शब्द के सामीप्य के ही कारण गण्ड शब्द की अश्लीलता आभासित होती है अन्यथा नहीं। बस, इतना ही दिखाने के लिये (६।२२,२४) दोनों उदाहरणों का प्रयोग किया। (यह रहा अर्थ विशेष का उदाहरण)। 'विशांपते' में षष्ठी बहुवचन के कारण 'विट्' शब्द से विष्ठा रूप अश्लिष्ट अर्थ मन में नहीं आभासित होता है।

भूयोऽपि ग्राम्यविशेषानाह—

मञ्जीरादिषु रणितप्रायान्पक्षिषु च कूजितप्रभृतीन्।
मणितप्रायान्सुरते मेघादिषु गर्जितप्रायान्॥ २५॥

दृष्ट्वा प्रयुज्यमानानेवंप्रायांस्तथा प्रयुञ्जीत ।
अन्यत्रैतेऽनुचिताः शब्दार्थत्वे समानेऽपि ॥ २६ ॥ (युग्मम्)

और भी ग्राम्य विशेष का उदाहरण देते हैं—मञ्जीर आदि में रणित जैसे, पक्षियों में कूजित आदि, सयोग में मणित जैसे, मेघ आदि में गर्जित जैसे, और इसी प्रकार के अन्य प्रयोगों को प्रयोग किये जाते हुये देखकर उसी विधि से प्रयोग करना चाहिए। अन्य विधि से (अन्यत्र) प्रयोग करने पर शब्द और अर्थ-साम्य होने पर भी अनौचित्य होगा ॥ २५–२६ ॥

मञ्जीरादिष्विति । दृष्ट्वेति । वाच्येऽर्थे तुल्येऽप्येतेष्वेतान्धातून्पूर्वकविभिः प्रयुज्यमानान्दृष्ट्वा तेष्वेव निबध्नीयात् । नान्यत्र । यतस्तल्लक्ष्यमेवान्यत्र व्यवस्थाकारि मञ्जीरं नपुरम् । आदिग्रहणाद्रशनाघण्टाभ्रमरादिसंग्रहः । रणितप्रायानिति प्रायग्रहणं सदृशार्थवृत्तिक्वणिशिञ्जिगुञ्जत्याद्यर्थम् । प्रभृतिग्रहणं वाशत्याद्यर्थम् । सुरतग्रहणं व्यापारान्तरनिवृत्त्यर्थम् । मेघादिष्वित्यत्रादिग्रहणं सिंहगजाद्यर्थम् । प्रायग्रहणं ध्वनत्याद्यर्थम् । एवंप्रायानिति ये शास्त्रेषु सामान्येन पठ्यन्ते । अथ च विशेष एव दृश्यन्ते । यथा—ह्रेषतिरश्वेषु । भणति पुरुषेषु । कणतिः पीडितेषु । वातिर्वायौ । न त्वन्यत्र । नहि दृश्यते पुरुषो वातीति । एवमन्येऽपि द्रष्टव्याः । अन्यत्रैतेऽनुचिताः । मेघादिषु रणत्यादय इत्यर्थः । अपिशब्दो विस्मये । चित्रमिदं यच्छब्दार्थे समानेऽपि ग्राम्यत्वमेषां वस्तुविषयेणैव । ग्राम्यत्वेनाम्निन्दोषे परिहृते पुनर्वचनं प्रपञ्चार्थम् ॥

मञ्जीरादिष्विति । दृष्ट्वेति । वाच्यार्थ के समान होने पर भी आगे कही जाने वाली धातुओं का प्रयोग पूर्वकवियों के प्रयोगों को देखकर (जिन अर्थों में प्रयोग की गयी है उन्हीं अर्थों में) प्रयोग करना चाहिए। अन्य अर्थों में नहीं। क्यों कि वे ही उदाहरण दूसरे स्थलों के भी व्यवस्थापक हैं। मञ्जीर-नूपुर। (कारिका में) आदि पद से रशना, घण्टा आदि का ग्रहण होता है। 'रणितप्रायान्' में प्राय का ग्रहण 'क्वणति' 'शिञ्जति' 'गुञ्जति' आदि समान व्यापार वालों के लिये आया है। (इसी प्रकार) प्रभृति का ग्रहण 'वाशति' आदि के लिये हुआ है। सुरत का ग्रहण अन्य व्यापार के निराकरण के लिये किया गया है। 'मेघादिषु' में आदि का ग्रहण सिंह, गज आदि के लिये आया है। प्राय का ग्रहण ध्वनति आदि के लिये आया है। 'एव प्रायान्' का तात्पर्य है कि इसी प्रकार के जो (अन्य) प्रयोग सामान्यतः शास्त्रों में पढ़े जाते हैं और विशेष में देखे जाते हैं। जैसे 'हेषति' घोड़ों में, 'भणति' पुरुषों में, 'क्वणति' पीड़ितों में और 'वाति' वायु में। (ये प्रयोग) अन्यत्र नहीं पाये जाते हैं। 'पुरुषो

वाति' ऐसा प्रयोग नहीं मिलता है। इसी प्रकार अन्य उदाहरण भी समझने चाहिए। अन्यत्र ये (प्रयोग) अनुचित हैं। अर्थात् जैसे मेघ आदि में 'मेघः रणति' आदि प्रयोग। अपि शब्द विस्मय अर्थ में आया है। यह आश्चर्य है कि शब्द और अर्थ के समान होने पर भी वस्तुविषयक ग्राम्यत्व इन शब्दों में आ जाता है। ग्राम्यत्व से इस दोष के परिहार के लिये पुनः कथन विस्तार मात्र होगा॥

अथ देश्यमाह—

प्रकृतिप्रत्ययमूला व्युत्पत्तिर्नास्ति यस्य देश्यस्य।
तन्मडहादि कथंचन रूढिरिति न संस्कृते रचयेत्॥ २७॥

आगे देशी पद का उदाहरण देते हैं—'जिस देशी पद की प्रकृति, प्रत्यय-मूलक, व्युत्पत्ति असम्भव है उस (महाराष्ट्रादि में प्रसिद्ध) मडह आदि पद की रूढि की भ्रान्ति से संस्कृत में रचना नहीं करनी चाहिए॥ २७॥

प्रकृतीति। विशिष्टदेशे भवं देश्यम्। महाराष्ट्रादिदेशप्रसिद्धम्। देशीयं पदं संस्कृते न रचयेत्। यस्य पदस्य प्रकृतिप्रत्ययमूला व्युत्पत्तिर्न विद्यते तच्च मडहादि। तत्र मडहढक्कहोरणघुघुलमकंदोट्टएलहुकसयरयअलवकुसुमालवाणयालादिकं यथाक्रमं सूक्ष्मश्रेष्ठवस्त्रपटमण्डपपद्महरिद्राञ्जलिसुवर्णकारकुक्कुटचौरशक्रादिवाचकं कथंचिदपि नैव रचयेदित्यर्थः। ननु देश्यप्राकृतभेदत्वात्कथं संस्कृते प्रयोगप्रसङ्ग इत्याह—रूढिरिति। रूढिभ्रान्त्या न बध्नीयात्। कश्चिद्वयास्मद्देशप्रसिद्धार्थं शब्दं सर्वत्रायं वाचक इति मन्यमानः प्रयुञ्जीत। 'व्युत्पत्तिर्यस्य नास्ति' इति वचनात्तु सव्युत्पत्तिकं देश्यं कदाचित्प्रयुञ्जीतेत्युक्तं भवति। यथा दूर्वाया छिन्नोद्भवाशब्दः। ताले भूमिपिशाच। शिवे महानटः। वृक्षे परशुरुजः। समुद्रनवनीतं चन्द्रामृतयो। जले मेघक्षीरशब्दः। एवमन्येऽपि॥

प्रकृतीति। विशिष्ट देश में प्रचलित (पद) देशी होता है। (जैसे) महाराष्ट्र आदि देश में प्रचलित। संस्कृत में देशी पद का प्रयोग नहीं करना चाहिए। जिस पद की प्रकृति प्रत्ययमूलक व्युत्पत्ति नहीं होती वह है मडह आदि।

प्रश्न है कि देशी प्राकृत तो (संस्कृत से) भिन्न है फिर संस्कृत में उसके (शब्दों के) प्रयोग का प्रसङ्ग ही क्या है—इसे बताते हैं—रूढिरिति। रूढि के भ्रम से रचना नहीं करनी चाहिए। शायद कोई अपने देश में प्रसिद्ध अर्थ वाले शब्द को 'यह सर्वत्र वाचक है'—यह समझकर प्रयोग न करे। 'व्युत्पत्तिर्नास्ति यस्य'—इस कथन का तात्पर्य है कि जिस देशी पद की व्युत्पत्ति

हो सक्ती है उसका तो प्रयोग कभी हो भी सक्ता है। जैसे, दूर्वा अर्थ मे 'छिन्नोद्भवा' शब्द। ताल में 'भूमि पिशाच' शिव मे 'महानट' वृक्ष में परशुरज, चन्द्र और अमृत में समुद्र नवनीत और जल में मेघ और क्षीर शब्द। इसी प्रकार अन्य उदाहरण भी ढूँढ लेने चाहिए॥

अथ दोषानुपसंहर्तुमाह—

इत्थं पददोषाणां दिङ्मात्रमुदाहृतं हि सर्वेषाम्।
तस्मादनयैव दिशा ततोऽन्यदभ्यूह्यमभियुक्तैः॥ २८॥

अब दोषों का उपसंहार करने के लिये कहते हैं—'इस प्रकार सभी दोषों की दिशा का उन्मीलन मात्र किया गया। अतएव कवियों को चाहिए कि वे इसी प्रकार उपरि-वर्णित दोषों की भी उद्भावना करें॥ २८॥

इत्थमिति। इत्थमनेन पूर्वोक्तप्रकारेण पददोषाणां सर्वेषां दिगेव दिङ्मात्रं हियस्मादुदाहृतं निदर्शितं तस्मादनयैव दिशान्यदपि दोषजातं स्वयमूहनीयम्॥

इत्यमिति। इस प्रकार उपरिवर्णित रीति से समस्त पद-दोषों की दिशामात्र का निदर्शन किया गया। अतएव इसी दिशा से अन्य समस्त दोषों की उद्भावना स्वयं कर लेनी चाहिए।

पूर्वमुक्तमधिकपदं वाक्यं न प्रयोक्तव्यमथ च दृश्यते क्वचिदसकृत्प्रयोगस्तदतिव्याप्तिसंहारमाह—

वक्ता हर्षभयादिभिराक्षिप्तमनास्तथा स्तुवन्निन्दन्।
यत्पदमसकृद् ब्रूयात्तत्पुनरुक्तं न दोषाय॥ २९॥

पहले कहा गया है 'अधिक पद वाक्य का प्रयोग नहीं करना चाहिए' फिर कहीं अनेक बार प्रयोग क्यों किया जाता है—इस अतिव्याप्ति का निवारण करने के लिये कहते हैं—

'वक्ता जब हर्ष या भय से मन के आक्षिप्त होने के कारण प्रशंसा अथवा निन्दा करता हुआ किसी पद का अनेक बार प्रयोग करता है। तब वहाँ पुनरुक्ति दोष नहीं होती॥ २९॥

वक्तेति। वक्ता प्रतिपादको हर्षभयादिभिराक्षिप्तचित्तः सन्यत्पदमेकस्मिन्नेवार्थे पुनः पुनर्वक्ति तत्पुनरुक्तत्वं दोषाय न भवति। अपि त्वलंकारायेत्यर्थः। आदिग्रहणाद्विस्मयशोकादिसंग्रहः। तथाशब्दः समुच्चये॥

वक्तेति। वक्ता प्रसन्नता एवं भय आदि के कारण चित्त के विक्षिप्त होने पर एक ही अर्थ में जब पद का असकृत् प्रयोग करता है तब पुनरुक्ति दोष नहीं

होती है। किन्तु वह यहाँ अलङ्कार स्वरूप ही होती है। (कारिका में) आदि के ग्रहण से विस्मय, शोक आदि का संग्रह होता है। तथा शब्द समुच्चय के अर्थ में आया है॥

निदर्शनमाह—

वद वद जितः स शत्रुर्न हतो जल्पंश्च तव तवास्मीति।
चित्रं चित्रमरोदीद्धा हेति परं हते पुत्रे॥ ३०॥

उदाहरण देते हैं—बताओ! बताओ! "वह शत्रु जीत लिया गया। और तुम्हारा तुम्हारा यह कहता हुआ! आश्चर्य! आश्चर्य!! खेद है! खेद है!! इस प्रकार रोने लगा। हा! हा!! इस प्रकार पुत्र के मारे जाने पर॥ ३०॥

जय जय वैरिविदारण कुरु कुरु पादं शिरःसु शत्रूणाम्।
धिग्धिक्तमरिं यस्त्वामप्रणमन् स्वं विनाशयति॥ ३१॥

शत्रुओं का विनाश करने वाले (राजन्) विजयी हो! विजयी हो!! शत्रुओं के मस्तक पर चरण रखें!!! उस शत्रु को धिक्कार है जो आप को प्रणाम न करके अपने को नष्ट कर देता है॥ ३१॥

वदेति। जयेति। अत्र वद वदेति। हर्षे। तव तवास्मीति भये। चित्रं चित्रमिति विस्मये। हा हेति शोके। जय जयेति स्तुतौ। कुरु कुर्विति त्वरायाम्। धिग्धिगिति निन्दायाम्। अन्यन्निगदसिद्धम्॥

वदेति। जयेति। यहाँ 'वद' और 'जय' शब्द भय अर्थ में आये हैं। (तथा) 'तव तवास्मि' भय में, 'चित्र चित्रम्' विस्मय में, 'जय जय' स्तुति, 'कुरु कुरु' त्वरा और 'धिग्धिक्' निन्दा अर्थ में आये हैं। शेष स्पष्ट है॥

भूयोऽप्याह—

यत्पदमर्थेऽन्यस्मिंस्तत्पर्यायोऽथवा प्रयुज्येत।
वीप्सायां च पुनस्तन्न दुष्टमेवं प्रसिद्धं च॥ ३२॥

और भी बताते हैं—'जो पद अन्य अर्थ में पुनः प्रयुक्त होता है अथवा उसका पर्याय पुनः प्रयुक्त किया जाता है अथवा वीप्साद्योतनार्थ जहाँ कोई पद पुनरुक्त होता है वहाँ पुनरुक्ति दोष नहीं होती ऐसा (महाकवियों में) प्रसिद्ध है (और लोक में भी प्रसिद्ध है)॥ ३२॥

यदिति। यत्पदमन्यमर्थमभिधातु द्विः प्रयुज्यते तत्। तथा तस्य प्रयुक्तपदस्य पर्यायो वाचको यः प्रयुज्येत। तथा वीप्साप्रतिपादनार्थं वा यत्पुनः पदं प्रयुज्येत तत्पदं न पुनरुक्तदोषदुष्टं भवति। एवं प्रसिद्धं च। इत्येवं वीप्सातुल्यरूपेण प्रकारेण यत्कविलक्ष्येषु प्रसिद्धं तदपि पुनरुक्तं

न दोषाय। यथा कलकलरणकादिकम्। तथैव लोके प्रसिद्धत्वादिति। ननु तुल्यपदस्य तत्पर्यायपदस्य वान्यार्थत्वेन वीप्सावाचकस्य वीप्साप्रतिपादकत्वेन तदर्थत्वादेव पुनरुक्तिर्न दुष्टा तत्किमनेनेति सत्यम्। किं तु कश्चिदतिमन्दमतिः पुनः प्रयोगं दृष्ट्वा दुष्टत्वमाशङ्केतेति॥

यदिति। जो पद भिन्न अर्थ का अभिधान करने के लिये दो बार प्रयोग किया जाता है वह, तथा उस (एक बार) प्रयुक्त पद का पर्यायवाचक जो प्रयुक्त होता है तथा वीप्सा अर्थ में जो पद दुबारा प्रयोग किया जाता है वह पुनरुक्ति दोष से दुष्ट नहीं होता है। ऐसा प्रसिद्ध भी है। इसी प्रकार वीप्सा के समान अर्थ में जो कवियों के उदाहरणों में प्रसिद्ध है वह भी पुनरुक्त दुष्ट नहीं होता। जैसे, कल-कल, रणरणक आदि। क्यों कि वे (प्रयोग) लोक में इसी रूप में प्रसिद्ध हैं। तो समान पद के एवं उसके पर्यायवाचक पद के भिन्न अर्थ में प्रयुक्त होने के कारण और वीप्साद्योतक होने के कारण उसी अर्थ की पुष्टि होने से पुनरुक्ति दोष नहीं होती तो इस कथन का क्या लाभ। सत्य है। किन्तु कोई स्वल्प बुद्धि वाला दुबारा प्रयोग को देखकर शायद दोष मान बैठे इस लिये (यह प्रपञ्च कहा गया)॥

क्रमेण निदर्शनमाह—

गजरक्तरक्तकेसरभारः सिंहोऽत्र तनुशरीरोऽपि।
दिशि दिशि करिकुलभङ्गं वारंवारं खरैः कुरुते॥ ३३॥

क्रमशः उदाहरण देते हैं—'हाथी के रुधिर से रञ्जित केसर के भार वाला, स्वल्पकाय भी सिंह इस वन में प्रत्येक दिशा में अपने नखों से हाथियों के झुण्डों का विदारण करता है॥ ३३॥'

गजेति। प्रथमेऽत्र पादे रक्तशब्दावन्यार्थौ। एको रुधिरवाचकोऽपरस्तु रञ्जनक्रियाभिधायी। तनुशरीर इत्यत्र अनुशब्दस्तानवाभिधायी तत्पर्यायः शरीरशब्दः कायवाचकः। दिशि दिशीति वीप्सायाम्। सर्वस्यां दिशीत्यर्थः। वारंवारमिति लोकप्रसिद्धम्। अन्यदपि लोकप्रसिद्धं दृश्यते। यथा—'मानिनीजनविलोचनपातानुष्णबाष्पकलुषान्प्रतिगृह्णन्। मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शीतमयूखः॥' यथा—'ता किंपि किंपि ता पह बोअव्वो निमीलियच्छीहिम्। कडुओसई व पिज्जइ अहरो घेरस्स तरुणीहिम्॥' उद्धरन्तु सर्वत्रात्र पुनरुक्ताभासालंकारत्वमाचष्टे॥

गजेति। यहाँ प्रथम चरण में दोनों रक्त शब्द भिन्नार्थक हैं—एक खून का वाचक है और दूसरा रञ्जन क्रिया का अभिधायक। 'तनुशरीर' में तनु शब्द

कृशता का वाचक है और उसका पर्याय शरीर शब्द काय का वाचक है। 'दिशि दिशि' यह प्रयोग वीप्सा अर्थ में आया है। अर्थात् 'सभी दिशाओं में' यह अर्थ है। 'वारवारम्' लोकप्रसिद्ध ही है। और भी लोकप्रसिद्ध उदाहरण मिलते हैं। जैसे—'मानिनी नायिकाओं के नेत्र से गिरे हुये शीतल बाष्प (आँसू) से मदूप को पुनः लेकर शनैः शनैः प्रसन्न हुआ चन्द्रमा आकाश में चला गया।' अतएव किसी-किसी प्रकार, बताओ नेत्रों को बन्द किये हुये घर की तरुणियों के द्वारा कड़वी दवा के समान विश्वासपूर्वक अधर-पान कैसे किया जाता है॥ प्रथम उदाहरण में मन्द-मन्द और दूसरे में किंपि किंपि पद आवृत्त हुये हैं। उद्भट ने यहाँ सर्वत्र पुनरुक्तवदाभास अलङ्कार माना है॥

प्रकारान्तरमाह—

यत्र प्रतिपत्ता वा न प्रतिपद्येत वस्तु सकृदुक्तम्।
तत्र पदं वाक्यं वा पुनरुक्तं नैव दोषाय॥ ३४॥

अन्य प्रकार बताते हैं—जहाँ प्रतिपत्ता एक बार कही गयी वस्तु को न समझ सके वहाँ दुबारा प्रयोग किया गया पद अथवा वाक्य पुनरुक्त दोष से दुष्ट नहीं होता॥ ३४॥

यदिति। यद्वस्तु सकृदेकवारमुक्तं सत्प्रतिपत्ता। वाशब्दोऽवधारणे। प्रतिपत्तैव न प्रतिपद्येत तत्र वस्तुनि वाच्ये पदं वाक्यं वा नैव दोषाय। च समुच्चये। तच्च पदं निर्दोषपदमध्ये समुच्चीयत इत्यर्थः॥

यदिति। जो वस्तु एक बार कथित होकर—प्रतिपत्ता (बोद्धा)—वा शब्द अवधारण अर्थ में आया है—बोद्धा ही न समझ सके उस वस्तु के (बोद्धा को समझाने के लिये) वाच्य होने पर पुनरुक्त पद या वाक्य दुष्ट नहीं होता। (च) समुच्चय अर्थ में आया है। उस (पुनरुक्त) पद की गणना अदुष्ट पदों में की जाती है॥

उदाहरणमाह—

किं चिन्तयसि सखे त्वं वच्मि त्वामस्मि पश्य पश्येदम्।
ननु किं न पश्यसीदृक्पश्य सखे सुन्दरं स्त्रैणम्॥ ३५॥

उदाहरण देते हैं—हे मित्र! तुम क्या सोच रहे हो? तुमसे मैं कह रहा हूँ। यह मैं हूँ। देखो! देखो इसे!! अरे, क्यों नहीं देखते हो? स्त्रियों के इस सुन्दर झुण्ड को देखो तो॥ ३५॥

किमिति। कश्चिन्मित्रमाह—हे सखे, इदमीदृक्सुन्दरं रम्यं स्त्रैणं स्त्रीसमूहं पश्येति। तेन त्वन्यगतचित्तत्वान्न श्रुतमतः स पुनराह—किं

चिन्तयसीत्यादि । अत्र पश्य पश्येति पदपौनरुक्त्यं नन्वित्यादि तु वाक्यपौनरुक्त्यम् । ननुरभिमुखीकरणे ॥

रम्यमिति । कोई मित्र से कह रहा है—इस सुन्दर स्त्री जन को देखो । किसी अन्य वस्तु पर ध्यान होने के कारण उसने फिर कहा—कि चिन्तयसीत्यादि । यहाँ 'पश्य पश्य' पद पुनरुक्ति का उदाहरण है और ननु इत्यादि वाक्य-पुनरुक्ति का । ननु (अपनी ओर) ध्यान दिलाने के अर्थ में आया है ।

भूयोऽप्याह—

अन्याभिधेयमपि सत्प्रयुज्यते यत्पदं प्रशंसार्थम् ।
तस्य न दोषाय स्यादाधिक्यं पौनरुक्त्यं वा ॥ ३६ ॥

और भी कहते हैं—जिस पद का वाच्यार्थ दूसरा होता है वह जब सुन्दर अर्थ देने के लिये प्रयुक्त किया जाता है तो उसका आधिक्य या पुनरुक्ति दोष नहीं होता ॥ ३६ ॥

अन्येति । प्रशंसालक्षणादर्थादन्यदभिधेयं वाच्यं यस्य पदस्य तदित्थंभूतमपि सत्प्रशंसार्थं प्रयुज्यते यतस्तस्याधिक्यं पौनरुक्त्यं वा दोषाय न भवति । अन्याभिधेयस्य हि प्रस्तुतार्थानुपयोगिनः प्रयोगे स्यादाधिक्यं स्यात् । पदान्तरेणैवोक्तनदर्थस्य तु पौनरुक्त्यं स्यात् । ननु यद्यन्याभिधेयं कथं प्रशंसार्थं प्रयोगः, प्रयोगश्चेन्नान्याभिधेयमिति । सत्यम् । अन्याभिधेयस्यापि प्रशंसार्थगमकतास्तीति । यथा मुनिशार्दूलः, कर्णतालः, केशपाशः, नृपपुंगवः, गोनागः, अश्वकुञ्जरः । तथा चूतवृक्षः, मलयाचलः, इत्यादिषु शार्दूलादिशब्दानां व्याघ्रादिवाचित्वेनान्याभिधेयत्वेऽपि, वृक्षादीनां तु पदान्तरोक्तार्थत्वेऽपि प्रशंसार्थगमकत्वेन न दुष्टतेति ॥

अन्येति । प्रशंसारूप अर्थ से भिन्न अभिधेय (वाच्य) जिस पद का होता है इस प्रकार का भी पद जब प्रशंसा अर्थ में प्रयोग किया जाता है तब उसकी अधिकता या पुनरुक्ति सदोष नहीं होती । भिन्न वाच्य वाले प्रस्तुत अर्थ के लिये अनुपयोगी (पद) का प्रयोग होने पर आधिक्य होगा । अन्य पद से उस (पद) के अर्थ के कथित होने पर पुनरुक्ति होगी । प्रश्न उठता है कि यदि (उस पद का) वाच्य अन्य ही है तो प्रशंसा के लिये उसका प्रयोग कैसे होगा और यदि प्रयोग होगा ही तो अभिधेय (वाच्य) भिन्न नहीं होगा । सत्य है । भिन्न अभिधेय वाले शब्द में भी प्रशंसा अर्थ की प्रतीतिबोधकता होती ही है । जैसे 'मुनिशार्दूल' कर्णताल, केशपाश, नृपपुंगव, गोनाग (और) अश्वकुञ्जर (यहाँ शार्दूल आदि व्याघ्ररूप अर्थ के वाचक होकर मुनि आदि के साथ प्रयुक्त होकर प्रशंसा अर्थ देते हैं) ।

इसी प्रकार चूतवृक्ष, मलयाचल आदि में। शार्दूल आदि शब्दों की व्याघ्र आदि की वाचकता होने पर अभिधेय (वाच्य) के भिन्न होने पर भी, वृक्ष आदि अन्य (चूत आदि) के द्वारा अर्थ के कथित होने पर भी प्रशंसा अर्थ की प्रतीति कराने के कारण सदोष नहीं है॥

निदर्शनमाह—

नासीरोद्धतधूलीधवलितसकलारिकेशहस्तस्य।

अविलङ्घ्योऽयं महिमा तव मेरुमहीधरस्येव॥ ३७॥

उदाहरण देते हैं—'सेना से उठी हुयी धूल से धूसरित किये हुये सभी शत्रुओं के केशकलापों वाले मेरु पर्वत के समान आपकी यह महिमा अलङ्घनीय है'॥ ३७॥

नासीरेति। नासीरं सैन्यं तदुत्खातधूल्या धवलिता. सकलारीणां केशहस्ता केशकलापा येन तस्य तवाविलङ्घनीयो महिमा। कस्येव। मेरुमहीधरस्येव मेरुपर्वतस्य यथा। अत्र हस्तशब्दस्य पाणिवाचकत्वान्यार्थस्यापि नाधिक्यम्। महीधरशब्दस्य च मेरुपदान्तरेण गतार्थस्य न पौनरुक्त्यम्। प्रशसार्थत्वादिति॥

नासीरेति। सेना से उठी हुयी धूल से समस्त शत्रुमण्डल के केशकलाप को धूसरित करने वाले तुम्हारी अलङ्घनीय महिमा है। किसकी जैसी। मेरुपर्वत जैसी। यहाँ 'हाथ' के वाचक भिन्न अर्थ वाले हस्त शब्द में (दोष) आधिक्य नहीं है। (तथा) महीधर शब्द के मेरुपद से ही अर्थ कथित होने पर भी पुनरुक्ति नहीं है। क्योंकि (दोनों पद) प्रशसार्थक हैं॥

परस्परं संबद्धपदं वाक्यं प्रयुञ्जीतेति यदभ्यधायि तदतिव्याप्तिं संजिहीर्पुराह—

यस्मिन्ननेकमर्थं स्वयमेवालोचयेत्तदर्थानि।

जल्पन्पदानि तेषामसंगतिर्नैव दोषाय॥ ३८॥

एक दूसरे से सबद्ध पद वाले वाक्य का प्रयोग करना चाहिए—यह जो कहा है उस अतिव्याप्ति का निवारण करने के लिये कहते हैं—

'जिस (वाक्य) में अनेकार्थक पदों को बोलता हुआ (वक्ता) स्वय ही अनेक अर्थों का परामर्श करता है उन (वाक्य और पदों) की असगति सदोष नहीं मानी जाती है॥ ३८॥

यस्मिन्निति। यस्मिन्वाक्ये वक्तानेकार्थवाचकानि पदानि जल्पन्स्वयमेवानेकमर्थमालोचयति तेषां तद्वाक्यपदानामसंगतिर्नैव दोषाय। विव-

क्षावशेन हि शब्दाः प्रयुज्यन्ते। वक्ता चेत्स्वयं विलक्षणमनेकार्थं वस्तुकामोऽन्योन्यमसंबद्धानि पदानि ब्रूते तत्किमसांगत्यम्। असंबद्धत्वाच्च दोषाशङ्का चेति स्वयमङ्गान्तरेण यत्र प्रतिपाद्यते तत्रासंगतिर्दुष्टैव। यथा— 'आषाढी कार्तिकी माघी वचा हिङ्गु हरीतकी। पदस्यैतन्महच्चित्रमायुर्मर्माणि कृन्तति'॥

यन्निति। जिस वाक्य में वक्ता अनेकार्थ वाचक पदों को बोलता हुआ स्वयं ही अनेक अर्थों की आलोचना करता है उन वाक्य और पदों की असंगति सदोष नहीं मानी जाती है। क्योंकि (यहाँ) शब्दों का प्रयोग विवक्षा के अधीन किया जाता है। यदि वक्ता ही अनेक अर्थों को कहने की इच्छा से परस्पर असंबद्ध पद बोलता है तो भला क्या असंगति होगी। और असंबद्ध होने के कारण यहाँ (दोष की) आशङ्का हो और (इस प्रकार का) वक्ता यहाँ स्वयं परामर्श करे एवं दूसरा (दोष) की उद्भावना करे वहाँ असंगति सदोष ही होती है। जैसे—आषाढ़ की पूर्णिमा, कार्तिक की पूर्णिमा, माघ की पूर्णिमा, वचा (सुगन्धक पदार्थ) हींग और हर्रें—देखो यह आश्चर्य है। आयु मर्मों का भेदन करती है। (यहाँ वक्ता स्वयं दोष की उद्भावना करता है दूसरों के मत से भी यहाँ असंगति स्पष्ट है)।

उदाहरणमाह—

कुसुमभरः सुतरूणामहो नु मलयानिलस्य सेव्यत्वम्।
सुमनोहरः प्रदेशो रूपमहो सुन्दरं तस्याः॥ ३९॥

उदाहरण देते हैं—सुन्दर वृक्षों की पुष्पसमृद्धि! मलयपवन क्या ही सेवनीय है!! स्थान कितना रमणीक है!!! और उसका रूप क्या ही सुन्दर है॥३९॥

कुसुमभर इति। एतत्कश्चित्कामी मलयोद्याने तरुणीं दृष्ट्वा स्वयमेव पर्यालोचयति। तच्चिन्तितमिदम्॥

कुसुमभर इति। इसे कोई कामी मलयवन में युवती को देखकर स्वयं ही अनुभव करता है। यह स्पष्ट ही है॥

इदानीं वाक्यदोषमाह—

वाक्यं भवति तु दुष्टं संकीर्णं गर्भितं गतार्थं च।
यत्पुनरनलंकारं निर्दोषं चेति तन्मध्यम्॥ ४०॥

अब वाक्य दोष कहते हैं—संकीर्ण, गर्भित और गतार्थ (इन) दोषों से वाक्य दुष्ट होता है। तथा जिस वाक्य में कोई अलङ्कार नहीं होता एवं दोष नहीं होता उसे मध्यम वाक्य कहते हैं॥ ४०॥

वाक्यमिति । तु पुनरर्थे । वाक्यं पुनः संकीर्णगर्भितगतार्थरूपं दुष्टं भवति । ननु वाक्यस्य पदात्मकत्वात्पदद्वारेणैव तद्दोष उक्त इति किं पुनरुच्यते । सत्यम् । किं तु सन्ति तादृशानि वाक्यानि येषु पददोषाभावेऽपि वाक्यस्य दुष्टता भवति । यथा—'गौरीक्षण भूधरजाह्निनाथ, पत्र तृतीयं दयितोपनीतम् । यस्याम्बरं द्वादशलोचनाद्यः काप्रासुत पातु सदाशिवो वः ।।' कुसुमभर इत्यादौ वाक्यार्थानामसंगतिरिह तु वाक्यानामिति विशेषः । ननूपादेयत्वादलंकारनिर्देश एव न्याय्यः, ततोऽन्यत्सर्वमनुपादेयमिति सेत्स्यति, किं संकीर्णादिलक्षणोक्तिप्रयासेनेत्यत आह—च-पुनरित्यादि । यदलंकारशून्यं निर्दोषं च तन्मध्यमवाक्यम् । एतदुक्तं भवति—यदि हेयोपादेयपक्षद्वयमेव स्यात्तदालंकारनिर्देश एव । यावता तृतीयं मध्यममपि वाक्यं विद्यत एवेति सर्वमेव वक्तव्यम् ।।

वाक्यमिति । तु पुनः अर्थ में आया है । फिर वाक्य संकीर्ण, गर्भित और गतार्थ दोष से दुष्ट होता है । प्रश्न उठता है कि वाक्य के पदों के ही द्वारा विरचित होने के कारण पद के ही द्वारा वाक्य के दोष का भी कथन हो गया फिर इस दुबारा कथन से क्या ? सत्य है । किन्तु ऐसे भी वाक्य हैं जिनमें पद-दोष का अभाव होने पर भी वाक्य दुष्ट होता है । जैसे—

'कुसुमभर' आदि में वाक्यार्थों में असंगति है और यहाँ वाक्यों में—यह दोनों में भेद है । प्रश्न उठता है कि उपादेय होने के कारण अलङ्कार का ही वर्णन उचित उसके अतिरिक्त सब कुछ अनुपादेय है अतएव अनपेक्षित है । इस संकीर्ण आदि के लक्षण के कथन करने के प्रयास से क्या ? इसका उत्तर देते हैं—जो अलंकार से रहित और दोष से मुक्त वाक्य होता है वह मध्यम-कोटि का होता है तात्पर्य यह हुआ कि यदि उपादेय और अनुपादेय दोनों ही पक्ष होंगे तभी अलंकार का निर्देश होगा । चूँकि तृतीय कोटि का मध्यम वाक्य भी होता है अतएव सबका वर्णन अपेक्षित है ।।

अथ संकीर्णलक्षणमाह—

वाक्येन यस्य साकं वाक्यस्य पदानि सन्ति मिश्राणि ।
तत्संकीर्णं गमयेदनर्थमर्थं न वा गमयेत् ।। ४१ ।।

अब संकीर्ण का वर्णन करते हैं—'जिस वाक्य के पद अन्य वाक्य के साथ मिले रहते हैं, उसे संकीर्ण वाक्य जानना चाहिए । उससे या तो अनर्थ का बोध होता है या अर्थ का बोध ही नहीं होता' ।। ४१ ।।

वाक्येनेति। यस्य वाक्यस्य वाक्यान्तरेण सह मिश्राणि पदानि भवन्ति तत्संकीर्णं नाम। किमित्येतावता तस्य दुष्टत्वमत आह—यस्मादेतन्न। यत कारणाद्विवक्षितमर्थं वा न गमयेत्ततस्तद्दुष्टमित्यर्थः॥

वाक्येनेति। जिस वाक्य के पद अन्य वाक्य के साथ मिश्रित होते हैं उसे सङ्कीर्ण कहते हैं। क्या इतने से ही वह सदोष हो जाता है, इसके उत्तर में कहते हैं (क्योंकि) वह अनर्थ की प्रतीति कराता है। चूँकि यह विवक्षित अर्थ की ही प्रतीति नहीं कराता अतएव दुष्ट होता है—यह अर्थ है॥

उदाहरणमाह—

किमिति न पश्यसि कोपं पादगतं बहुगुणं गृहाणेनम्।
ननु मुञ्च हृदयनाथं कण्ठे मनसस्तमोरूपम्॥ ४२॥

उदाहरण देते हैं—'चरणों पर पड़े हुये, गुणशाली प्रियतम को क्यों नहीं देख रही हो—इन्हें हृदय से लगाओ। मन के अन्धकाररूप इस क्रोध को त्याग दो॥ ४२॥'

किमिति। काचित्सखी मानिनीं वक्ति—किमिति। कस्मात्पादगतं हृदयनाथं प्रियं बहुगुणं न पश्यसि। ननु मनसस्तमोरूपं कोपं मुञ्च त्यज। एनं च प्रियं कण्ठे गृहाण। इत्येवंविधो वाक्योऽत्र विवक्षितः। पदानां तु मिश्रत्वाद् दुष्टोऽर्थो गम्यते। यथा—पादपतितं कोपं कस्मान्न पश्यसि। एनं च कोपं बहुगुणं गृहाण। मनसो हृदयाच्च तमोरूपं हृदयनाथं वल्लभं मुञ्च त्यजेति॥

किमिति। कोई सखी मानिनी से कह रही है—किमिति। पैरों पर पड़े हुये गुणवान् प्रियतम को क्यों नहीं देख रही हो। मन के अन्धकाररूप क्रोध को त्याग दो—इन प्रियको हृदय से लगाओ—इस प्रकार का वाक्य यहाँ (वक्ता को) अभीष्ट है। पदों के मिले होने के कारण दोषपूर्ण अर्थ का बोध होता है। जैसे—पैरों पर पड़े हुये क्रोध को क्यों नहीं देख रही हो। इस गुणवान् क्रोध को ग्रहण करो। अन्धकाररूप प्रियतम को हृदय से त्याग दो॥

गर्भितमाह—

यस्य प्रविशेदन्तर्वाक्यं वाक्यस्य संगतार्थतया।
तद्गर्भितमिति गमयेन्निजमर्थं कष्टकल्पनया॥ ४३॥

गर्भित का उदाहरण देते हैं—'जिस वाक्य में अर्थ की सङ्गति के कारण दूसरा वाक्य प्रवेश कर जाता है उसे गर्भित वाक्य जानना चाहिए। (वह) अपने अर्थ की प्रतीति बड़ी कठिनाई से कराता है॥ ४३॥'

यस्येति। यस्य वाक्यस्यान्यद्वाक्यं समृद्धार्थत्वेनान्तर्मध्ये प्रविशेत्तद्गर्भितं नाम। का तस्य दुष्टतेत्याह—गमयेत्त्रिजमर्थमभिधेयं कष्टकल्पनया क्लेशेनेति॥

यस्येति। जिस वाक्य में अर्थ की समृद्धि के कारण दूसरा वाक्य प्रविष्ट होता है उसे गर्भित वाक्य कहते हैं। उसमें दोष क्या होता है—इसे बताते हैं—'अपने वाच्य का बोध बड़ी कठिनाई से कराता है॥'

निदर्शनमाह—

योग्यो यस्ते पुत्रः सोऽयं दशवदन लक्ष्मणेन मया।
रक्षैनं मृत्युमुखं प्रसह्य लघु नीयते विवशः॥ ४४॥

उदाहरण देते हैं—हे रावण! जो तुम्हारा योग्य पुत्र है वह बलात् मुझ लक्ष्मण के द्वारा परवश बनाकर शीघ्र ही काल के मुख में ले जाया जा रहा है। इसकी रक्षा करो॥ ४४॥

योग्य इति। अङ्गदमुखेन लक्ष्मणो रावणमाह—हे दशवदन, योग्यो यस्ते तव पुत्र सोऽयं मया लक्ष्मणेन प्रसह्य हठान्मृत्युमुखं विवशः परवश. सल्लघु शीघ्रं नीयते तस्माद्रक्षैनम्। अत्र रक्षैनमिति गर्भवाक्यं यावन्मध्यान्नोद्धृत्य पृथक् कृतं तावन्मूलवाक्यं कष्टकल्पनयार्थं गमयति॥

योग्य इति। अङ्गद के द्वारा लक्ष्मण रावण से कहलवा रहे हैं—हे रावण! जो तुम्हारा वीर पुत्र है वह अब मुझ लक्ष्मण के द्वारा बलात् परवश बनाकर शीघ्र काल के मुख में ले जाया जा रहा है। अतः इसकी रक्षा करो। यहाँ 'रक्षैनम्' यह बीच का वाक्य जब तक बीच से निकाल कर पृथक् नहीं कर दिया जाता तब तक मुख्य वाक्य (अपना अर्थ) बड़े कष्ट से दे पाता है॥

गतार्थमाह—

यस्यार्थः सामर्थ्यादन्यार्थैरेव गम्यते वाक्यैः।
तदिति प्रबन्धविषयं गतार्थमेतत्ततो विद्यात्॥ ४५॥

गतार्थ का उपन्यास करते हैं—'जिस (वाक्य) का अर्थ अन्य अर्थ वाले वाक्यों के परामर्श से ही प्रतीत होता है उसे गतार्थ (वाक्य) जानना चाहिए। इसके उदाहरण प्रबन्ध हैं अतएव इसे वहीं से जानना चाहिए॥४५॥'

यस्येति। यस्य वाक्यस्यार्थोऽभिधेयं प्रयोजनं वान्याभिधेयैर्वाक्यैर्गम्यते। एवकारो भिन्नक्रमे। गम्यत एवेत्येवं द्रष्टव्यम्। कथं गम्यते सामर्थ्यात्। अन्यार्थानामपि तदर्थाभिधानशक्तियुक्तत्वादित्यर्थः। तदित्येवंप्रकारं वाक्यं गतार्थम्। अथ कथमत्र नोदाहृतमित्याह—तदेतत्प्रबन्ध-

विषयं विपुलग्रन्थगोचरमतस्ततः प्रबन्धादेव विज्ञानीयात्। नान्यथा-ख्यानं शक्यम् इति। प्रबन्धे दर्श्यते यथा किरातार्जुनीयकाव्ये हिमाचल-वर्णने- 'मणिमयूखचयांशुकभासुराः सुरवधूपरिभुक्तलतागृहाः। दधतमु-च्चशिलान्तरगोपुराः पुर इवोदितपुष्पवना भुवः ॥' इत्यनेन श्लोकेन मण-योऽप्सरस उद्यानानि च सन्त्यतः सेव्योऽयं पर्वत इति प्रतिपाद्यते। एतच्चान्यार्थैर्वाक्यान्तरैरेव कथितम्। तद्यथा-'रहितरत्नचयान्न शिलो-च्चयानपलताभवना न दरीभुवः। विपुलिनाम्बुरुहा न सरिद्वधूरकुसुमान्द-धत न महीरुहः ॥' 'दिव्यस्त्रीणां सचरणलाक्षारागा रागायाते निपतित-पुष्पापीडाः। पीडाभाजः कुसुमचिताः साशंसं शंसन्त्यस्मिन्सुरतविशेषं शय्याः ॥'

यस्येति। जिस वाक्य का अर्थ (अभिधेय या प्रयोजन) अन्य (भिन्न) अभिधेय वाले वाक्यों से प्रतीत होता है—एवं भिन्न स्थान पर आया है—'गमन एव'—इस प्रकार अन्वय करना चाहिए। कैसे प्रतीत होता है?—'भिन्नार्थक होने पर भी उस (विवक्षित) अर्थ के अभिधान करने की सामर्थ्य होने के कारण'—यह अर्थ है—तो इस प्रकार का वाक्य गतार्थ होता है। फिर उसका उदाहरण यहाँ क्यों नहीं दिया—इसके उत्तर में कहते हैं—यह विशालकाय ग्रन्थों में ही मिलता है अतएव इसे वहीं से जानना चाहिए। इसका और विधियों से व्याख्यान नहीं हो सकता। प्रबन्ध में ही दिखलाया जाता है जैसे किरातार्जुनीय काव्य में हिमालय के वर्णन में 'मणियों के किरण पटलरूपी वस्त्र से प्रकाशमान, सुराङ्गनाओं के द्वारा सेवित लता-मण्डपों वाली, उन्नत शिलाओं के मध्य में बाहरी द्वारों वाली, पुर के समान खिले हुये पुष्पोद्यान वाली भूमियों को धारण करते हुये (हिमालय को देखा) ॥' इस श्लोक से '(यहाँ) मणि, अप्सरायें और उद्यान हैं अतएव यह पर्वत सेवनीय है'—यह प्रतिपादित होता है। यही बात भिन्न अभिधेय वाले वाक्यों से कही गयी है—वह जैसे—'रत्नों के बिना पर्वतमालाओं को न धारण करने वाले, लतामण्डप के बिना कन्दर-प्रदेश को न धारण करने वाले, किनारे पर बिना कमलों के सरित् रूप वधुओं को न धारण करने तथा फूलों के बिना वृक्षों को न धारण करने वाले (पर्वत को देखा) ॥ देवाङ्गनाओं की (पंक्ति) पैरों के लाख के रंग के साथ लाल वर्ण की हो रही है। अथवा देवाङ्गनाओं के चरणों की लाक्षा के राग के समान राग वाली, गिरे हुये शिरोभूषणों वाली, पीड़ा का हरण करने वाली, फूलों से व्याप्त शय्यायें विशेष सम्भोग या आशंसा के साथ प्रतिपादन कर रही हैं ॥'

अत्र यदेतन्मध्यमं वाक्यमुक्तमेतत्कविना किं कर्त्तव्यमुत नेत्याह—

पुष्टार्थालंकारं मध्यममपि सादरं रचयेत् ।
गामभ्याजेति यथा यत्किञ्चिदतोऽन्यथा तद्धि ॥ ४६ ॥

यहाँ जो मध्यम वाक्य का वर्णन किया उससे कवि का कोई प्रयोजन है अथवा नहीं इसे बताते हैं—

'हृदयावर्जक पुष्ट अर्थ हो जिस में अलङ्कार हो ऐसे मध्यम वाक्य की भी बड़े आदर से रचना करनी चाहिए। अपुष्टार्थ वाक्य 'गामभ्याज' की तरह अधिक उपादेय नहीं होता है ॥ ४६ ॥

पुष्टेति । मध्यममपि वाक्यं सादरं रचयेत् । किमविशेषेण नेत्याह—**पुष्टो हृदयावर्जकोऽर्थ एवालंकारो यस्य तत्तथाभूतम् ।** एतदुक्तं भवति—यद्यपि वक्रोक्त्याद्योऽलकारा न सन्ति तथापि तद्विवक्षितोऽर्थः सरस उत्कृष्टो वा विधेय । यथा—'भ्रूभेदो गुणितश्चिरं नयनयोरभ्यस्तमामीलनं रोद्धुं शिक्षितमादरेण हसितं मौनेऽभियोगः कृतः । धैर्यं कर्तुमपि स्थिरीकृतमिदं चेतः कथंचिन्मया बद्धो मानपरिग्रहे परिकरः सिद्धिस्तु दैवे स्थिता ॥' अपिशब्दो मध्यवाक्यस्यादुष्टवान्यमध्ये समुच्चयार्थः । अन्यालंकारविरहात्तत्र कस्यचिदनादरः स्यादिति सादरग्रहणम् । अथ किमित्यपुष्टार्थं मध्यं नाद्रियत इत्याह—यत्किञ्चिदित्यादि । हि यस्मादतः पुष्टार्थालंकाराद्यदन्यथान्यादृशमपुष्टार्थं तद् यत्किंचित् । नात्यादरणीयमित्यर्थः । किमिव । यथा—गामभ्याजेति । 'देवदत्त गामभ्याज शुक्लां दण्डेन' इत्यत्र न शब्दार्थदोषो नापि कश्चिदलंकारो न चैतत्पुष्टार्थमतोऽत्र नादरो नाप्यनादरः । विषयस्त्वस्य कथासंविसंहारौ । यथा—'श्रियः कुरूणामधिपस्य पालनीम्' इत्यादि । यथा च—'इति व्याहृत्य विबुधान्विश्वयोनिस्तिरोदधे' इत्यादि ॥

पुष्टेति । मध्यम वाक्य की भी आदरपूर्वक रचना करनी चाहिए। क्या बिना किसी भेद के ? कहते हैं नहीं । पुष्ट एवं हृदय को आवर्जित करने वाला अर्थ ही जिसमें अलंकार है—(केवल) ऐसे वाक्य की ही (रचना करनी चाहिए)। कहने का तात्पर्य यह है कि यद्यपि वक्रोक्ति आदि अलंकार (वहाँ) नहीं रहेंगे तथापि उस (वाक्य) के विवक्षित अर्थ को सरस एवं उत्कृष्ट बनाना चाहिए । जैसे,—'नेत्रों की भ्रूभङ्गिमा देर तक बढ़ायी, बन्द रखने का अभ्यास किया, बड़े प्रयास से हँसी रोकना सीखी, मूक रहने में अभिनिवेश किया, धैर्य धारण करने के लिये इस चित्त को भी स्थिर कर लिया, (इस प्रकार) मान धारण करने के लिये मैंने किसी प्रकार कमर कस ली । सिद्धि तो भाग्य के ही

अधीन है ॥' निर्दोष वाक्यों के बीच समुच्चय के लिये 'अपि' शब्द आया है। अन्य अलङ्कारों के अभाव में वहाँ किसी का आदर नहीं होगा—इसलिये (कारिका में) आदर का ग्रहण किया गया। फिर क्या अपुष्टा अध्यवार्थक्य ग्राह्य नहीं होता—इसे कहते हैं—यत्किंचिदित्यादि। क्योंकि पुष्टार्थतारूप अलंकार से भिन्न जो अपुष्टार्थता होती है—वह यत्किंचित् होती है। अर्थात् अत्यधिक आदरणीय नहीं होती। कैसे?—जैसे—'गामभ्याजेति'। (कोई कहता है) 'देवदत्त! सफेद गाय को डण्डे से बाहर निकाल दो'—यहाँ न कोई शब्द एवं अर्थ में दोष है, न कोई अलङ्कार है और न यह पुष्टार्थ ही है (अतएव) इसमें (किसी का) न तो आदर ही होता है और न तो अनादर ही। इस (मध्यम वाक्य) का विषय कथा की सन्धि और संहार है। जैसे, सरदाओं ने कुरुराज की (प्रजा) पालन की ''। और जैसे— देवों से ऐसा कह कर ब्रह्मा तिरोहित हो गये'—आदि ॥

अथ सर्वेषामेव शब्ददोषाणां विषयविशेषे साधुत्वं दर्शयितुमाह—

अनुकरणभावमविकलमसमर्थादि स्वरूपतो गच्छन्।
न भवति दुष्टमनादृग्विपरीतक्लिष्टवर्णं च ॥ ४७ ॥

आगे शब्दगत सभी दोषों की विशेष स्थल पर साधुता दिखलाने के लिये कहते हैं—

'असमर्थादि दोषों से दुष्ट परिपूर्ण वाक्य या पद जहाँ स्वरूपतः अनुकरण मात्र प्रयोजन से प्रयुक्त होता है वह सदोष नहीं होता। इसी प्रकार दुष्ट क्रम और क्लिष्ट वर्ण होने पर भी सदोष नहीं होता ॥ ४७ ॥'

अनुकरणेति। असमर्थादिदोषैर्दुष्टमपि पदं वाक्यं वाविकलं परिपूर्णं स्वरूपतोऽनुक्रियमाणं दोषाय न भवति। अर्थभेदेन शब्दान्तरत्वादिति भावः। अनुचिकीर्षया प्रयुक्तमथ च प्रतिपादनायासमर्थं तदविकलग्रहणेन दुष्टमिति दर्श्यते। तथा सादृशा भिन्नस्वरूपत्वादसदृशा विपरीता दुष्टक्रमाः क्लिष्टा लुप्ता वर्णा यस्य तत्तथाविधम्। तदपि पदं न दोषाय। यथा विकटनितम्बायाः पतिमनुकुर्वाणा सखी प्राह—'काले माष सस्ये मासं वदति शकासं यश्च सकासम्। उष्ट्रे लुम्पति रं वा षं वा तस्मै दत्ता विकटनितम्बा ॥' इत्यादि ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतः
षष्ठोऽध्यायः समाप्तः।

अनुकरणेति। (यदि कोई) अविकल रूप से किसी पद या वाक्य का अनुकरण करे तो वह असमर्थ आदि दोषों से दुष्ट होने पर भी सदोष नहीं माना जाता है। तात्पर्य यह है कि प्रयोजन के भिन्न होने से (अर्थभेदेन)

शब्द भी अन्य होता है। (कारिका में) अविकल के ग्रहण का तात्पर्य यह है कि अनुकरण करने की इच्छा से प्रयोग किये जाने पर (अनुकरण का) प्रतिपादन करने में असमर्थ होकर दुष्ट हो जाता है। तथा (अनुकरण करने के लिये प्रयोग किये गये) भिन्न स्वरूप होने के कारण असदृश, दुष्ट क्रम एवं लुप्तवर्ण वाले पद भी दुष्ट नहीं होते हैं। जैसे विकटनितम्बा के पति का अनुकरण करती हुई सखी कह रही है—"काले मापमादि"। 'समय में उड़द और धान्य में महाना, शमीप बोलता है जो समीप है। ऊँट में रटता है र या पम्। उसे विकटनितम्बा (गुरुतर श्रोणितट वाली) समर्पित कर दी गयी।

इस प्रकार नमिसाधु रचित टिप्पणी के सहित श्री रुद्रट रचित
काव्यालङ्कार का छठा अध्याय समाप्त हुआ।

★

सप्तमोऽध्यायः

शब्दार्थौ काव्यमित्युक्तम् । तत्र शब्दलक्षणप्रभेदालंकारदोषा अभिहिता. । इदानीमर्थस्य तान्विवक्षुराह—

अर्थः पुनरभिधावान् प्रवर्तते यस्य वाचकः शब्दः ।
तस्य भवन्ति द्रव्यं गुणः क्रिया जातिरिति भेदाः ॥ १ ॥

(पहले) 'शब्दार्थौ काव्यम्'—शब्द और अर्थ काव्य है—यह कहा गया है । उनमें शब्द के अलंकार और दोष का विस्तारपूर्वक वर्णन किया गया । अब अर्थ के उन (अलंकार और दोषों) को वर्णन करने की इच्छा से कहते हैं—'फिर अर्थ जिसका अभिधा से युक्त वाचक शब्द (उस अभिधेय में) प्रवृत्त होता है उस (अर्थ) के द्रव्य, गुण क्रिया और जाति—ये चार भेद होते हैं ॥ १ ॥'

अर्थ इति । पुन शब्दो लक्षणविभागार्थ । वर्णसमुदायात्मकः शब्द । अभिहितोऽर्थः पुनः । स यस्य वाचकोऽभिधायक शब्दः प्रवर्तते । इत्यनेन त्वर्थस्य शब्दवाच्यत्वाभिधानेन शब्दार्थयोर्भिन्नत्वं वाच्यवाचकभावश्च दर्शितो भवति । श्रोत्रेन्द्रियग्राह्यो हि शब्दः । तदन्येन्द्रियग्राह्यस्त्वर्थः शब्दे चोच्चारिते सत्यर्थः प्रतीयत इति । तथा शब्दार्थौ काव्यमित्युक्तम्, अनक्षलक्षुर्निकोचमूर्धकम्पाङ्गुलिदर्शनादिप्रतिपादितार्थस्य काव्यत्वनिवृत्त्यर्थं प्रवर्तते यस्य वाचक शब्द इत्युक्तम् । वाचकस्यापि वाच्यसिद्ध्यर्थं विशेषणमाह—अभिधा प्रतीतिः सा विद्यते यस्य स तथा । ध्वनौ हि प्रतीयमानार्थसंभव इति । प्रतीतिश्च यस्य यो विद्यमानस्तेन यः सन्सोऽर्थः । यस्तु न विद्यते तत्र प्रतीत्यभावान्नासावर्थ इत्युक्तं भवति । लक्षणमभिधाय प्रभेदानाह—तस्येत्यादि । इति परिसमाप्त्यर्थः । तस्यार्थस्य तावत एव द्रव्यगुणक्रियाजातिलक्षणाश्चत्वारः प्रभेदाः॥

अर्थ इति । (कारिका में) 'पुन.' शब्द (अर्थ के) लक्षण को अलग करने के लिये आया है । शब्द वर्णों का समुदाय स्वरूप होता है । फिर अर्थ की व्याख्या तो की गयी है—वह है जिसमें वाचक शब्द प्रवृत्त होता है । इस प्रकार अर्थ के शब्द के द्वारा वाच्य होने का कथन होने पर 'शब्द और अर्थ पृथक् पृथक् हैं और उनमें वाच्य वाचक भाव है' यह स्पष्ट हो जाता है । शब्द श्रोत्रेन्द्रिय से (कान से) ग्राह्य होता है और अर्थ उससे भिन्न इन्द्रिय (मन) से ग्राह्य होता है । शब्द का उच्चारण हो जाने के बाद अर्थ का बोध

होता है। शब्द और अर्थ (दोनों मिलकर ही) काव्य हैं अतएव नेत्रों के सकेत, शिर के हिलाने और उँगली के दिखाने से प्रतिपादित अर्थ के काव्य होने के निराकरण के लिये 'जो वाचक शब्द (उस अर्थ मे) प्रवृत्त होता है (वह काव्य होता है) ऐसा (कारिका मे) कथन किया गया। वाच्य (अभिधेयार्थ) की सिद्धि के लिये वाचक का भी विशेषण देते हैं—प्रतीति से युक्त (अभिधावान् वाचकः) ध्वनि (के स्थल) में प्रतीयमान ही अर्थ सम्भव होता है। प्रतीति से जो युक्त होता है वही अर्थ होता है, जिसमें प्रतीति नहीं होती वह अर्थ ही नहीं हो सकता। स्वरूप को बताकर उसके भेद बताते हैं-(कारिका मे) इतिपद परिसमाप्ति द्योतित करने के लिये प्रयोग किया है—उस अर्थ के द्रव्य, गुण, क्रिया और जाति—केवल चार ही भेद होते हैं॥

तेषा च यथोद्देश लक्षण वाच्यमिति कृत्वा द्रव्यस्य तावदाह—

जातिक्रियागुणानां पृथगाधारोऽत्र मूर्तिमद्द्रव्यम्।
दिक्कालाकाशादि तु नीरूपमविक्रियं भवति॥ २॥

उन (द्रव्य आदि) का नाम ग्रहण के अनुसार लक्षण बताना चाहिए—इसके अनुसार सर्वप्रथम द्रव्य का लक्षण करते हैं—

'(इन पूर्वोक्त चार भेदों में) जाति, क्रिया और गुण मे से प्रत्येक का आश्रय मूर्तिमान् द्रव्य होता है। दिक्, काल और आकाश आदि अरूप और चेष्टाशून्य होते हैं॥ २॥'

जातीति। अत्रैतेषु मध्ये द्रव्य मूर्तिमदिन्द्रियग्राह्यमुच्यते। गुणस्य द्रव्यत्वनिवृत्त्यर्थमाह—पृथक्प्रत्येक जातिगुणक्रियाणामाधार आश्रय। जात्यादयो हि न कदाचिदपि द्रव्यं विना भवन्तीति। पृथग्ग्रहणं तु केवलानामपि जात्यादीनामाधारत्वे द्रव्यत्वप्रतिपत्त्यर्थम्। अन्यथा हि समुदितानामेव य आधारस्तदेव द्रव्य स्यात्। ततश्च निष्क्रियत्वात्पाषाणादीना द्रव्यत्व न स्यात्। मूर्तिमदिति वचनाद्दिगादीना द्रव्यत्व न स्यात्। अथ चेष्यतेऽत आह—दिक्काले यादि। तु पूर्वस्माद्विशेषे। मूर्तं द्रव्यमुच्यते। दिक्कालाकाशात्ममनांसि पुनर्नीरूपाण्यपि द्रव्यमित्यर्थ। तत्र नीरूपत्वादविक्रियं भवति। मूर्तिमत्पुन सविकारमेव॥

जातीति। इन (चार) भेदों में (चक्षु आदि) इन्द्रियों के द्वारा ग्राह्य मूर्तिमान् (पदार्थ) द्रव्य कहा जाता है। गुण का द्रव्य से निराकरण करने के लिये कहते हैं—(द्रव्य) जाति, गुण और क्रिया मे से प्रत्येक का आश्रय होता है। जाति आदि की द्रव्य के बिना कभी सत्ता ही नहीं हो सकती है। (कारिका में) पृथक् का ग्रहण यह ज्ञान कराने के लिये किया गया है कि द्रव्य

जाति आदि में किसी एक का भी आधार हो सकता है। अन्यथा तीनों का (जाति, गुण, और क्रिया का) ही आधार होने पर द्रव्य होता। ऐसा करने पर पत्थर आदि क्रिया से शून्य होने के कारण द्रव्य न बन पाते। (कारिका में द्रव्य को) मूर्तिमान् मानने के कारण 'दिग्' आदि भी द्रव्य के अन्तर्गत नहीं आयेंगे अतः (आगे) कहना पड़ा—दिक्कालेत्यादि। तु पद पहले से वैशिष्ट्य द्योतित करने के लिये आया है। दिशा, काल, आकाश, आत्मा और मन, (यद्यपि) द्रव्य मूर्तिमान् (अतएव सरूप) होता है, अरूप होकर भी द्रव्य है—यह अर्थ है। ये अरूप होने के कारण निष्क्रिय होते हैं। जो मूर्तिमान् होता है वह तो सक्रिय ही होगा॥

अथ द्रव्यभेदानाह—

नित्यानित्यचराचरसचेतनाचेतनैर्बहुभिः।
भेदैर्विभिन्नमेतद् द्विधा द्विधा भूरिशो भवति॥ ३॥

आगे द्रव्य के भेद बताते हैं—

'नित्य-अनित्य, चर-अचर, सचेतन-अचेतन आदि अनेक भेदों से दो दो भागों में विभक्त यह (द्रव्य) अनन्त प्रकार का होता है॥ ३॥'

नित्येति। एतद्द्रव्य नित्यानित्यादिभिर्भेदैर्बहुभिर्द्विधा द्विधा विभिन्नं सद्भूरिशोऽनेकशो भवति। आदिग्रहणात्सवचनावचनव्यक्ताव्यक्तस्थूलसूक्ष्मनक्तंचरदिवाचरस्थलजजलजप्रभृतयो भेदा गृह्यन्ते। बहुग्रहणमानन्त्यप्रतिपादनार्थम्। न च वाच्य चराचरयोः सचेतनाचेतनयोश्च न विशेष इति। वृक्षाद्यो ह्यचरा अपि सचेतनाः॥

नित्येति। यह द्रव्य नित्य-अनित्य आदि अनेक दृष्टियों से दो दो वर्गों में विभक्त करने पर अनन्त प्रकार का होता है। आदि ग्रहण का तात्पर्य यह है कि भाषण करने वाले और मूक, स्पष्ट और अस्पष्ट, स्थूल और सूक्ष्म, रात में विचरण करने वाले और दिन में विचरण करने वाले, और स्थल पर उत्पन्न होने वाले और जल में उत्पन्न होने वाले आदि। बहु का ग्रहण आनन्त्य का प्रतिपादन करने के लिये किया गया है। यह कहना ठीक नहीं है कि चर-अचर, और सचेतन-अचेतन में भेद नहीं है (क्योंकि) वृक्ष आदि अचर होकर भी सचेतन हैं॥

अथ गुण —

द्रव्यादपृथग्भूतो भवति गुणः सततमिन्द्रियग्राह्यः।
सहजाहार्यावस्थिकभावविशेषादयं त्रेधा॥ ४॥

अथ गुण (का प्रतिपादन करते हैं)—

'सदैव प्रत्यक्ष के योग्य द्रव्य के ही आश्रित गुण होता है। वह सहज, आहार्य और अवस्था विशेष के आश्रित होने के कारण—तीन प्रकार का होता है ।।४।।'

द्रव्यादिति। द्रव्यादपृथग्भूतो द्रव्यसमवायी गुणो भवति। जातिक्रिययोर्द्रव्यस्थत्वाद् गुणत्वं स्यादित्याह—सततमिन्द्रियग्राह्यः सर्वदैव प्रत्यक्षगम्य। नानुमेय इत्यर्थ। जातिक्रिये तु न प्रत्यक्षगम्ये। गुणं च केचिदुत्पाद्यसहजत्वेन द्विधेति ब्रुवते तन्निरासार्थमाह—सहजेत्यादि। तत्र सहजो गुणो यथा—क्षत्रिये शौर्यम्। काके कार्ष्ण्यम्। आहार्यो यथा—शास्त्राभ्यासात्पाण्डित्यम्। पटे रागः। आवस्थिको यथा—फलानां लौहित्यम्। केशानां शौक्ल्यम्॥

द्रव्यादिति। द्रव्य से अपृथक् द्रव्य में ही समवाय सम्बन्ध से विद्यमान रहने वाला गुण होता है। (इस प्रकार तो) जाति और क्रिया भी गुण होंगे क्योंकि (वे) भी द्रव्य में ही रहते हैं—इस शङ्का का उत्तर देते हैं—(गुण) सदैव (चक्षु आदि) इन्द्रिय से ग्राह्य प्रत्यक्ष का विषय होता है। (वह) अनुमान से नहीं जाना जाता (यह) अर्थ है। जाति और क्रिया प्रत्यक्ष के द्वारा नहीं जाने जाते। कुछ लोग गुण को सहज और उत्पाद्य के भेद से दो ही प्रकार का मानते हैं, उसका खण्डन करने के लिये कहते हैं—सहज आदि। उनमें सहज गुण जैसे क्षत्रिय में शूरता, कौवे में कालापन। आहार्य जैसे शास्त्रों के अभ्यास से पाण्डित्य, वस्त्र में रङ्ग। आवस्थिक जैसे—फलों की लालिमा, केशों की श्वेतिमा (आदि)।

अथ क्रिया—

नित्यं क्रियानुमेया द्रव्यविकारेण भवति धात्वर्थः।
कारकसाध्या द्वेधा सकर्मिकाकर्मिका चेति ॥ ५ ॥

अब क्रिया (बताते हैं)—

'धात्वर्थ क्रिया होती है, द्रव्य (तण्डुलादि) के पकने आदि विकारों से उसका ज्ञान होता है। (कर्तृ, कर्म आदि) कारकों से निष्पाद्य (उसके) सकर्मक और अकर्मक दो भेद होते हैं ॥ ५ ॥'

नित्यमिति। धात्वर्थं क्रिया भवति। 'क्रियाभावो धातुः' इति वचनात्। सा तु न प्रत्यक्षा। किं तु द्रव्यस्य तण्डुलादेर्विकारेण क्लेदादिनानुमेया। गमनादिका तु देशान्तरप्राप्त्यादिनेति। सा च कारकैः कर्तृकर्मादिभिः साध्या निष्पाद्या यदुक्तम्—सर्वकारकनिर्वर्त्या कर्तृकर्मद्रयाश्रया। आख्यातशब्दनिर्देश्या धात्वर्थः केवलं क्रिया ॥' सापि सकर्मिकाकर्मिका-

त्वभेदेन द्वेधा। आद्या ग्रामं गच्छतीत्यादिका। द्वितीया आस्ते शेते इत्यादिका। नियतानियतकर्मिकात्वसमुच्चयार्थश्चशब्दः। तत्राद्या कटं करोतीति। द्वितीया वहति भारम्, वहति नदी॥

नित्यमिति। 'क्रिया का भाव ही धातु है'—इस कथन के अनुसार धात्वर्थ ही क्रिया होती है। वह प्रत्यक्ष नहीं होती। किन्तु वह द्रव्य चावल आदि के भीगने आदि विकारों के द्वारा अनुमान से जानी जा सकती है। गमन आदि (क्रिया भी गन्ता के) अन्य स्थान पर पहुँच जाने आदि से (जानी जाती है)। और वह (क्रिया) कर्ता, कर्म आदि कारकों के द्वारा साध्य होती है जैसा कि कहा भी गया है—सभी कारकों (सभी विभक्तियों) के द्वारा पूर्ण की जाने वाली कर्ता और कर्म का आश्रय लेने वाली 'आख्यात' शब्द से निर्दिष्ट की जाने वाली धातु का अर्थमात्र ही क्रिया होता है॥' वह भी सकर्मक और अकर्मक के भेद से दो प्रकार की होती है। प्रथम (सकर्मक) जैसे 'गाँव जाता है' आदि। दूसरी (अकर्मक) जैसे 'होता है' 'सोता है' आदि। (कारिका में) च शब्द नियत कर्म वाली और अनियत कर्म वाली का समुच्चय करने के लिये आया है। उनमें नियत कर्म वाली क्रिया जैसे 'चटाई बनाता है'। अनियत कर्म वाली जैसे 'भार ढोता है' 'नदी बहती है' आदि। (यहाँ 'वहति' क्रिया प्रथम उदाहरण में सकर्मक है और द्वितीय में अकर्मक। अतएव कर्म के नियत (निश्चित) न होने के कारण वह अनियत कर्म वाली क्रिया है)॥

अथ जातिः—

भिन्नक्रियागुणेष्वपि बहुषु द्रव्येषु चित्रगात्रेषु।
एकाकारा बुद्धिर्भवति यतः सा भवेज्जातिः॥ ६॥

अब जाति (बताते हैं)—

'पृथक् पृथक् काया वाले अनेक द्रव्यों में गुण और क्रिया के पृथक् होने पर भी जिस कारण से एकाकार बुद्धि उत्पन्न होती है उसे जाति कहते हैं॥ ६॥'

भिन्नेति। बहुषु द्रव्येषु यतो यद्वशादेकाकारा समाना बुद्धिर्भवति सा जातिर्भवेदिति। कदाचित्समानगुणक्रियायोगात्सा बुद्धिर्भवेदित्याह—भिन्नेत्यादि। भिन्नौ विलक्षणौ क्रियागुणौ येषु तेष्वपि। कदाचिदत्यन्तमवयवसादृश्याद्वा मा स्यादित्याह—चित्रगात्रेष्विति। चित्रं नानारूपं काणकुब्जादिकं गात्रं येषां तेषु। सा च जातिस्त्रिष्वपि द्रव्यक्रियागुणेषु समवेतेति त्र्याश्रया॥

भिन्नेति। अनेक द्रव्यों में जिसके कारण समान बुद्धि होती है वह जाति होती है। शायद वह (समान) बुद्धि समान गुण और क्रिया के कारण होती हो इस शङ्का का उत्तर देते हैं—भिन्नेत्यादि। पृथक् पृथक् गुण और क्रिया वाले (द्रव्यों) में भी (वह समान बुद्धि होती है)। कदाचित् अङ्गों के अत्यन्त सदृश होने के कारण वह होती हो—इसे बताते हैं—चित्रगात्रेष्विति। नाना प्रकार के काने, लूले और कुबड़े आदि शरीर वालों में भी (वह समान—एकाकार बुद्धि होती है)। वह जाति, गुण, क्रिया और द्रव्य में समवेत होने के कारण तीनों के आश्रित होती है।

अथासामेव द्रव्यगुणक्रियाजातीनामन्यथात्वनियममाह—

सर्वः स्वं स्वं रूपं धत्तेऽर्थो देशकालनियमं च।

तं च न खलु बध्नीयान्निष्कारणमन्यथातिरसात् ॥ ७ ॥

आगे इन्हीं द्रव्य, गुण, क्रिया और जाति के नियम का उल्लङ्घन होने का वर्णन करते हैं—'सभी अर्थ अपने अपने स्वरूप और देश तथा काल के नियम को धारण करते हैं। रसावेश के कारण बिना किसी हेतु के उनकी निराधार योजना नहीं करना चाहिए ॥ ७ ॥

सर्व इति। सर्वोऽर्थो द्रव्यगुणक्रियाजातिलक्षणः स्वं स्वमात्मीयं स्वभावं देशकालनियमं च धत्ते। नियते क्वापि देशे काले च नियताकारश्चार्थो भवतीत्यर्थः। तत् किमित्याह—त चेत्यादि। चशब्दो हेतौ। खल्ववधारणे। तत् कारणात्तमर्थमन्यथा नैव बध्नीयादित्यर्थः। तत्र ये नित्या भावास्तेषां वर्तमानेन निर्देशो न्याय्यः। अतीतानां तु भूतेन। अनागतानां भविष्यत्कालेन। एवं चराचरसचेतनाचेतनादिषु द्रष्टव्यम्। देशकालनियमश्च यथा—हिमवति हिमस्य सदा सद्भावोऽन्यत्र तु शीतकाले। एवमन्यदपि। निष्कारणग्रहणं कारणसद्भावेऽन्यथात्वस्यादुष्टत्वख्यापनार्थम्। यथा शुकसारिकादीनां व्यक्तवचनत्वे मनुष्यप्रयत्नः कारणमिति। कुतः पुनर्निष्कारणस्यान्यथाभिधानप्रसङ्ग इत्याह—अतिरसादिति। अतिरसहृतहृदयानां हि प्रायशो मर्यादोल्लङ्घनमपि भवति। एतदुक्तम्—'गणयन्ति नापशब्दं न वृत्तभङ्गं क्षयं न चार्थस्य। रसिकत्वेनाकुलिता वेश्यापतयः कुकवयश्च' ॥

सर्व इति। द्रव्य, गुण, क्रिया और जाति रूप सभी अर्थ अपने अपने स्वभाव और देशकाल के नियम को धारण करते हैं। तात्पर्य यह है कि कहीं भी अर्थ निश्चित देश और काल में निश्चित आकार का होता है। तो फिर क्या करना चाहिए—इसे बताते हैं—त चेत्यादि। च शब्द हेतु के अर्थ में आया है।

खलु अवधारण अर्थ में आया है। इस कारण से अर्थ का उपन्यास अन्यथा (स्वभाव और देश काल के विपरीत) नहीं करना चाहिए। उनमें जो नित्य भाव (अर्थ) है उनका वर्तमान काल से निर्देश करना उचित होता है। अतीत काल के (भावों का) भूतकाल से और अनागत (भावों) का भविष्य काल से निर्देश करना चाहिए। इसी प्रकार चराचर और सचेतनाचेतन (भावों) में भी नियम रखना चाहिए। देश काल का नियम जैसे हिमालय पर हिम का सदैव सद्भाव होता है, अन्य स्थलों पर केवल शीतकाल में ही। इसी प्रकार और भी (जानना चाहिए)। निष्कारण पद के ग्रहण का अर्थ है कि कारण वश (अर्थ का) अन्यथा उपन्यास करना सदोष नहीं होता है जैसे तोता-मैना के स्पष्ट वक्ता होने में मनुष्य द्वारा किया गया प्रयत्न कारण होता है। फिर अकारण ही (अर्थ के) अन्यथा उपन्यास करने की चर्चा कैसे उठी-इसे बताते हैं—अतिरसादिति। रस के आतिशय्य के कारण हृदय के आकर्षित होने पर प्रायः मर्यादा उल्लङ्घन हो जाता है। यह कहा गया है—वेश्याओं के पति और कुकवि रसिकता (कामावेश पक्षा०—शृङ्गारादि रसों के आतिशय्य) के कारण न तो अपशब्द (गाली पक्षा०—दुष्ट पद) न तो वृत्तभङ्ग (आचार का खण्डन, पक्षा०—छन्दोदोष) और न तो अर्थ के क्षय (प्रयोजन के विनाश, पक्षा०—अभिधेय की क्षति) की ही परवाह करते हैं॥

यद्यन्यथात्वं निवार्यते तर्हि कथं दिगाकाशादिष्वमूर्तेषु मूर्तधर्माः कविभिर्वर्ण्यन्ते। यथा निर्मला दिशः। निर्मलं नभ इति। तथा विचेतनेषु सचेतनधर्मा इत्याह—

सुकविपरम्परया चिरमविगीततयान्यथा निबद्धं यत्।
वस्तु तदन्यादृशमपि बध्नीयात्तत्प्रसिद्ध्यैव॥ ८॥

यदि अन्यथात्व को मना ही कर रहे हैं तो दिशा, आकाश आदि अमूर्त (द्रव्यों) में कवियों ने मूर्तधर्मों का वर्णन क्यों किया? जैसे निर्मल दिशायें। निर्मल आकाश। तथा जड पदार्थों में चेतन धर्म—इसका उत्तर देते हैं—

'महाकवियों ने चिरकाल से जिस अर्थ की निराधार योजना की है, उस अर्थ (वस्तु) की निराधार होने पर भी केवल प्रसिद्धि होने के कारण योजना करनी चाहिए॥ ८॥'

सुकवीति। पूर्वसुकवीनां परम्परया समूहेन चिरं बहुपूर्वकालेऽविगीततयाविगानेन निर्दोषतयेति यावत्। यद्वस्त्वन्यथा निबद्धं तदन्यादृशमपि तत्प्रसिद्ध्यैव बध्नीयात्। न त्वात्मबलेन। महाकविप्रसिद्धिरेवात्र प्रमाणमित्यर्थः॥

सुस्वीति। पूर्ववर्ती महाकवियों के द्वारा (जिस अर्थ का) चिरकाल तक गान किया गया है—जिस वस्तु का अन्यथा उपन्यास (कथन) किया गया है उसका वर्णन प्रसिद्धि के कारण ही अन्य रूप में करना चाहिए। अपने नियम से (किसी वस्तु का अन्यथा वर्णन) नहीं किया जा सकता। महाकवियों की प्रसिद्धि ही इस विषय में प्रमाण है—यह भाव है॥

सप्रभेदमर्थमभिधाय साम्प्रतं तदलंकारानाह—

अर्थस्यालंकारा वास्तवमौपम्यमतिशयः श्लेषः।

एषामेव विशेषा अन्ये तु भवन्ति निःशेषाः॥ ९॥

भेदों के साथ अर्थ का वर्णन करके अब उसके अलंकारों का वर्णन करते हैं—

'वास्तव, औपम्य, अतिशय और श्लेष अर्थ के अलंकार हैं। अन्य सभी (अर्थ के अलंकार) इन्हीं में से किसी के भेद होते हैं॥ ९॥'

अर्थस्येति। उक्तलक्षणस्यार्थस्य वास्तवादयश्चत्वारोऽलंकारा भवन्ति। चतुर्भिः प्रकारैरसौ भूष्यत इत्यर्थः। नन्वन्येऽपि रूपकादयोऽलंकाराः सन्ति तत्किमिति चत्वार एवोक्ता इत्याह—एषामेवेत्यादि। तुर्हेतौ। एषामेव सामान्यभूतानां चतुर्णां ते भेदा यतस्ततो मूलभेदत्वेन नोक्ता इत्यर्थः॥

अर्थस्येति। ऊपर बताये गये स्वरूप वाले अर्थ के वास्तव आदि चार अलंकार होते हैं। तात्पर्य यह है कि यह (अर्थ) चार प्रकार से अलङ्कृत होता है। प्रश्न है कि रूपक आदि अन्य अलंकार भी होते हैं फिर चार ही भेद क्यों बताये गये इसका उत्तर देते हैं—एषामेवेत्यादि। तु हेतु अर्थ में आया है। इन्हीं सामान्य चार अलंकारों के वे (रूपक आदि) भेद होते हैं अतएव उनकी मूल भेद रूप में गणना नहीं करायी गयी॥

यथोद्देशस्तथा लक्षणमिति वास्तवलक्षणमाह—

वास्तवमिति तज्ज्ञेयं क्रियते वस्तुस्वरूपकथनं यत्।

पुष्टार्थमविपरीतं निरुपममनतिशयमश्लेषम्॥ १०॥

नाम ग्रहण के अनुसार स्वरूपकथन होना चाहिये इसलिये (सर्वप्रथम) वास्तव का स्वरूप बताते हैं—

'जो वस्तु के स्वरूप का कथन किया जाता है उसे वास्तव समझना चाहिए। यह (वास्तव) पुष्टार्थ, विवक्षित अर्थ के अविपरीत, निरुपम, अनतिक और अश्लिष्ट होता है॥ १०॥'

वास्तवमिति । यद्वस्तुस्वरूपकथन क्रियते तद्वास्तवमिति ज्ञेयम् । वस्तुन इदं वास्तवमिति कृत्वा । इतिशब्दोऽर्थनिर्देशे। वास्तवशब्दवाच्यः सोऽर्थ इत्यर्थः । पुष्टार्थग्रहणमपुष्टार्थनिवृत्त्यर्थम् । तेन 'गोरपत्य बलीवर्दस्तृणान्यत्ति मुखेन स' । मूत्रं मुञ्चति शिश्नेन अपानेन तु गोमयम् ॥' अस्य वास्तवत्वं न भवति। अविपरीतग्रहण विवक्षितविपरीतार्थस्य वास्तवत्वनिवृत्त्यर्थम् । यथा—'दन्तान्निर्दलयद्रसां च जडयत्तालु द्विधा स्फोटयन्नाड्यः सघटयन्गलद्गलबिलादान्त्राणि सकोचयन् । इत्थ निर्मलकर्करीयमसह्यप्रालेयवाताहृतं नाधन्याः प्रचुर पिबन्त्यनुदिनं प्रोन्मुक्तधारं पयः ॥' अत्र हि पयस' शीतलत्वमाह्लादकत्व च विवक्षितम् । तद्वैपरीत्य च प्रतीयते। निरुपमादि ग्रहणं त्वनुवादमात्रम् । न तूपमातिशयश्लेषाणां वास्तवत्वनिवृत्तये । पृथगुपादानादेव तेषामन्यत्वसिद्धेः ॥

वास्तवमिति । जो वस्तु के स्वरूप का कथन किया जाता है उसे वास्तव जानना चाहिए । वस्तु का जो है वह है वास्तव (वस्तुगत) । इति शब्द अर्थ के निर्देश में आया है । तात्पर्य है—वास्तव शब्द के द्वारा वाच्य वह अर्थ । अपुष्टार्थ का निराकरण करने के लिये (कारिका में) पुष्टार्थ का ग्रहण किया गया। इससे 'गाय का पुत्र बलवान् बैल मुख से घास खाता है, शिश्न से मूत्रत्याग करता है और अपान से गोबर का त्याग करता है' (यह पुष्टार्थ न होने के कारण) वास्तव नहीं होता है । विवक्षित अर्थ के विपरीत अर्थ को वास्तव से दूर रखने के लिये अविपरीत का ग्रहण किया गया जैसे—'दाँतों को रगड़ाते हुये, जिह्वा को स्थगित करते हुये, नाड़ियों की संघटना करते हुये, गले के छिद्र से नीचे पड़ते ही आँतों को सकुचित कर देने वाले, प्रलयकालीन वायु से आहत 'छूटी हुयी धार वाले कर्करी (सछिद्र घट) के निर्मल जल को इस प्रकार अभागे नहीं पीते हैं' ॥ यहाँ (वक्ता को) जल की शीतलता और आह्लादकता विवक्षित है। (यहाँ) उसका वैपरीत्य ही प्रतीत हो रहा है। 'निरुपमम्' का ग्रहण अनुवाद मात्र के लिये किया गया है, उपमा, अतिशय और श्लेष को वास्तव से भिन्न बताने के लिये नहीं। उनका पृथक् वर्णन करने से ही उनका पार्थक्य सिद्ध है ॥

अथ वास्तवप्रभेदानाह—

तस्य सहोक्तिसमुच्चयजातियथासंख्यभावपर्यायाः ।
विषमानुमानदीपकपरिकरपरिवृत्तिपरिसंख्याः ॥ ११ ॥
हेतुः कारणमाला व्यतिरेकोऽन्योन्यमुत्तरं सारम् ।
सूक्ष्मं लेशोऽवसरो मीलितमेकावली भेदाः ॥१२॥(युग्मम्)

आगे वास्तव के भेद गिनाते हैं—

'उस (वास्तव) के सहोक्ति, समुच्चय, जाति, यथासंख्य, भाव, पर्याय, विषम, अनुमान, दीपक, परिकर, परिवृत्ति, परिसंख्या, हेतु, कारणमाला, व्यतिरेक, अन्योन्य, उत्तर, सार, सूक्ष्म, लेश, अवसर, मीलित और एकावली—ये तेइस भेद होते हैं ॥ ११-१२ ॥'

तस्य वास्तवस्य वक्ष्यमाणलक्षणा सहोक्त्यादयस्त्रयोविंशतिरिमे भेदा भवन्ति ॥

उस वास्तव के आगे बताये गये लक्षणों वाले सहोक्ति आदि ये तेइस भेद होते हैं।

साम्प्रतमेषां परिपाट्या लक्षणमाह—तत्र सहोक्ति—

भवति यथारूपोऽर्थः कुर्वन्नेवापरं तथाभूतम् ।
उक्तिस्तस्य समाना तेन समं या सहोक्तिः सा ॥ १३ ॥

अब इनका क्रमशः लक्षण बताते हैं—उनमें सहोक्ति—

'अपने सदृश दूसरे अर्थ को घटित करता हुआ जो अर्थ (वस्तु) जिस रूप में होता है उस दूसरे अर्थ के समान इसका कथन जहाँ होता है वहाँ सहोक्ति नामक अलङ्कार होता है ॥ १३ ॥'

भवतीति। योऽर्थः कर्तृभूतः प्रधानं यथारूपो यादृगात्मा यद्गुणयुक्तो भवति। कथं भवति—अपरमन्यमर्थं कर्मलक्षणमप्रधानं तथाभूतम्। तथाशब्दः प्रकारे। तथाप्रकारमात्मगुणसदृशं कुर्वन्नेवेति। एवकारोऽन्यकालनिवृत्त्यर्थः। कुर्वन्नेव भवति। न तु भूत्वा करोति, कृत्वा भवतीत्यर्थः। अतस्तस्य कुर्वतोऽर्थस्य तेन कार्येणार्थेन समं समाना तुल्या योक्तिः सा सह सार्धमुक्तिः सहोक्तिः। हेतुहेतुमद्भावोऽत्र सहार्थः। एकवचनमिहातन्त्रम्। तेन बहूनामप्यर्थानां सहोक्तिर्भवतीति ॥

भवतीति। जो अर्थ प्रधान होकर जिस स्वरूप का—जिन गुणों से युक्त—होता है—कैसे होता है ?—अप्रधान अन्य अर्थ के सदृश होकर। तथा शब्द प्रकार अर्थ में आया है। अर्थात् (अप्रधान अर्थ को) अपने गुणों के सदृश बनाता हुआ। एवकार (वर्तमान) के अतिरिक्त अन्य काल का निराकरण करने के लिये प्रयुक्त हुआ है। (अपने गुणों के सदृश) बनाता हुआ ही होता है, न कि स्वयं होकर फिर (अप्रधान को अपने) सदृश बनाता है करके होता है यह तात्पर्य है। अतः उस करने वाले अर्थ को उस किये जाने वाले (कार्य) अर्थ के साथ जो उक्ति होती है उसे (सहउक्ति) सहोक्ति कहते हैं। यहाँ सह का अर्थ हेतु हेतुमद्भाव है। एकवचन का प्रयोग शिथिल है। अतएव अनेक अर्थों की (भी) सहोक्ति होती है ॥

निदर्शनमाह—

कष्टं सखे क्व यामः सकलजगन्मन्मथेन सह तस्याः ।
प्रतिदिनमुपैति वृद्धिं कुचकलशनितम्बभित्तिभरः ॥ १४ ॥

उदाहरण देते हैं—

'खेद है मित्र । हम लोग कहाँ जायँ । क्योंकि उस तरुणी के स्तन और नितम्ब संपूर्ण संसार के मन को मथने वाले कामदेव के साथ प्रतिदिन वृद्धि को प्राप्त हो रहे हैं ॥ १४ ॥'

कष्टमिति । कश्चिद्विरही मित्रमिदमाह—हे सखे, कष्टं क्व व्रजामः । यतस्तस्यास्तरुण्याः स्तनकलशभरो नितम्बभित्तिभरश्चानुदिनं सकलस्य जगतो यो मन्मथस्तेन सह वृद्धिमुपैति । तां प्रति कामो वर्धत इत्यर्थः । अत्र प्रधानभूतं कुचकलशनितम्बभित्तिभरो वृद्धिगुणयुक्तोऽपरमर्थं मन्मथाख्यं वृद्धियुक्तं करोतीति । ततस्तस्य तथा कुर्वतः सहोक्तिरिति लक्षणयोजना ॥

अभियुज्येति । तुम आक्रमण करके सेना को भङ्ग कर देते हो । कैसी सेना को ? (तुम्हारे) भय के कारण जिसके नेत्र चञ्चल हो उठते हैं तथा भय के कारण जिसे अत्यधिक कम्पन और पसीना होने लगता है । यहाँ स्त्री के समान सेना (इस प्रकार अर्थ है) । जिस प्रकार कोई रमणी का सेवन करता है—प्रथम वह अभिसरण करता है फिर सेवन करता है तथा उस रमणी के भी नेत्र प्रथम समागम के कारण चञ्चल हो जाते हैं तथा साध्वस के कारण अत्यधिक स्वेद और कम्पन होता है । यहाँ 'अबलेव' में उपमा है । तथा अभियुज्य आदि में श्लेष है । उन दोनों का लक्षण अपनी बुद्धि से घटा लेना चाहिए । ये दोनों (उपमा और श्लेष अलंकार) तिल और चावल के समान स्फुट हैं ।

तथान्यदप्यत्रैवाह—

सन्नारीभरणो भवानपि न किं किं नाविरूढो वृषं
किं वा नो भवता निकामविषमा दग्धाः पुरो विद्विषाम् ।
इत्थं द्वौ परमेश्वराविह शिवस्त्वं चैकरूपस्थिती
तत्किं लोकविभो न जातु कुरुषे सङ्गं भुजंगैः सह ॥२७॥

उससे भिन्न भी उदाहरण यहीं देते हैं—'क्या आप भी सन्नारीभरण नहीं हैं (सती स्त्री का पोषण करने वाले, पक्षा०—रण में शत्रुओं के हाथी को मार

डालने वाले), क्या आप वृष पर (बैल, पक्षा०— धर्म) पर आरूढ नहीं हैं। क्या आपने शत्रुओं के निकामविषम (तान, पक्षा०—अत्यन्त दुर्ग) नगर नहीं जलाये हैं। इस प्रकार इस संसार में शिव और तुम समान स्थिति वाले दोनों ही परमेश्वर हो, तब क्यों हे राजन् (तुम) भुजङ्गों (सर्प, पक्षा०—विलासियों, दुष्टों) की सङ्गति नहीं कर रहे हो ॥ २७ ॥'

सन्नारीति। हे लोकविभो राजन् , इत्थमुक्तप्रकारेण त्वं हरश्च परमेश्वरौ। यस्मादेकस्वरूपस्थिती तुल्यस्वभावव्यवहारौ। तत्कदाचिदपि भुजंगैः सह सङ्गं न कुरुषे। तदेव तुल्यत्वं वक्ति—स हि हरः सतीं नागिमुमाख्यां बिभर्ति धारयति। भवानपि शोभनां नारीं बिभर्ति पोषयतीत्यर्थः। अथवा सन्ना अवसादं गता अरीभा रिपुकरिणो रणे यस्य स तथाविधः। हरो वृषं जरद्गवमधिरूढः। भवानपि वृषं धर्मम्। तथा हरेण विद्विषां त्रिपुरवासिनां विषमास्तिस्रः पुरो दग्धाः। भवताप्यत्यन्तदुर्गाः शत्रूणां पुरो दग्धाः। सर्वत्र किंशब्दः प्रश्ने। तथा तस्य परमेश्वर इति संज्ञा। त्वमपि परम उत्कृष्ट ईश्वरोऽर्थवान्। एवं यादृशो हरस्तादृशो भवानपि। तद्यथा तेन भुजगैः सह संपर्कः कृतस्तथा त्वयापि विट्गैः कथं न कृत इति व्यतिरेकस्य श्लेषस्य चात्र संकरः। साधारणविशेषणयोगात् (श्लेषणयोगात्) श्लेषसद्भावः। हरे उपमाने भुजगसङ्गस्य दोषस्य सत्त्वाद्राजनि चासत्त्वाद्गुणत्वे सति व्यतिरेकसद्भावः। एतौ चात्र तिलतण्डुलवत्प्रकटौ ॥

सन्नारीति। हे लोकेश्वर राजन्! इस प्रकार आप और शंकर परम ईश्वर हैं। आप दोनों की स्थिति समान है, व्यवहार और स्वभाव तुल्य हैं। तो फिर (तुम) भुजङ्गों की सङ्गति कभी भी क्यों नहीं करते। उसी तुल्यता को बताते हैं—वे शिव उमा नाम वाली सती नारी को धारण करते हैं। आप भी सुन्दर स्त्रियों का पोषण करते ही हैं। अथवा सन्न हो गये—कष्ट को प्राप्त हो गये शत्रुओं के हाथी जिसके रण में ऐसे आप। शिव जी वृद्ध वृष (बैल) पर सवार होते हैं। आप भी वृष (धर्म) पर। इसी प्रकार शिव ने त्रिपुरवासियों के तीन नगर जला डाले तो आप ने शत्रु के अत्यन्त अगम नगरों को जला डाला। किं शब्द सर्वत्र प्रश्न के लिये प्रयोग किया गया है। तथा उस (शिव) की 'परमेश्वर' यह संज्ञा है। तुम भी अत्यन्त वैभवशाली हो। इस प्रकार जैसे शिव हैं वैसे ही आप भी। तो फिर जैसे उन्होंने भुजङ्गों (सर्पों) के साथ सम्पर्क स्थापित किया है उसी प्रकार तुमने भी विड्गों के साथ क्यों नहीं किया—इस प्रकार यहाँ व्यतिरेक और श्लेष का संकर है। साधारण (उभयाश्रित) विशेषणों के योग से यहाँ श्लेष है। उपमान शिव में भुजङ्ग की संगति के दोष के भाव

और (उपमेय) राजा में अभाव के कारण गुण होने से व्यतिरेक है। ये दोनों (श्लेष और व्यतिरेक) तिल और चावल के समान स्फुट हैं॥

इदानीमव्यक्तसंकरोदाहरणमाह—

आलोकनं भवत्या जननयनानन्दनेन्दुकरजालम्।
हृदयाकर्षणपाशः स्मरतापप्रशमहिमसलिलम्॥ २८॥

आगे अव्यक्त संकर का उदाहरण देते हैं—'तुम्हारा देखना लोगों के नेत्रों, को आनन्द देने वाले चन्द्र का किरण-पटल, हृदय को आकर्षित करने के लिये पाश, और काम-सन्ताप को शान्त करने के लिये शीतल जल है॥ २८॥'

आलोकनमिति। भवत्या आलोकनं जननयनानन्दनेन्दुकरजालमेवेति रूपकम्। गुणानां साम्ये सत्युपमानोपमेययोरभिदेति रूपकलक्षणात्। अथवा भवत्या आलोकनं जननयनानन्दने इन्दुकरजालमिवेत्युपमा। एतौ चालंकारावव्यक्तांशौ। अत्र प्रमाणाभावादेकतरानिश्चयः। लोपामावाच्चोभयमप्याश्रयितुं योग्यम्। एवं हृदयाकर्षणपाश एव पाश इव वा। स्मरतापप्रशमने हिमसलिलमेव तदिव वेति। रूपकोपमासंकरोऽयमलंकारः॥

आलोकनमिति। आप का देखना लोगों के नेत्रों को आनन्द देने वाला चन्द्र का किरण पटल है— यह रूपक है। क्यों कि गुणों में साम्य होने पर उपमान और उपमेय में अभेद रूपक का लक्षण कहा गया है। अथवा तुम्हारा देखना लोगों के नेत्रों को आनन्द देने में चन्द्र के किरण-पटल के समान है–यह उपमा है। इन दोनों (रूपक और उपमा) अलंकारों का अंश अव्यक्त है। यहाँ साधक के अभाव के कारण किसी एक का निश्चय नहीं हो पाता तथा बाधक के अभाव के कारण दोनों का ही आश्रय किया जा सकता है। इसी प्रकार हृदय के आकर्षण करने में पाश ही है या पाश के समान है (तथा) काम-सन्ताप का निवारण करने में शीतल जल ही है या उसके समान है (आदि समझना चाहिये)। यह रूपकोपमा संकर अलंकार है॥

तथा—

आदौ चुम्बति चन्द्रबिम्बविमलां लोलः कपोलस्थलीं
संप्राप्य प्रसरं क्रमेण कुरुते पीनस्तनास्फालनम्।
युष्मद्वैरिवधूजनस्य सततं कण्ठे लगत्युल्लसन्
किं वा यन्न करोत्यवारितरसः कामीव बाष्पः पतन्॥२९॥

इसके अतिरिक्त—'प्रारम्भ में चन्द्र-बिम्ब के समान स्वच्छ कपोलस्थली का चुम्बन करता है। तदनन्तर (वह) लोलुप प्रसार पाकर क्रमशः स्थूल स्तनों का आस्फालन करता है—इस प्रकार उल्लसित होकर निरन्तर गले में लगता है—(राजन्) तुम्हारी शत्रु रमणियों का आँसू अनिवारित आवेश वाला कामी वह क्या है जिसे गिरता हुआ नहीं करता है ॥ २९ ॥'

आदावेति। हे नृप, युष्मद्वैरिवधूजनस्य सम्बन्धो बाष्प पतत्प्रसरः कामीव किं वा यन्न करोति। वा इवार्थे। किमिव यन्न करोतीत्यर्थः। बाष्पस्तावत्पतन्प्रथमं कपोलस्थलीं चुम्बति। कामुकोऽपि तथैव। ततो बाष्पः प्रसरं प्राप्य क्रमेण पीनस्तनास्फालनं कुरुते। कामुकोऽपि तदेव। ततः कण्ठे च द्वावपि लगतः। ततश्चावारितरसो बाष्पः कामीव किमिव न कुरुते। जघनस्थलमपि स्पृशतीत्यर्थः। अत्र रूपकोपमाश्लेषपर्यायाणां संकरः। तत्र कपोलस्थलीमिति रूपकम्। कामीव चन्द्रबिम्बविमलामिति चोपमा। बाष्पकामिनोः साधारणविशेषणयोगाच्छ्लेषः। शत्रवश्च त्वया जिता इति तात्पर्यतः पर्यायसद्भाव इति। अत्र चालंकारसंकरे पूर्वकविलक्ष्याणि भूरिशो दृश्यन्त इत्यत्र महानादरः कार्यः। तथा च—'दिवाकराद्रक्षति यो गुहासु' इत्यादि। अत्रोत्प्रेक्षार्थान्तरन्यासोपमानां संकरः। यथा च—'रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः प्रियाया गुणैस्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि। कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः ॥' एतौ श्लेषव्यतिरेकौ। एवमन्यदपि बोद्धव्यमिति ॥

इति श्रीरुद्रटकृते काव्यालंकारे नमिसाधुविरचितटिप्पणसमेतो

दशमोऽध्यायः समाप्तः।

आदावेति। हे राजन्! तुम्हारे शत्रु-रमणियों के आँसू कामुक के समान क्या क्या नहीं करते हैं। 'वा' शब्द इव के अर्थ में आया है। अर्थात् क्या क्या है जो नहीं करता है (अर्थात् सब कुछ करता है)। बाष्प (आँसू) पहले गिरकर कपोलस्थली को चूमता है—कामुक भी उसी प्रकार (कपोलस्थली को ही चूमता है)। तदनन्तर आँसू प्रसार पाकर स्थूल स्तनों पर आघात करता है—कामी भी उसी प्रकार स्थूल स्तनों का आमर्दन करता है। तदनन्तर दोनों (आँसू और कामी) ही गले में लिपटते हैं। तदन्तर अनिवारित आवेश वाले कामी के समान अनिवारित वेग वाला आँसू क्या नहीं करता है अर्थात् जघन स्थल का भी स्पर्श कर लेता है। यहाँ रूपक, उपमा, श्लेष और पर्याय अलंकारों का संकर है। उनमें कपोलस्थली (कपोल रूप स्थल) में रूपक है। 'कामुक के

समान चन्द्रबिम्ब के सदृश स्वच्छ'-इस स्थल पर उपमा है। बाण और कामुक के साधारण (उभयाश्रित) विशेषणों के योग के कारण श्लेष है, 'तुमने शत्रुओं को जीत लिया' यह प्रयोजन होने के कारण पर्याय अलंकार है। इस संकर अलंकार के पूर्व कवियों के अनेक उदाहरण मिलते हैं। अतएव इनकी रचना में कवि का विशेष अभिनिवेश होना चाहिये। उदाहरण भी है —'जो गुफाओं में सूर्य से रक्षा करती है' इत्यादि। इसमें उत्प्रेक्षा, अर्थान्तरन्यास और उपमा का संकर है॥ और भी—'तुम नये नये पल्लवों से रक्त हो, मैं भी प्रिया के प्रशंसनीय गुणों से रक्त हूँ। तुम्हारे पास शिलीमुख (भ्रमर) आ रहे हैं तो हे मित्र मेरे पास भी काम के धनुष से छोड़े गये शिलीमुख (बाण) आ रहे हैं। यदि कान्ता के पाद (चरण) का आघात तुम्हारी प्रसन्नता (विकास) के लिये है (पादाघाताद‍शोको विकसति, यह कवि प्रसिद्धि है) तो उसी प्रकार मेरे लिये भी। हम दोनों का सब कुछ समान है। हे अशोक केवल मैं विधाता के द्वारा सशोक बना दिया गया हूँ।' यहाँ श्लेष और व्यतिरेक का संकर है। इसी प्रकार और भी संकर भेदों को जानना चाहिए॥

इस प्रकार रुद्रट रचित काव्यालंकार में नमि साधु रचित टिप्पण से युक्त दसवाँ अध्याय समाप्त हुआ॥

एकादशोऽध्यायः

अर्थस्यालङ्कारा अभिहिताः। सम्प्रति दोषाः कथ्यन्ते। नन्वर्थालंकारप्रतिपादनात्प्रागेवार्थदोषाः परिहृता एव तत्किमिति पुनस्ते कथ्यन्त इत्याह—

परिहृत एव प्रायो दोषोऽर्थस्यान्यथोक्तिपरिहारात्।
अयमुच्यते ततोऽन्यस्तत्कारणमन्यथोक्तौ च ॥ १ ॥

अर्थ के अलङ्कारों का विवेचन हो चुका अब (उसके) दोषों का विवेचन करेंगे प्रश्न यह उठता है कि *अर्थ के अलङ्कारों का प्रतिपादन करने अर्थ के दोषों का* परिहार पहले ही हो चुका फिर उनके वर्णन करने की क्या आवश्यकता—इसे बताते हैं—

'अन्यथोक्ति (स्वरूप के विपरीत अभिधान) के परिहार से (वास्तवादि से) अर्थ के दोष का परिहार तो प्रायः किया ही जा चुका है। अन्यथोक्ति से भिन्न (स्वरूप दोष) का उस अर्थ की अन्यथा उक्ति में जो कारण होते हैं उसका यहाँ विवेचन किया जा रहा है ॥ १ ॥'

परिहृत इति। 'सर्वः स्वं स्वं रूपम्' (७।७) इत्यादिना ग्रन्थेनार्थस्य विपरीतकथनलक्षणो यो महान्दोषः सोऽस्माभिः 'तं च न खलु वध्नीयान्निष्कारणमन्यथातिसारत्' (७।७) इत्यनेनान्यथोक्तिपरिहारात्परिहृत एव। यस्तु ततोऽन्यथोक्तेरन्य स्वरूपदोषः सोऽयमधुनोच्यते। तथा तस्यार्थस्यान्यथोक्तौ यत्कारणं तदप्युच्यते। परिहृतमेव सर्वं दोषजातमन्यथोक्तिपरिहारद्वारेण। किंचिदेव दुर्लक्ष्यमपरिहृतमस्तीति प्रायोग्रहणेन सूच्यते। यत्तु विद्यते तदधुना परिह्रियते ॥

परिहृत इति। 'सभी (अर्थ) अपने अपने रूप में ही वर्तते हैं (७।७) आदि कारिका के द्वारा अर्थ के अन्यथा–उपन्यास रूप महान् दोष का हमने 'उस (अर्थ) को अकारण रस के आवेश में आकर अन्यथा नहीं उपन्यस्त करना चाहिए' (७।७) आदि कारिका के द्वारा परिहार तो कर ही दिया। उस अन्यथा–उपन्यास के अतिरिक्त जो स्वरूप दोष होते हैं उनका अब आगे वर्णन किया जायगा तथा उस अर्थ के अन्यथा–उपन्यास में यदि कारण होता है तो उसका भी व्याख्यान किया जायगा। (तात्पर्य यह कि) अन्यथा-उपन्यास का परिहार

करके सकलदोष का परिहार किया ही जा चुका है। (कारिका में) 'प्रायः' ग्रहण से यह सूचित होता है कि कठिनाई से भाँपे जाने योग्य कुछ ही दोष हैं जिनका परिहार नहीं हो सका है। जो (दोष) है उनका अब परिहार किया जा रहा है॥

अथ तानेव दोषानुद्दिशति—

अपहेतुरप्रतीतो निरागमो बाधयन्नसंबद्धः।

ग्राम्यो विरसस्तद्वानतिमात्रश्चेति दुष्टोऽर्थः॥ २॥

उन दोषों का नाम गिनाते हैं—'अपहेतु, अप्रतीत, निरागम, बाधयन्, असम्बद्ध, ग्राम्य, विरस, तद्वान्, और अतिमात्र दुष्ट अर्थ हैं॥ २॥'

अपहेतुरिति। अपहेत्वादयो नवार्थदोषाः। इतिशब्दो हेत्वर्थे प्रत्येकमभिसंबध्यते। यतोऽपहेतुरतो दुष्ट इत्यर्थः। एवमन्यत्रापि योज्यम्॥

अपहेतुरिति। अपहेतु आदि अर्थ के नव दोष हैं। हेतु के अर्थ में इति शब्द प्रत्येक के साथ अन्वित होता है। अर्थात् अपहेतु है अत एव दुष्ट है। इसी प्रकार अन्यत्र भी योग होगा॥

यथोद्देशस्तथा लक्षणमिति कृत्वा पूर्वमपहेतुलक्षणमाह—

अपहेतुरसौ यस्मिन् केनचिदंशेन हेतुतामर्थः।

याति तथात्वे युक्त्या बलवत्या बाध्यते परया॥ ३॥

'नाम संकीर्तन के अनुसार लक्षण करना चाहिये' इस परम्परा के अनुसार सर्वप्रथम अपहेतु का स्वरूप बताते हैं—'जहाँ किसी अंश में कोई अर्थ किसी कार्य का कारण बन जाता है और बलवती युक्ति से बाधित हो जाता है–उसे अपहेतु कहते हैं॥ ३॥

अपहेतुरिति। असावपहेतुर्दोषः, यत्र केनचित्प्रकारेणार्थस्तथात्वे तद्धर्मतायां हेतुत्वं याति। स च हेतुतां गतः सन्नपरया बलिष्ठया युक्त्या बाध्यते। यदा चार्थहेतुः यस्तद्वावस्तदान्यथोक्तिपरिहारेण न परिहृत॥

अपहेतुरिति। जहाँ किसी संयोग से कोई अर्थ किसी कार्य का कारण हो जाता है उसे अपहेतु नामक दोष कहते हैं। कारण बन जाने पर (बाद में) यह बलवती युक्ति से बाधित हो जाता है। जब वह उस अर्थ का वास्तविक हेतु होता है तब अन्यथा उपन्यास के द्वारा किये गये परिहार से उसका परिहार नहीं होता।

उदाहरणम्—

तव दिग्विजयारम्भे चलधूलीमहलतोयजनितेषु।

गगनस्थलेषु भानोश्चक्रमभूद्रथभशाभिन्नम्॥ ४॥

उदाहरण—'तुम्हारी दिग्विजय के अभियान में सेना से (उठी हुई) धूलि-पटलरूपी जल में उत्पन्न गगनभूमियों में सूर्य का चक्का रथ के भार से सुगरिचित हो गया ॥ ४ ॥'

तवेति। गतार्थमेव। अत्र धूलेर्बहलत्वलक्षणोऽर्थः स्थलत्वे हेतुतां यात्येव। किं तु स्थलस्य गगने निराधारत्वादवस्थानं न संभवतीत्यनयोत्तरकालभाविन्या बलवत्या युक्त्या बाध्यते ॥

तवेति। अर्थ तो सुस्पष्ट ही है। यहाँ धूलि का आधिक्य स्थल होने में कारण बन ही जाता है। किन्तु स्थल की आकाश में निराधार होने के कारण सत्ता सम्भव ही नहीं है, इस प्रकार उत्तर काल में होने वाली बलवती युक्ति से बाधित हो जाता है ॥

अथाप्रतीत—

अर्थोऽयमप्रतीतो यः सन्नपि न प्रयुज्यते वृद्धैः।
शरदिव विभाति तन्वी विकसत्पुलकोत्करेयमिति ॥ ५ ॥

अप्रतीत (का लक्षण करते हैं)—'जो अर्थ विद्यमान होने पर भी वृद्धों के द्वारा व्यवहार में नहीं लाया जाता वह अप्रतीत कहा जाता है ॥ (जैसे)—बढ़ती हुयी पुलकावलियों वाली यह कृशाङ्गी शरद् के समान सुशोभित होती है ॥ ५ ॥'

अर्थ इति। अयमप्रतीतोऽर्थो भण्यते यो विद्यमानोऽपि वृद्धैः पूर्वकविभिर्न प्रयुज्यते। उदाहरणम्—[शरदिति] प्रसरद्रोमाञ्चनिवहा तन्वी भाति। शरच्च पुष्यत्पुलकाख्यवृक्षविशेषनिवहा। अत्र पुलकशब्दो वृक्षविशेषवाचकोऽपि तद्वाचकत्वेन पूर्वकविभिर्न प्रयुक्त इति न प्रयोज्यः ॥

अर्थ इति। जो अर्थ विद्यमान (कोष में पठित) होने पर भी प्राचीन कवियों के द्वारा नहीं प्रयोग किया गया है उसे अप्रतीत कहते हैं। उदाहरण—[शरदिति।] उठते हुये रोमाञ्च निवह वाली कृशाङ्गी शोभित होती है। शरद् भी पुष्पित होते हुये पुलक नामक वृक्ष विशेष की पंक्तियों से युक्त होती है। यहाँ पुलक शब्द वृक्ष विशेष का वाचक होकर भी उस अर्थ में पूर्व कवियों के द्वारा नहीं प्रयोग किया गया है। अतएव (उसका अप्रयुक्त अर्थ में) प्रयोग नहीं करना चाहिये ॥

अथ निरागम—

आगमगम्यस्तमृते य उच्यतेऽर्थो निरागमः स इति।
सततं सगजस्तुरगैरीजे विप्रोऽश्वमेधैश्च ॥ ६ ॥

अत्र निरागम (का लक्षण करते हैं)—'आगम (सिद्धान्त) सापेक्ष होने पर भी जो अर्थ आगम-निरपेक्ष हो कहा जाता है उसे निरागम कहते हैं। (उदाहरण) वह ब्राह्मण सदैव राजसूय और अश्वमेध यज्ञ करता था ॥ ६ ॥'

आगमेति। योऽर्थ आगमात्सिद्धान्ताद्गम्यते, अथ चागमनिरपेक्ष एवोच्यते, स इत्यनेन प्रकारेण निरागम। उदाहरणम्—सततमिति। अत्र विप्रस्य राजसूयाश्वमेधौ यागौ कथितौ। तौ च वेदगम्यौ। वेदे च तयोर्नृपस्यैवाधिकारो न ब्राह्मणस्येत्युक्तम् ॥

आगमेति। जो अर्थ आगम (सिद्धान्त) से गम्य होकर भी आगम निरपेक्ष ही उपन्यस्त होता है उसे निरागम समझना चाहिये। उदाहरण—सततमिति। यहाँ राजसूय और अश्वमेध यज्ञ ब्राह्मण के बताये गये हैं। उन दोनों का ज्ञान वेद से होता है और उन दोनों को करने का अधिकार राजा को प्राप्त है ब्राह्मण को नहीं। (किन्तु यहाँ ब्राह्मण का) बताया गया है। (अत एव उक्त अर्थ निरागम दोष से दुष्ट है) ॥

अथ बाधयन्—

य: पूर्वमन्यथोक्तं तद्वक्तृकमेव बाधयेदर्थम्।
अर्थः स बाधयन्निति मृगाक्षि नेत्रे तवानुपमे ॥ ७ ॥

बाधयन् (का लक्षण करते हैं—

'जो उस (समान) वक्ता के ही अन्यथा उक्त पूर्व अर्थ को बाधित कर देता है वह बाधयन् अर्थ कहा जाता है। जैसे हे मृगाक्षि! तेरे नेत्र अनुपम हैं ॥७॥'

य इति। योऽर्थ उत्तरकालं भण्यमानः समानवक्तृकं पूर्वमन्यथोक्तमर्थं बाधयेत्स बाधयन्निति भण्यते। यथा—मृगाक्षि नयने तवानुपमे, अत्र येनैव वक्त्रा प्रथमं मृगाक्षीत्युक्तं तेनैव पुनस्तव नयने अनुपमे इति पूर्वस्य बाधकमुक्तम्। इदं चात्र निदर्शनम्। यथा-'वपुरनुपमं नाभेरूर्ध्वं विधाय मृगीदृशो ललितललितैरङ्गन्यासैः पुरा रभसादिव। तदनु सहसा खिन्नेनेव प्रजापतिना भृशं पृथुलपृथुला स्थूलस्थूला कृता जघनस्थली ॥' अत्र नाभेरूर्ध्वमनुपमं वपुरित्याद्युक्त्वा मृगीदृश इत्युक्तम् ॥

य इति। उत्तर काल में उपन्यस्त होने वाला जो अर्थ उसी वक्ता के पूर्वोक्त अर्थ को अन्यथा होने के कारण बाधित कर देता है उसे बाधयन् कहते हैं। जैसे हे मृगाक्षि! तुम्हारे नेत्र अनुपम हैं। यहा जिस वक्ताने पहले मृग के नेत्रों के समान नेत्र वाली कहा उसी ने बाद में 'तुम्हारे नेत्र अनुपम हैं' इस बाधक को कहा। और यह भी उदाहरण जैसे—'पहले जल्दी के कारण मानों सुन्दर-सुन्दर अङ्गों का न्यास करके मृगनयना के नाभि के ऊपर अनुपम शरीर की

रचना करके तदनन्तर एकाएक थके से होकर ब्रह्मा ने अत्यन्त बड़ी बड़ी मोटी मोटी जाँघें बना दीं ॥' यहाँ नाभि के ऊपर अनुपम शरीर कह कर फिर मृग के नेत्रों के समान नेत्रों वाली यह कहा गया (अतएव बाधयन् है) ॥

अथासंबद्ध —

प्रक्रान्तानुपयोगी प्राप्तो यस्तत्क्रमादसंबद्धः ।
स इति गता ते कीर्तिर्बहुफेनं जलधिमुल्लङ्घ्य ॥ ८ ॥

असम्बद्ध—'प्राकरणिक अर्थ के क्रम से प्राप्त होने पर भी जो अर्थ प्रकरण के लिये अपेक्षित नहीं होता है उसे असम्बद्ध कहते हैं (जैसे, तुम्हारी कीर्ति अत्यधिक फेन वाले सागर को लाँघ गयी ॥ ८ ॥'

प्रक्रान्तेति । योऽर्थः प्रक्रान्तार्थक्रमायातोऽपि प्रक्रान्तेऽर्थेऽनुपयोगी सोऽसंबद्ध इत्युच्यते । उदाहरणम्—गता ते कीर्तिरित्यादि । अत्र जलधौ संबद्धत्वात्फेनानां बहुफेनत्वं क्रमप्राप्तम् । अथ च प्रस्तुतेऽर्थेऽनुपयोगि । यदि बहुफेनत्वं जलधेर्दुस्तरत्वे हेतुर्भवेत्तदा भवेदपारजलधिलङ्घनं कीर्तेरतिशयाय । न चैवमस्ति । तस्माद्बहुफेनमित्येतदकिंचित्करम् ॥

प्रक्रान्तेति । जो अर्थ प्राकरणिक अर्थ के क्रम से प्राप्त होकर भी प्राकरणिक अर्थ के लिये उपयोगी नहीं होता उसे असम्बद्ध कहते हैं । उदाहरण—गता ते कीर्तिरित्यादि । यहाँ सागर से संबद्ध होने के कारण झाग का आधिक्य तो क्रम से प्राप्त हो जाता है किन्तु प्रस्तुत अर्थ में उसका कोई उपयोग नहीं । यदि झाग का आधिक्य सागर की दुस्तरणीयता का कारण होता तब अपार सागर के लाँघने में कीर्ति का अतिशय होता । किन्तु ऐसा नहीं है । अतएव 'बहुफेनत्व' के प्रयोग का कोई मूल्य नहीं ॥

अथ ग्राम्य —

ग्राम्यत्वमनौचित्यं व्यवहाराकारवेषवचनानाम् ।
देशकुलजातिविद्यावित्तवयःस्थानपात्रेषु ॥ ९ ॥

ग्राम्य—'(मध्य आदि) देश, (इक्ष्वाकु आदि) कुल, (ब्राह्मण आदि) जाति, विद्या, धन, अवस्था, स्थान और पात्रों में चेष्टा, आकृति, वेष, और वाणी के अनौचित्य का नाम ग्राम्यत्व है ॥ ९ ॥'

ग्राम्यत्वमिति । यद्व्यवहाराकारवेषवचनानां चतुर्णामपि प्रत्येकं देशकुलजातिविद्यावित्तवयःस्थानपात्रेष्वष्टसु विषयेष्वनौचित्यं तद्ग्राम्यत्वं दोषः । तत्र व्यवहारश्चेष्टा । आकारः स्वाभाविकं रूपम् । कृत्रिमं तु वेषः । वचनं भाषा । तथा देशो मध्यदेशादिरार्यानार्यभिन्नः । कुलं गोत्रमिक्ष्वा-

कादि: । देवदैत्यादिकमित्यन्ये । जाति: स्त्रीपुंसादिका ब्राह्मणत्वादिका वा । विद्या शास्त्रज्ञता । वित्त धनम् । वय शैशवादिकम् । स्थानं पदमधिकारः । पात्राणि भरतोक्तान्युत्तममध्यमादीनि । तत्रार्यदेशेष्वकरुणो व्यवहारः, भयंकर आकार', उद्धतो वेष , परुपवचनमनुचितम् । म्लेच्छेषु त्वेतदेवोचितम् । तथा ग्रामेषु यदुचित तदेव नगरेषु ग्राम्यम् । एव कुलजेषु परिभवसहत्वादिको व्यवहार', असौम्य आकारः, विकृतो वेपः, वितथं वचनमनुचितानि । जातौ तु ब्राह्मणादीनां निजनिजजातिविहितव्यवहाराकारवेपवचनान्युचितानि तदन्यथा त्वनुचितानि । पुरुषेषु शूद्रवर्जमन्नपानादिको व्यवहार., स्थूललम्बश्मश्रुरहित च रूपमाकार., कौसुम्भवस्त्रं काचाद्याभरण च वेष., समन्मथादिवचनमनुचितम् । स्त्रीपु तदेवोचितम् । एवमन्येषामपि । तथा विद्यायां पण्डितेषु शास्त्रग्रहणपूर्वको व्यवहार , सव्याधिवपुराकार , उद्भटो वेष', असंस्कृतवचनमनुचितानि । मूर्खेपु तान्येवोचितानि । वित्ते धनिना दानोपभोगरहितो व्यवहारः, दु'स्पर्शादिराकार', मलिनवस्त्रादिको वेप', दीन वचनमनुचितानि । द्रमकेषु (?) तान्येवोचितानि । वयसि वृद्धेषु सेवादिव्यवहार , इन्द्रियपाटवादिराकारः, कुण्डलादिधारण वेप', समन्मथं वचनमनुचितानि । तरुणेषु तान्येवोचितानि । स्थाने राज्ञां सक्रोधलोभादिको व्यवहारः, निर्लक्षण आकार', कुण्डलादिरहितो वेप, परुपं दीनं वचनमनुचितानि । एवं पात्रेपु यानि भीमसेने व्यवहारादीन्युचितानि तान्येव युधिष्ठिरे ग्राम्याणीत्यादि । एतत्तु ग्राम्यत्वमन्ययोक्तिपरिहारेण न परिहृतम् ॥

ग्राम्यत्वमिति । व्यवहार, आकृति, देश और वाणी में किसी एक का देश, कुल, जाति, विद्या, धन, वय, स्थान और पात्र —इन आठ विषयों में जो अनौचित्य होता है उसे ग्राम्यत्व कहते हैं। उनमें व्यवहार कहते है चेष्टा को। आकार स्वाभाविक रूप होता है। वेष कृत्रिम होता है। वचन नाम है भाषा का तथा आर्य और अनार्य के भेद से मध्यदेश आदि देश है। इक्ष्वाकु आदि कुल हैं। देवता, राक्षस आदि अन्य श्रेणियाँ है। स्त्री, पुरुष आदि जातियाँ है अथवा ब्राह्मण आदि जातियाँ हैं। शास्त्र ज्ञान का नाम है विद्या, वित्त धन को, अवस्था शैशव आदि को, स्थान पद या अधिकार को कहते हैं। भरत के द्वारा व्याख्यात उत्तम, मध्यम और अधम पात्र है। उनमें आर्य देश में निर्दय व्यवहार, भयावनी आकृति, उद्धत वेष और कटु वचन अनुचित है। म्लेच्छों के देश में यही सब उचित है। इसी प्रकार गावों में जो उचित है वही नगरों मे अनुचित। इसी प्रकार कुलीनों में अपमान आदि सहने का व्यवहार, असौम्य आकृति,

विकृत वेष और मिथ्या वचन अनुचित हैं। ब्राह्मण आदि जातियों में भी अपनी अपनी जाति में विहित व्यवहार, आकार, वेष और भाषा उचित है और इसके विपरीत अनुचित। शूद्रों को छोड़कर पुरुषों में भोजन आदि पकाने का कार्य, स्थूल स्तन तथा बिना दाढ़ के आकार, कुसुम्भ (लाल) वर्ण के वस्त्र, स्वर्णवर्ण के अलङ्कार और कामुक वचन अनुचित हैं। स्त्रियों में वही उचित है। इसी प्रकार अन्यत्र भी (उचित या अनुचित होता है)। इसी प्रकार विद्या में पण्डितों में शास्त्र लेकर शास्त्रचर्चा, रोग से आपन्न शरीर वाली आकृति, उद्धत वेष और अशिष्ट वचन अनुचित हैं, मूर्खों में वे ही उचित हैं। वित्त में धनिकों का दान और भोग से शून्य व्यवहार, अस्पृश्य आकार, मलिन वस्त्र आदि वेष तथा दीन वचन अनुचित हैं। दरिद्रों में वे ही उचित हैं। अवस्था में वृद्धों में सेवा आदि व्यवहार, इन्द्रियों के कौशल आदि से युक्त आकार, कुण्डल आदि (अलङ्कारों) का धारण, वेष और कामुक वचन अनुचित हैं। युवकों में वे ही उचित हैं। स्थान में राजाओं का क्रोध, लोभ आदि से युक्त व्यवहार, बिना (राजसी) लक्षण के आकार, कुण्डल आदि से शून्य वेष और कठोर वचन अनुचित हैं। इसी प्रकार पात्रों में भीमसेन में जो व्यवहार आदि उचित हैं वे ही युधिष्ठिर में अनुचित हैं। इस ग्राम्यत्व दोष का परिहार अन्यथोक्ति का परिहार करने में नहीं हुआ था॥

अथात्रैव दिक्प्रदर्शनार्थमाह—

प्रागल्भ्यं कन्यानामव्याजो मुग्धता च वेश्यानाम्।
वैदग्ध्यं ग्राम्याणां कुलजानां धौर्त्यमित्यादि॥ १०॥

अब इसका दिगुन्मीलन करने के लिये कहते हैं—'कन्याओं में प्रगल्भता, वेश्याओं में मुग्धता, गवारिनों में विदग्धता और कुलजाओं में धूर्तता आदि (ग्राम्यत्व है)॥ १०॥

प्रागल्भ्यमिति। कन्याशब्देन नवोढा लक्ष्यते। कन्यानां नवोढाङ्गनानां प्रागल्भ्यं वैयात्यम्। तथा वेश्यानां पण्यस्त्रीणामव्याजमकृत्रिमं मौग्ध्यम्। तथा ग्राम्याणां वैदग्ध्यम्। तथा कुलीनानां धूर्तत्वमनुचितम्। ग्राम्यमित्यर्थः॥

प्रागल्भ्यमिति। कन्या शब्द का लक्ष्य है 'नवविवाहिता'। नवविवाहिता वधुओं में प्रगल्भता—निर्लज्जता (ग्राम्य है) तथा वेश्याओं में अकृत्रिमता, गवाँरियों में चालाकी और कुलजाओं में मिथ्याव्यवहार ग्राम्य है। अर्थात् अनुचित है॥

ततश्च किमित्याह—

एतद्विज्ञाय बुधैः परिहर्तव्यं महीयसो यत्नात्।
नहि सम्यग्विज्ञातुं शक्यमुदाहरणमात्रेण॥ ११॥

आगे उपाय क्या है—इसे बताते हैं—'विद्वानों को बड़े प्रयत्न से जानकर इस (ग्राम्य) को त्याग देना चाहिये। उदाहरण देने से ही इसका समुचित ज्ञान नहीं हो सकता ॥ ११ ॥'

एतदिति। एतद्ग्राम्यत्वं विशेषेण ज्ञात्वा महीयसो यत्नादादरेण परिहर्तव्यम्। महाकवयो यत्र मुह्यन्तीत्यतो महीयसो यत्नादित्युक्तम्। तदुदाहरणानि किमेतेषु नोच्यन्त इत्याह—नहीत्यादि। यस्मादुदाहरणमात्रेण न यथावद्विज्ञातुं शक्यते। ततः स्वधिया विज्ञाय यथा ग्राम्यत्वं न भवति तथा प्रयोज्यम्। यथा—'व्याहृता प्रतिवचो न संदधे गन्तुमैच्छदवलम्बितांशुका। सेवते स्म शयनं पराङ्मुखी सा तथापि रतये पिनाकिन' ॥' तथा—'उपचरिताप्यतिमात्रं प्रकटवधूः क्षीणसंपदः पुंसः। पातयति दृशं व्रजतः स्पृहया परिधानमात्रेऽपि. ॥ एवमादि ॥

एतदिति। इस ग्राम्यत्व को विशेषपूर्वक जानकर बड़े कष्ट से—आदरपूर्वक त्याग देना चाहिये। (कारिकाकार के) 'महीयसो यत्नात्' कहने का तात्पर्य यह है कि महाकवियों की बुद्धि भी यहाँ मोहित हो जाती है। फिर इन (अनौचित्य-विषयों) में उदाहरण क्यों नहीं दिये इसके लिये कहते हैं—नहीत्यादि। उदाहरण देने से ही सम्यग्ज्ञान नहीं हो सकता (इसलिये महाकवि ने उदाहरण नहीं दिये)। अतएव अपनी बुद्धि से ही परख कर ऐसा प्रयोग करना चाहिये जिसमें ग्राम्यत्व का स्पर्श ही न हो। जैसे—'(शिव के द्वारा) अवलम्बित वस्त्रवाली, वह (पार्वती) पूछी जाने पर उत्तर नहीं देती (वे) जाना चाहती थी किन्तु शिव की प्रसन्नता के लिये पराङ्मुखी होकर शय्या का सेवन कर रही थी। (यहाँ शिव की इच्छा के विरुद्ध पार्वती का चला जाना अनौचित्य होता।)' और भी—'उपचरिता (परकीया) होकर भी प्रगल्भा नष्ट हुयी सम्पत्ति वाले पुरुष के वस्त्रमात्र पर भी दृष्टि को बड़ी स्पृहा के साथ डालती है। (यहाँ वधू का पुरुष पर दृष्टि न डालना अनौचित्य होता।)' इसी प्रकार और (उदाहरण जानने चाहिये।)

अथ विरसः—

अन्यस्य यः प्रसङ्गे रसस्य निपतेद्रसः क्रमापेतः।
विरसोऽसौ स च शक्यः सम्यग्ज्ञातुं प्रबन्धेभ्यः ॥ १२ ॥

विरस—'किसी भिन्न रस के प्रसङ्ग में जो अप्राकरणिक रस आ जाता है उसे विरस कहते हैं। वह (महाकाव्य आदि) प्रबन्धों से भली भाँति जाना जा सकता है ॥ १२ ॥'

अन्यस्येति । रसान्तरप्रभावो सत्यां यो रसः शृङ्गारादिः निपतति स विरसोऽर्थदोषः । ननु सर्वरसयुक्तत्वान्महाकाव्यस्य रसान्तरापातोऽभ्युपगत एव । तत्कथमत्र विरसोऽर्थदोष इत्याह—क्रमापेत प्रसङ्गविरुद्धः । यस्य रसस्य तत्रानवसरः स दुष्ट इत्यर्थः । किमत्रोदाहरणमित्याह—स चेत्यादि । चो हेतौ । यस्मात्स विरसोऽर्थदोषः प्रबन्धेभ्यो महाकाव्यादिभ्यः सम्यग्विज्ञातुं शक्यते । अत इह नोदाहृत इत्यर्थः ।

अन्यस्येति । 'अन्य रस के प्रसंग में जहाँ शृंगार आदि रस प्रविष्ट हो जाता है वहाँ विरस अर्थ दोष होता है । प्रश्न है कि सभी रसों से युक्त होने के कारण महाकाव्य में अन्य रस का प्रवेश तो स्वीकृत ही है तो फिर यहाँ विरस अर्थ-दोष कैसा' इसे बताते हैं—क्रम से दूर-प्रसङ्ग के विरुद्ध (अर्थ दुष्ट होता है ।) अर्थात् जिस रस के लिये वहाँ अवकाश नहीं है वह दुष्ट होता है । इसका उदाहरण क्या है इसे बताते हैं—स चेत्यादि । उस विरस अर्थ दोष का परिचय महाकाव्यादि से ही भली भाँति हो सकता है अतएव उसका उदाहरण यहाँ नहीं दिया गया ।

सूचीमात्रमाह—

तव वनवासोऽनुचितः पितृमरणशुचं विमुञ्च किं तपसा ।
सफलय यौवनमेतत्सममनुरक्तेन सुतनु मया ॥ १३ ॥

सूचनामात्र देते हैं—'तुम्हारा वनवास अनुचित है, पिता के दिवंगत होने का शोक छोड़ दो, तप व्यर्थ है । हे सुन्दरि ! (अपने पर) अनुरक्त मेरे साथ यौवन को सफल करो ॥ १३ ॥'

तवेति । हयग्रीवसुतो नरकासुरानयनाय तत्पुरीं गतः, तत्र च हरिहतं नरकासुरं अन्येभ्यः श्रुत्वा तत्सुतां च पितृमरणदुःखेन वनगतां बुद्ध्वा समाश्वासनाय गतः, तत्र दृष्ट्वा च तां सकाम सन्नाह—तव वनवास इत्यादि । पातनिकयैव गतार्थम् ॥

तवेति । हयग्रीव का पुत्र नरकासुर को लेने के लिये इसकी पुरी में गया । वहाँ विष्णु के द्वारा नरकासुर को मारा गया लोगों से सुनकर और पिता के मृत्यु के दुःख से उसकी पुत्री को वन में गयी हुयी जानकर (उसे) आश्वासन देने के लिये (वन में) गया, वहाँ उसे देखकर काम से युक्त होकर कहने लगा—'तव वनवास' इत्यादि । प्रसङ्ग से ही अर्थ अवगत हो गया ॥

प्रकारान्तरमाह—

यः सावसरोऽपि रसो निरन्तरं नीयते प्रबन्धेषु ।
अतिमहतीं वृद्धिमसौ तथैव वैरस्यमायाति ॥ १४ ॥

दूसरा प्रकार बताते हैं—'प्रासङ्गिक होकर भी अत्र प्रबन्धों में एक ही रस सुदूरव्यापी होता है तो उसी (पूर्व की) ही भाँति नीरसता को प्राप्त हो जाता है॥१४॥'

य इति। य काव्यादौ क्वापि प्रस्तुतो रसो नैरन्तर्येण महतीं वृद्धिं नीयते स श्रोतॄणां वैरस्यमावहतीति विरसो भवति। अत्र वेणीसंहार-षष्ठोऽङ्को निदर्शनम्॥

य इति। काव्यादि में कहीं भी जब कोई रस बहुत दूर तक ढोया जाता है तो श्रोताओं के लिये वह विरस हो जाता है। (भट्ट नारायण के) वेणीसंहार का छठाँ अङ्क इसका उदाहरण है।

अथ तद्वान्—

यो यस्याव्यभिचारी सगुणादिस्तद्विशेषणं क्रियते।

परिपूरयितुं छन्दो यत्र स तद्वानिति ज्ञेयः॥ १५॥

अब तद्वान् (का लक्षण करते हैं)—'जो गुण आदि जिस पदार्थ में नित्य होता है वह छन्दपूर्तिमात्र के लिये जब उसका विशेषण बना दिया जाता है तो उसे तद्वान् दोष जानना चाहिए॥ १५॥'

य इति। यो गुणादिर्यस्य पदार्थस्याव्यभिचारी नित्यस्थः स गुणादिस्तस्य विशेषणतया यत्र क्रियते स दोषस्तद्वानिति ज्ञेयः। यद्यव्यभिचारी तर्हि किमर्थं क्रियत इत्याह—परिपूरयितुं छन्द.। तस्य हि छन्दः पूरणमात्रमेवार्थ इति॥

य इति। जो गुण आदि जिस पदार्थ में अव्यभिचरित होते हैं वे गुण आदि उसी पदार्थ के जहाँ विशेषण आदि बना दिये जाँय उसे तद्वान् (दोष) जानना चाहिये। 'यदि वे गुणादि उस पदार्थ में अव्यभिचरित होते हैं तो उनका प्रयोग क्यों किया जाता है' इसे बताते हैं—परिपूरयितु छन्दः। अर्थात् उसके प्रयोग का प्रयोजन छन्द की पूर्तिमात्र होता है॥

उदाहरणम्—

क नु यास्यन्ति वराकास्तरुकुसुमरसैकलालसा मधुपाः।

भस्मीकृतं वनं तद्दवदहनेनातितीव्रेण॥ १६॥

उदाहरण—'अत्यन्त प्रचण्ड दावाग्नि ने उस वन को जला दिया। भला वृक्ष के एकमात्र फूलों के मकरन्द के लोभी बेचारे भ्रमर कहाँ जायँगे॥१६॥'

केति। अत्र दवदहनस्यातितीव्रेणेति विशेषणं छन्दःपूरणार्थमेव। तत्राव्यभिचारादिति॥

क्वेति। यहाँ 'अतितीव्रेण' दावाग्नि का यह विशेषण छन्द की पूर्तिमात्र के लिये किया गया है। क्योंकि दावाग्नि में अतितीव्रता तो अव्यभिचरित (नित्य) है॥

अथातिमात्रः—

अतिदूरमतिक्रान्तो मात्रां लोकेऽतिमात्र इत्यर्थः ।
तव विरहे हरिणाक्ष्याः प्लावयति जगन्ति नयनाम्बु ॥१७॥

अतिमात्र का लक्षण करते हैं—'जो अर्थ लोक में परिणाम को अत्यधिक दूर पार कर जाय उसे अतिमात्र कहते हैं। जैसे—मृगनयना ! तेरे वियोग में नेत्रों के आँसू लोकों को डुबा देते हैं ॥ १७ ॥'

अतिदूरमिति । योऽर्थो लोकप्रसिद्धां मात्रां परिणाममतिदूरमत्यर्थमतिक्रान्त उल्लङ्घित सोऽतिमात्रोऽर्थदोष । उदाहरणम्—तवेत्याद्युत्तरार्धम् । अत्राश्रुलक्षणोऽर्थो मात्रां त्यक्तवान् । परा ह्यश्रूणां भूयस्ता यद्वस्त्रार्द्रीकरणम् । न तु प्रलयजलवज्जगत्प्लावनम् ॥

अतिदूरमिति । जो अर्थ (अपनी) लौकिक मर्यादा से बहुत दूर चला जाता है उसमें अतिमात्र अर्थ-दोष होता है । उदाहरण—'तव' आदि से शुरू होने वाला छन्द का उत्तरार्ध । यहाँ अश्रुरूप अर्थ मर्यादा का उल्लङ्घन कर गया है । आँसू की परम सीमा यही हो सकती है कि वस्त्र भीग जाँय न कि प्रलयकाल के जल के समान संसार को डुबो दे ।

अथ यत्पूर्वमुक्तम् 'तत्कारणमन्यथोक्तौ च' (११ । १) इति तदाह—

अत्यन्तमसंबद्धं परमतमभिधातुमन्यदश्लिष्टम् ।
संगतमिति यद् ब्रूयात्तत्रायुक्तिर्न दोषाय ॥ १८ ॥

आगे अपनी पूर्व प्रतिज्ञा के अनुसार 'अर्थ के अन्यथा-उपन्यास (अपने स्वरूप से भिन्न रूप में उपन्यास) के कारणों की चर्चा की जायगी' (को ध्यान में रखकर) उनका विवेचन करते हैं—'दूसरे की बात कहने के लिये सर्वथा असम्बद्ध बात को वक्ता जब अपनी असम्बद्ध बात की संगति के लिये बोलता है तो असङ्गति से वहाँ कोई दोष नहीं होता है ॥ १८ ॥'

अत्यन्तमिति । असंबद्धार्थता महान्दोष । तस्यापवादोऽयम् । यत्र परकीयं मतमतिशयेनासंबद्ध प्रतिपादयितुमन्यदात्मीयमश्लिष्टमसंबद्धमर्थं वक्ता वक्ति तत्रायुक्तिरसंगतता न दोषाय । अथ कथं तेनासंबद्धेन परमतस्यासंबद्धता प्रतिपाद्यत इत्याह—संगतमिति । इतिर्हेतौ । यतस्तस्यासंबद्धस्याश्लिष्टमेव संगतं सङ्गततया दर्शयितुम् ॥

अत्यन्तमिति । असम्बद्धार्थता महादोष है । उसका यह अपवाद है—'जहाँ दूसरे के मत को सर्वथा असंबद्ध बताने के लिये अपने अन्य असंबद्ध अर्थ का वक्ता प्रतिपादन करता है वहाँ असंगति (अयुक्ति) सदोष नहीं मानी जाती ।

प्रश्न उठता है उस (स्वकीय) असम्बद्ध (अर्थ) दूसरे के मत की असंगति का प्रतिपादन कैसे होता है इसे बताते है—सगतमिति । इति हेतु के अर्थ मे आया है । क्योंकि उस (दूसरे के) असम्बद्ध अर्थ के सदृश (अपने) असम्बद्ध अर्थ को सगत दिखलाना (उसका) अर्थ होता है ॥

उदाहरणम्—

किमिदमसंगतमस्मिन्नादावन्यत्तथान्यदन्ते च ।

यत्नेनोप्ता मापाः स्फुटमेते कोद्रवा जाताः ॥ १९ ॥

उदाहरण—'प्रारम्भ मे कुछ और तथा परिणाम मे कुछ और जो हुआ इसमें असगति क्या है ? परिश्रम करके उडद बोयी गयी और स्पष्ट ही वह कोदो हो गयी ॥ १९ ॥'

किमिदमिति । कश्चिदसंबद्धं परवचनं क्षिपन्नाह—अस्मिन्वस्तुनि किमिदमसंगतं भवतोच्यते । कुतः । आदौ प्रारम्भेऽन्यत्तथान्ते च निर्गमे चान्यदिति । किमिवासभवमिति तत्सदृशमाह—यथा माषा उप्ता. कोद्रवाश्चोत्पन्ना इत्यसबद्धम् , एवं तवापि वचनमित्यर्थ ॥

किमिदमिति । कोई दूसरे के असम्बद्ध वचन पर आक्षेप करता हुआ कहता है—'इस बात मे आप असगत क्या कह रहे है ।' क्यों ? प्रारंभ मे कुछ और तथा परिणाम मे कुछ और । 'किसके समान असभव है' इसके लिये उसके सदृश उदाहरण देते है— 'जिस प्रकार उडद बोयी गयी और कोदो उत्पन्न हुयी' यह असबद्ध है इसी प्रकार आपका वचन भी ॥

भूयोऽप्याह—

अभिधेयस्यातथ्यं तदनुपपन्नं निकाममुपपन्नम् ॥

यत्र स्युर्वक्तॄणामुन्मादो मौर्ख्यमुत्कण्ठा ॥ २० ॥

और भी बताते हैं—'अभिधेय का वह अतथ्य अनुपपन्न होकर भी सर्वथा उपपन्न होता है जहा वक्ताओं को उन्माद, मूर्खता या उत्कण्ठा हो ॥ २० ॥'

अभिधेयस्येति । यत्र वक्तुरुन्मादो मौर्ख्यमुत्कण्ठा च दोषः स्यात्तत्रा-तथ्यमयथार्थतानुपपन्नापि निकाममतिशयेनोपपन्ना युक्ता । स्वस्थस्य ह्यन्यथावचनं दोषाय । उन्मत्तादीनां तु तदेव भूषायै ॥

अभिधेयस्येति । जहाँ वक्ता में उन्माद, मूर्खता और उत्कण्ठा दोष हो वहाँ अतथ्य (अयथार्थता) उपपन्न न होने पर भी सर्वथा उपपन्न होती है । स्वस्थ प्राणी के अन्यथा में तो दोष होता है मत्त आदि के लिये तो वही (अन्यथा वचन) अलकार बन जाता है ।

एतदुदाहरणानि यथाक्रममाह—

भुक्ता हि मया गिरयः स्नातोऽहं वह्निना पिबामि वियत् ।
हरि-हर-हिरण्यगर्भा मत्पुत्रास्तेन नृत्यामि ॥ २१ ॥

इनके क्रमशः उदाहरण देते हैं—'मैंने पर्वतों को खा डाला, अग्नि से स्नान किया और आकाश (ईथर) को पी रहा हूँ । विष्णु, शिव और ब्रह्मा मेरे पुत्र हैं इसलिये (प्रसन्नता के कारण) नाच रहा हूँ ॥ २१ ॥'

भुक्ता इति । इत्युन्मादे ॥

किं मां ब्रवीषि मूर्ख पश्येदं शिशिरमेव ननु तिमिरम् ।
सुस्वादुरयं गन्धस्तमसा त्वेनं न पश्यामि ॥ २२ ॥

भुक्तेति । यह उन्माद का (उदाहरण दिया गया) ॥

'मुझ मूर्ख से क्या कह रहे हो । इसे देखो । शिशिर ही अन्धकार है । यह गन्ध बड़ी स्वादिष्ट है, अन्धकार के कारण इसे नहीं देख रहा हूँ ॥ २२ ॥'

किमिति । इति मौर्ख्ये ॥

हे हंस देहि कान्तां सा मे भवता हृतेति किं मिथ्या ।
ननु गतिरियं तदीया वाणी सैवेयमतिमधुरा ॥ २३ ॥

किमिति । यह मूर्खता का उदाहरण है ॥

'हे हंस ! प्रिया को लौटा दो । मेरी उस (प्रिया) को चुरा ले गये हो क्या यह झूठ है ? निश्चय ही यह उसी की गति है और यह मधुर वाणी भी वही है ॥ २३ ॥'

हे इति । इत्युत्कण्ठायाम् । अत्र गिरिभोजनं वह्निस्नानमाकाशपानमजादिपुत्रत्वं च, तथा तिमिरस्य शीतलत्वम्, गन्धस्य सुस्वादुत्वम्, तस्य चान्धकारेण दर्शनम्, तथा हंसेन कान्ताहरणं च सर्वमेवासंबद्धमुन्मत्तमूर्खोत्कण्ठोक्तत्वाच्चार्वेव ॥

हे इति । यह उत्कण्ठा का उदाहरण है । यहाँ पर्वत का भोजन, अग्नि में स्नान, आकाशपान, अजन्मा (विष्णु आदि का) पुत्र होना तथा अन्धकार का शीतल होना, गन्ध का सुस्वादु होना तथा उसे अन्धकार से देखना और हंस का प्रिया को चुराना—यह सब असम्बद्ध प्रलाप मतवाले, मूर्ख और उत्कण्ठित के द्वारा कथित होने के कारण रमणीक ही हुआ है । (असंगत नहीं) ।

एवं सर्वार्थालंकारसाधारणान्दोषानभिधायेदानीं केवलोपमादोषानाह—

सामान्यशब्दभेदो वैषम्यसंभवोऽप्रसिद्धिश्च ।
इत्येते चत्वारो दोषा नासम्यगुपमायाः ॥ २४ ॥

इस प्रकार सभी अर्थालङ्कारों के साधारण दोषों का व्याख्यान करके अब उपमा के शुद्ध दोषों का वर्णन करते हैं ॥

'सामान्य शब्दभेद (साधारण धर्म का भेद) वैषम्य, असंभव और अप्रसिद्धि-ये चार उपमा के शुद्ध दोष हैं ॥ २४ ॥'

सामान्येति । औपम्यभेदस्योपमाया इत्येते सामान्यशब्दभेदादयश्चत्वारो दोषाः । ते च नासम्यक् । अपि तु स्फुटा एव । अत्र च स्वरूपोपादाने सत्यपि चत्वार इति ग्रहणाद्यन्मेधाविप्रभृतिभिरुक्तं यथा—"लिङ्गवचनभेदौ हीनताधिक्यमसंभवो विपर्ययोऽसादृश्यमिति सप्तोपमादोषाः । तत्र लिङ्गवचनभेदावन्योन्यमुपमानोपमेययोः यथा—'भक्षिताः सक्तवो राजञ्शुद्धाः कुलवधूरिव । परमातेव निःस्नेहा शीतला परकार्यवत् ॥' उपमेयादुपमानस्य यत्रोनानि विशेषणानि सा हीनता । यथा—'स मारुताकम्पितपीतवासा बिभ्रत्सलीलं शशिभासि शङ्खम् । यदुप्रवीरः प्रगृहीतशार्ङ्गः सेन्द्रायुधो मेघ इवावभासे ॥' एवं यत्रोपमेयादुपमानस्याधिकानि विशेषणानि तदाधिक्यम् । यथा—'स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीम (?) वपुराप कृष्णः । शतह्रदेन्द्रायुधवान्निशायां संसृज्यमानः शशिनेव मेघः ॥' अत्रोपमाने मेघे शशियोगोऽधिकः । यत्र विनैव यद्यर्थसंभवद्विशेषणमुपमानं क्रियते सोऽसंभवः । यथा—'निपेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः । जाज्वल्यमाना इव वारिधारा दिनार्धभाजः परिवेषिणोऽर्कात् ॥' नहि वारिधाराणामयमर्थं जाज्वल्यमानत्वं रविबिम्बाद्वा वारिधारापतनं संभवति । यत्रोपमेयाद्धीनमुत्कृष्टं वोपमानं क्रियतेऽसौ विपर्ययः । तत्र हीनं यथा—'स्फुरन्ति निखिला नीले तारका गगने निशि । भास्कराभीशुसंस्पृष्टाः कृमयः कर्दमे यथा ॥' उत्कृष्टं यथा-'अयं पद्मासनासीनश्चक्रवाको विराजते । युगादौ भगवान्ब्रह्मा विनिर्मित्सुरिव प्रजाः ॥' यत्रोपमानोपमेययोः साम्यं नास्ति तदसादृश्यम् । यथा—'वनेऽथ तस्मिन्वनितविहारिणः प्रभिन्नदानार्द्रकटा मतङ्गजाः । विचित्रबर्हाभरणाश्च बर्हिणो बभुर्दिवीवामलविग्रहा ग्रहाः ॥' अत्र न किंचिद्धस्तिनां मयूराणां च ग्रहैः सारूप्यमस्तीति" । तदेतन्निरस्तम् । यतश्चत्वार एवामी संग्राहका भेदाः । न त्वन्ये । तथाहि सामान्यशब्दभेदं विना लिङ्गवचनभेदमात्रं न दुष्टम् । इह हि का दुष्टता । यथा—'अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः । पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥' किं

च लिङ्गवचनभेदे दोषत्वेनाश्रीयमाणे कालकारकविभक्तिभेदा नाश्रिता । सामान्यशब्दभेदे तु तेऽपि सगृहीता । तथा हीनताधिक्ये चोपमानोपमेयसाम्याभावाद्दोषत्वेनाश्रिते परेण । तत्र च वैषम्यमेवोभयदोषसग्राहकमेकमुक्तमस्माभि । तथा योऽपि हीनताधिक्यविशिष्टो विपर्यय उक्तः सोऽपि न तावन्मात्रेण दोषहेतु । अतिप्रसङ्गात् । अपि स्वप्रसिद्धित एव । अन्यथा हि निन्दास्तुती यत्र चिकीर्षिते भवतस्तत्रापि यथाक्रम निकृष्टस्योत्कृष्टस्य चोपमानस्य दुष्टत्व स्यात् । यथा—'चतुरसखीजनवचनैरतिवाहितवासरा विनोदेन । निशि चण्डाल इवाय मारयति वियोगिनी चन्द्र ॥' स्तुतौ यथा—'जित्वा सपत्नानुक्षाय धेन्वा सह विराजते । यथा क्षपितदैत्येन्द्र श्रिया साक जनार्दनः ॥' न चात्र काचिद्दुष्टता । यस्त्वर्थो यत्रोपमानत्वेन न प्रसिद्ध. स सादृश्ये सत्यपि न कर्तव्य. । तथाहि सिंहादधिकोऽपि शरभ शौर्येणोपमानं न केनचिन्निबद्धः । असादृश्यस्य तु दोषत्वेऽप्युपमानलक्षणेनैव निरस्तत्वादिहोपादानमनर्थकम् । को हि ज्ञातोपमालक्षणः सादृश्याभावे उपमां कुर्वीत । तस्मादेतन्निरासाच्चत्वार एवामी दोषाः, न तु सप्तेति स्थितम् । अत एव नामग्र्यमित्युक्तम् ॥

सामान्येति । औपम्य के भेद उपमा के सामान्य शब्दभेद आदि ये चार दोष होते हैं । ते अस्फुट नहीं अपितु स्फुट (शुद्ध हैं) । यहाँ स्वरूप का उपादान (नाम का सकेत) कर देने पर भी 'चार ही' कहने से जो मेधावी आदि ने कहा है—जैसे—"लिङ्गभेद, वचनभेद, हीनता, आधिक्य, असभव, विपर्यय और असादृश्य ये सात उपमा के दोष हैं । इनमें परस्पर उपमान और उपमेय के लिङ्ग और वचन भेद के उदाहरण देते हैं—हे राजन्! चुलरू के समान शुद्ध सतुआ खाये गये जो पराये के माता के समान स्नेहरहित और पराये के कार्य के समान शीतल है (इनमें वचन और लिङ्ग दोनों भिन्न हैं) जहाँ उपमेय से उपमान के विशेषण कम होते हैं वहाँ हीनता होती है । जैसे-पवन के द्वारा कँपाये गये पीत वस्त्र वाले, यादव वीरों में अग्रेसर, शार्ङ्ग (धनु) को धारण करने वाले, चन्द्र की सी कान्ति वाले लक्ष्मायुक्त शङ्ख को धारण करते हुये वे (श्री कृष्ण) इन्द्रधनुष से युक्त मेघ के समान सुशोभित हुये ॥ (यहाँ उपमेय कृष्ण के पास वस्त्रादि चार विशेषण हैं और उपमान मेघ का केवल एक-इन्द्रधनुष से युक्त ॥) इसी प्रकार जहाँ उपमेय से उपमान के अधिक विशेषण होते हैं वहाँ आधिक्य (दोष) होता है । जैसे—'पीत वस्त्र वाले और शार्ङ्ग धनुष धारण करने वाले वे कृष्ण सुन्दर भीषण शरीर को प्राप्त हो गये मानों बिजली और इन्द्रधनुष से युक्त रात में चन्द्रमा से संवलित मेघ हो ॥' यहाँ उपमान मेघ में चन्द्रमा का योग (उपमेय कृष्ण के साथ प्रयुक्त विशेषणों से) अधिक है । जहाँ

यदि आदि के बिना उपमान को असम्भव विशेषणों से युक्त बनाया जाता है वहाँ असम्भव दोष होता है—जैसे धनुष के मण्डल के मध्यभाग का सेवन करनेवाले द स बाण मानों उसके मुख से निकल रहे ये जैसे वृत्ताकार सूर्य से दोपहर को जलती हुयी जलधारायें हों। यदि आदि की शर्त के बिना जल की धाराओं का जलना अथवा सूर्य-बिम्ब से जलधाराओं का निकलना सम्भव नहीं है। जहाँ उपमेय से उपमान हीन अथवा उत्कृष्ट होता है वहाँ विपर्यय होता है हीन का उदाहरण—रात में नीले आकाश में सभी तारे इस प्रकार चमकते हैं मानों सूर्य की किरणों से स्पृष्ट कीचड़ के कीड़े हों। उत्कृष्ट का उदाहरण—कमल के आसन पर बैठा हुआ यह चक्रवाक युग के प्रारम्भ में प्रजा की सृष्टि के लिये बैठे भगवान् ब्रह्मा के समान शोभित हो रहा है। जहाँ उपमान और उपमेय में साम्य नहीं होता वहाँ असादृश्य होता है। जैसे—'उस वन में रमणियों के साथ विहार करने वाले गण्डस्थल से बहते हुये दानवारि वाले हाथी और नाना प्रकार के चिन्हों के आभूषण वाले मयूर आकाश में स्वच्छ शरीर वाले नक्षत्रों के समान शोभित हो रहे थे।' यहाँ हाथियों और मयूरों का नक्षत्रों के साथ कुछ भी सारूप्य नहीं है। अतएव इस (सात भेद) का खण्डन हो गया क्योंकि ये चार ही भेद पर्याप्त हैं। इनके अतिरिक्त दूसरे भेद नहीं है। सामान्य शब्द के भेद के बिना लिङ्ग और वचन भेद मात्र दुष्ट नहीं होते। यहाँ कहा जाता है! जैसे—'संभोगों में निर्लज्जता के समान अपमान में पराक्रम जिस प्रकार भूषण है उसी प्रकार अन्यत्र (अपमान के अतिरिक्त) तरुणियों की लज्जा के समान पुरुषों का आभूषण क्षमा है। दूसरी बात यह है कि लिङ्ग और वचन भेद को ही दोष मानने पर काल, कारक, विभक्ति भेद का उनमें अन्तर्भाव नहीं होगा। सामान्य शब्द भेद में तो उनका भी अन्तर्भाव हो जायगा। तथा (दूसरे के द्वारा) उपमान और उपमेय में साम्य के अभाव के कारण हीनता और आधिक्य दोष बताये गये। उनमें केवल वैषम्य को ही हमने दोष बताया जिसमें दोनों भेदों का (अन्तर्भाव) हो जाता है। तथा हीनता और आधिक्य से विशिष्ट उक्त विपर्यय भी इतने से ही (हीन या अधिक होने से ही) दोष का कारण नहीं बन जाता क्योंकि ऐसा मानने पर तो अतिव्याप्ति दोष होगा। यह दोष अप्रसिद्धि के कारण होता है। नहीं तो निन्दा और स्तुति जहाँ विवक्षित होती है वहाँ भी क्रमशः निकृष्ट (हीन) और उत्कृष्ट उपमान दुष्ट होंगे। जैसे—चतुर सखियों के वचनों से विनोदपूर्वक दिन को बिताये हुये वियोगिनियों की रात में चाण्डाल के समान यह चन्द्र हत्या करता है। (निन्दा)। स्तुति का उदाहरण—शत्रुओं को जीतकर दैत्यराज को, मारकर लक्ष्मी के साथ विष्णु के समान शोभित हो रहा है। यहाँ कोई अदोष नहीं है।

जो अर्थ जहाँ उपमान रूप में प्रसिद्ध नहीं है वहाँ सादृश्य होने पर भी उपमान नहीं बनाना चाहिये। जैसे शरभ (हाथी का बच्चा, आठ पैर पर वाला पशु) सिंह से अधिक होकर भी किसी के द्वारा शौर्य का उपमान नहीं बनाया गया। उपमान के लक्षण से ही असादृश्य दोष के खण्डित हो जाने के कारण यहाँ उसका उपादान व्यर्थ है। भग्न उपमा के लक्षण को जानकर सादृश्य के अभाव में कौन उपमा करेगा। अतएव इस असादृश्य के भी खण्डन हो जाने से उपमा के केवल चार ही दोष हैं सात नहीं (कारिकाकार) का यह मत स्थित हो गया। इसीलिये 'न असम्यक्' कहा गया ॥

इदानीमेतेषामेव दोषाणां लक्षणमाह—

सामान्यशब्दभेदः सोऽयं यत्रापरत्र शक्येत ।
योजयितुं नाभग्नं तत्सामान्याभिधायिपदम् ॥ २५ ॥

अब इन्हीं दोषों का लक्षण बताते हैं—'जहाँ साधारण धर्मवाचक पद की बिना भग्न किये उपमान में योजना नहीं हो सकती वहाँ सामान्य शब्द भेद नामक (उपमान दोष होता है) ॥ २५ ॥'

सामान्येति। सोऽयं सामान्यशब्दभेदाख्यो दोष, यत्र तयोरुपमानोपमेययोः सामान्यवाचिपदं यावन्न भग्नं तावदपरत्रोपमाने योजयितुं वाचकीकर्तुं न शक्यते ॥

सामान्येति। जहाँ उपमान और उपमेय के साधारण धर्म वाचक पद को जब तक खण्डित न किया जाय तब तक उसका उपमान पद के साथ उसका अन्वय न बैठ सके (उपमान पद के साथ वह साधारण धर्म का वाचक न हो सके) वहाँ सामान्य शब्दभेद नामक उपमा दोष होता है ॥

अथ सामान्याभिधायिपदभेदे हेतुमाह—

तल्लिङ्गकालकारकविभक्तिवचनान्यभावसद्भावात् ।
उभयोः समानयोरिति तस्यां भिद्येत किंचित्तु ॥ २६ ॥

सामान्य (साधारण धर्म) के वाचक पद की भिन्नता का कारण बताते हैं—'वह साधारण धर्म वाचक पद लिङ्ग, काल, कारक, विभक्ति तथा वचन के अन्यथा होने के कारण उपमान और उपमेय के समान होने पर, उपमा में कुछ भिन्न होता है ॥ २६ ॥'

तदिति। तत्सामान्याभिधायिपदं लिङ्गादीनामन्यथात्वाद्धेतोरनयासुपमाया भिद्येत। ननु तर्हि वैषम्यमेवेदं तत्किमस्य पृथक्पाठेनेत्याह—उभयोरुपमानोपमेययोः। समानयोरिति। वैषम्ये पुनरुभे अप्यसमाने ते।

तर्हि लिङ्गादिभेद एव स्वरूपेण किं नोक्त इत्याह—भिद्येत किंचित्तु। तुरवधारणे। तत्सामान्याभिधायिपदं लिङ्गादिभेदेऽपि किंचिदेव भिद्यते, न सर्वम्। ततो यत्रैव तस्य भेदस्तत्रैव दोष:, न सर्वत्र॥

तदिति। वह साधारण धर्म वाचक पद लिङ्ग आदि के अन्यथा (भिन्न) होने के कारण उस उपमा में भिन्न हो जाता है। फिर यह तो वैधर्म्य ही हो जाता इसका पृथक् ग्रहण करने से क्या लाभ? इसके उत्तर में कहते हैं—'उपमान और उपमेय के समान होने पर। वैधर्म्य में तो वे दोनों उपमान और उपमेय ही असमान होते हैं। फिर स्वरूपतः उसे लिङ्ग आदि भेद नाम से ही क्यों नहीं कहा? कहते हैं—(लिङ्ग आदि भेद होने पर) कुछ ही भिन्न होता है। 'तु शब्द' अवधारण अर्थ में आया है। वह साधारण धर्मवाचक पद लिङ्ग आदि के भेद में कुछ ही भिन्न होता है सब कुछ नहीं। अतएव जिसमें भेद किया जाता है उसी में दोष होता है सर्वत्र नहीं॥

एतदुदाहरणानि यथाक्रममाह—

> चन्द्रकलेव सुगौरो वात इव जगाम यः समुत्सृज्य।
> दहतु शिखीव स कामं जीवयसि सुधेव मामालि॥ २७॥

'ज्योत्स्ना के समान अत्यन्त गौर, पवन के समान त्याग कर जो चला गया वह अग्नि की भाँति खूब जले। हे सखि! तुम अमृत के समान मुझे जिला रही हो॥ २७॥'

चन्द्रकलेति। काचिद्विरहिणी सखीं ब्रूते—आलि सखि, यथा चन्द्रकला सुगौरी तथायं सुगौरः। इति लिङ्गभेदे। यथा वातो गच्छति तथा मां समुत्सृज्य यो जगाम। इति कालभेदे। भूतकालो वर्तमानेन भग्नः सन्नुपमाने योज्यते। दहतु शिखीव स कामम्। इति कारकभेदे। विधिविशिष्टो हि कर्ता कर्तृमात्रेण शिखिनोपमितोऽत्र। जीवयसि सुधेव मामालि। इति विभक्तिभेदे। मध्यमपुरुषो हि प्रथमपुरुषेण विपरिणम्योपमाने योज्यते॥

चन्द्रकलेति। कोई वियोगिनी सखी से कह रही है—हे सखि! जिस प्रकार चन्द्र की कला अत्यन्त गौरवर्ण की है उसी प्रकार यह प्रिय भी अत्यन्त गौर है। (यहाँ 'गौर' सामान्यवाचक पद को स्त्रीलिङ्ग में भिन्न किये बिना 'चन्द्रकला' उपमान के साथ अन्वय हो ही नहीं सकता) यह लिङ्गभेद का उदाहरण है। 'जिस प्रकार वायु जाता है उसी प्रकार जो छोड़कर चला गया' यह कालभेद का उदाहरण है। (यहाँ) भूतकाल को भग्न करके वर्तमान के साथ अन्वित करेंगे।

'वह अग्नि की तरह खूब जलाये' यह कारकभेद का उदाहरण है। विधि-विशिष्ट कर्ता शुद्ध कर्ता अग्नि के साथ उपमित किया गया गया है। 'अमृत के समान सखि मुझे जिला रही हो' यह विभक्तिभेद का उदाहरण है। मध्यम पुरुष (जीवयसि) को जीवयति बनाकर उपमान के साथ जोड़ते हैं॥

कुवलयदलमिव दीर्घे तव नयने इत्ययं तु सुव्यक्तः।
युक्त्या तावद्दोषो विद्वद्भिरपि प्रयुक्तश्च ॥ २८ ॥

'नीलकमल के पत्र के समान तुम्हारे दोनों नेत्र विशाल हैं। इस प्रकार के दोष तो युक्ति से सुव्यक्त है (इन दोषों को) महाकवियों ने भी प्रयोग किया है॥ २८॥'

कुवलयेति। कुवलयदलमिव दीर्घे तव नयने। इति वचनभेदे। दीर्घे इति द्विवचनान्तं ह्येकवचनान्तं कृत्वा योज्यते। नन्वेवं लिङ्गादिभेदे दोषीकृते महाकविलक्ष्यम् 'तां हंसमालाः शरदीव गङ्गाम्' इत्यादिक कालादिभेदस्य विद्यमानत्वात्प्रायशः सर्वमेव दूष्यत इत्याह—इत्ययं त्वित्यादि। तुरवधारणे। युक्त्या तावदयं सुव्यक्त एव दोषः। ततोऽस्माभिरुक्तः। उक्तं च पूर्वमेव 'काव्यालंकारोऽयं ग्रन्थः क्रियते यथायुक्ति' (१।२) इति। विद्वद्भिरपि प्रयुक्तश्चेत्यनेन दोषस्याप्यपरिहार्यतामाह॥

कुवलयेति। 'नीलकमल के पत्र के समान तुम्हारे दोनों नेत्र विशाल हैं'—यह वचन भेद का उदाहरण है। 'दीर्घे' यह द्विवचनान्त ('दीर्घम्') एकवचनान्त करके उपमान (कुवलयदलदीर्घम्) में अन्वित होगा। प्रश्न उठता है कि लिङ्ग आदि भेद के इस प्रकार दुष्ट मानने पर तो महाकवि का उदाहरण "शरद में हंसों की पंक्तियों ने उस गङ्गा को' आदि भी काल आदि भेद होने के कारण प्रायः सब दूषित हो जायगा? कहते हैं—इत्ययं त्वित्यादि। तु अवधारण अर्थ में आया है। युक्ति से यह स्फुट ही यह दोष है। इसीलिये हमने दोष बताया। पहले ही कहा गया है 'काव्यालंकार नामक इस ग्रन्थ की युक्तिपूर्वक रचना की जायगी' (कारिका में) 'विद्वद्भिरपि प्रयुक्तश्च' के ग्रहण करने का तात्पर्य है कि यह दोष अपरिहार्य है॥

वैधर्म्यमाह—

अकृतविशेषणमेकं यत्स्यादुभयोस्तदन्यवैधर्म्यम्।
संभवति कल्पितायामुत्पाद्यायां च नान्यत्र ॥ २९ ॥

वैधर्म्य का लक्षण करते हैं—'उपमान और उपमेय में जहाँ एक निर्विशेषण हो (और दूसरा सविशेषण हो) वहाँ वैधर्म्य उपमा-दोष होता है। यह केवल कल्पितोपमा और उत्पाद्योपमा में संभव है अन्यत्र नहीं॥ २९॥'

अकृतेति। उभयोरुपमानोपमेययोर्मध्यादेकमुपमानमुपमेयं वा निर्विशेषणं भवेत्तदन्यत्कृतविशेषणस्य कृतविशेषणेन सह वैषम्यम्। तच्च कल्पितायामुत्पाद्यायां चोपमायां संभवति॥

अकृतेति। दोनों (उपमान और उपमेय) में से जहाँ एक (उपमान या उपमेय) निर्विशेषण हो और दूसरा (उपमेय या उपमान) सविशेषण हो वहाँ निर्विशेषण का सविशेषण के साथ वैषम्य होता है। इसका विषय कल्पितोपमा और उत्पाद्योपमा ही हो सकती है॥

विपरीतरते सुतनोरायस्ताया विभाति मुखमस्याः।
श्रमवारिबिन्दुजालकलाञ्छितमिव कमलमुत्फुल्लम्॥३०॥

पुरुष का-सा आचरण करते समय 'इस सुन्दरी का मुख परिश्रम के कारण *उत्पन्न स्वेदबिन्दुओं से लाञ्छित होने के कारण पुष्पित कमल के समान सुशोभित* हो रहा है॥ ३०॥'

विपरीतरत इति। इवशब्दो भिन्नक्रमे। फलस्योपमानस्य न किंचिद्वश्यायजलकणनिकुरम्बाञ्छितत्वादिकं कृतम्। कल्पितोपमेयम्॥

विपरीतरत इति। इव शब्द भिन्न क्रम से आया है (कमलमिव प्रयोग होना चाहिये)। यहाँ (परिश्रम के कारण स्वेदबिन्दुओं से लाञ्छित के उपमेय मुख का विशेषण बनाकर) कुछ-कुछ सूखती हुयी जलकणिकाओं से अङ्कित आदि को उपमान कमल का विशेषण नहीं बनाया गया है। यह कल्पितोपमा है॥

उत्पाद्यामाह—

मुक्ताफलजालचितं यदीन्दुबिम्बं भवेत्ततस्तेन।
विपरीतरते सुतनोरुपमीयेताननं तस्याः॥ ३१॥

उत्पाद्योपमा का लक्षण करते हैं—उदाहरण देते हैं—'यदि चन्द्रबिम्ब मुक्ताफल के जाल से व्याप्त हो तब उससे उस सुन्दरी के उस मुख की उपमा दी जाय॥ ३१॥'

मुक्ताफलेति। अत्रोपमानस्येन्दुबिम्बस्य मुक्ताफलजालचितमिति विशेषणं कृतम् न तु मुखस्योपमेयस्य श्रमवारिकणचितत्वादि॥

मुक्ताफलेति। यहाँ 'मुक्ताफल से व्याप्त' यह उपमान चन्द्रबिम्ब का विशेषण किया किन्तु उपमेय मुख का 'परिश्रम के स्वेदबिन्दुओं से व्याप्त' आदि नहीं॥

अथासंभवः—

उपमानं यत्र स्यादसंभवत्तद्विशेषणं नियमात्।
संभूतमयद्यर्थं विज्ञेयोऽसंभवः स इति॥ ३२॥

अब असभव का लक्षण करते हैं—'जहाँ असभव उपमान निश्चयपूर्वक असभव विशेषणों से युक्त बिना यदि सूचक शर्त के उपन्यस्त हो वहाँ असभव नामक (उपमा दोष) होता है ॥ ३२ ॥'

उपमानमिति । स इत्यनेन प्रकारेणासंभवो नाम दोष । यत्रोपमानमसभवत्तद्विशेषणमसभाव्यविवक्षितधर्मकमपि नियमान्निश्चयेन सभूतं तद्विशेषणयुक्तं स्यात् । ननु तर्हि 'पुष्पं प्रवालोपहितं यदि स्यान्मुक्ताफलं वा स्फुटविद्रुमस्थम्' इत्याद्यपि दुष्टं स्यादित्याह—अयदर्थम् । यदर्थं विकल्प यदि क्रियते । सयदर्थे तु न दोषः ॥

उपमानमिति । जहाँ असभव विशेषणों से युक्त उपमान को निश्चयपूर्वक उन विशेषणों से युक्त बनाया जाय वहाँ असभव नामक उपमा दोष होता है । फिर तो (कुमारसभव में पार्वती के वर्णन में) 'यदि कुसुम नूतन किसलयों से युक्त हो अथवा मूगे में मोती के फल लगे हों (तब वह उस पार्वती के ताम्रवर्ण के *ओष्ठ पर बिखरी हुयी कान्तिवाली स्वच्छ मुस्कान का अनुकरण करे*) आदि भी दूषित हो जायगा । कहते हैं—अयदर्थम् । यदि (वह असभव विशेषण-विशिष्ट उपमान) यदर्थ (यदि, चेत् आदि से युक्त) के बिना उपन्यस्त होगा (तभी सदोष होगा । यदि, चेत् आदि से युक्त होने पर वह सदोष नहीं होगा ॥

उदाहरणमाह—

सुतनुरियं विमलाम्बरलक्ष्योरुमृणालमूललालित्या ।
अजलप्रकृतिरदूरस्थितमित्त्रा गगननलिनीव ॥ ३३ ॥

उदाहरण देते हैं—'यह सुन्दरी स्वच्छ वस्त्र के अन्दर से लक्षित होने वाली, विस्तृत मृणालमूल के समान सौन्दर्य वाली, बिना जल के उत्पन्न, समीप में स्थित मित्र (सूर्य) वाली आकाशकमलिनी के समान है ॥ ३३ ॥'

सुतनुरिति । अत्र विशेषणत्रयमपि तन्वीगगननलिन्योः समानम् । पर यदि गगने नलिनी संभवेत्तदा तन्वीसदृशो भवेत् । अतो यदर्थं विना दुष्टता ॥

सुतनुरिति । यहाँ तीनों ही विशेषण सुन्दरी और आकाशकमलिनी के समान हैं । किन्तु यदि आकाश में कमलिनी सभव हो तब वह सुन्दरी के सदृश हो । इस प्रकार यहाँ यदर्थ के अभाव में (असभव) दोष है ॥

अथाप्रसिद्धि —

उपमानतया लोके वाच्यस्य न तादृशं प्रसिद्धं यत् ।
क्रियते यत्र तदुत्कटसामान्यतयाप्रसिद्धिः सा ॥ ३४ ॥

अप्रसिद्धि का लक्षण करते हैं—'उपमेय अर्थ के उपमान रूप में लोक में जो वस्तु प्रसिद्ध नहीं है उसे अत्यन्त सादृश्य के कारण जहाँ उपमान बना देते हैं वहाँ अप्रसिद्धि दोष होता है ॥ ३४ ॥'

उपमानतयेति । यत्किमपि वस्तु लोके वाच्यस्योपमेयार्थस्योपमानतया न प्रसिद्धमथ च तथा क्रियते सा प्रसिद्धिर्दोषः । कदाचिद्वाच्येन सह विसदृशं स्यादथवा तादृशं तुल्यमपि यदि न प्रसिद्धं कथं क्रियत इत्याह—उत्कटसामान्यतया । अतिसादृश्यादित्यर्थः ॥

उपमानतयेति । जहाँ कोई ऐसी वस्तु जो उपमेय के उपमान रूप में लोक में प्रसिद्ध नहीं है और उपमान बना दी जाती है वहाँ अप्रसिद्धि दोष होता है। कदाचित् वाच्य के साथ विसदृश हो अथवा उस (उपमेय) के तुल्य भी जब प्रसिद्ध नहीं होता तो उसका उपमान कैसे बना दिया जाता है, इसे बताते हैं—उत्कट सामान्यतया । अत्यन्त सादृश्य के कारण ।

उदाहरणमाह—

पद्मासनसंनिहितो भाति ब्रह्मेव चक्रवाकोऽयम् ।
श्वपचश्यामं वन्दे हरिमिन्दुमितो वकोऽयमिति ॥ ३५ ॥

उदाहरण देते हैं—'कमल के आसन पर बैठा हुआ यह चकवा कमल के आसन पर बैठे हुये ब्रह्मा के समान शोभित हो रहा है। चाण्डाल के समान कृष्णवर्ण वाले विष्णु को नमस्कार है। यह बगुला चन्द्रमा के समान श्वेत है ॥ ३५ ॥'

पद्मेति । इह ब्रह्मकेशवचन्द्राणा क्रमेण पद्मासनत्वेन श्यामत्वेन च चक्रवाकश्वपचबकाः समाना अपि न तदुपमानत्वेन प्रसिद्धाः । यत्र तु प्रसिद्धिस्तत्र भवत्येव । यथा—'नमामि शंकरं काशसकाशं शशिशेखरम् । नमो नुताय गीर्वाणैर्नलिनोदाय विष्णवे ॥' इत्यादि । ननु कथम् 'भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि । कथं न मन्युर्ज्वलयत्युदीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥' इत्यादिष्वौपम्यम् । अत्र होकत्र विधिरपरत्र निषेधः । यथा शमीतरुमग्निर्दहत्येवं त्वां मन्युः कथं न दहतीति । सत्यम् । प्रथममौपम्ये विहिते पश्चादुपमेयप्रतिषेधे न किंचिदनुपपन्नम् । केचित्तु व्यतिरेकोऽयमित्याहुः ॥

